12 *Kāv pr vi.* p 169 यन्त्वे मालवाच्छृङ्गारस्य कौशिकात् करुणविप्रलम्भयोस्तक्काद् वीररौद्रभयानकरसानामभिव्यक्ति । सा च तद्विदामनुभवसिद्धैव। The *Sar hr. al* (*B O R I* mss fol 141) in ch 9 (ध्रुवाध्याय) v 23-25 has —हिन्दोलो मालवाख्यश्च श्रृङ्गाररसमाश्रितौ । पञ्चमष्टक्करागस्तु वीरे रौद्रे यथाक्रमम् ॥ कारुण्ये ककुभश्चैव हास्ये मालवकौशिक । ककुभो भयानके कार्यः षड्जो बीभत्सशान्तयो ॥ एते रसाश्रिता रागा योज्या सर्वत्र गीतके ॥ For the tracing of these passages I am indebted to Dr Alain Danielou, now of the *Institut Francis d' Indologie*, Pondicherry as well as to Dr C P Desai of Tarapur,

the reference is to the kingly author of Mithilā The other reference[13] is to *kāku* intonation as a determinant of meaning It is recognised by Rājaśekhara in the *Kāv mīm* (p 31) (a work not laid under contribution by Śrīdhara) as a *pāṭhadharma* and reiterated by Bhoja with illustrations This distinctive view was opposed by Mammata and Viśvanātha but found favour with a considerable section of *alankāra* writers, and these include notably Rucaka, Śrīdhara and Caṇḍīdāsa amongst the commentators of the *Kāv pr* In our paper *A Reference in the Sāhityadarpana and Deductions Therefrom* (*P O* Vol XII pp 47 61) we have traced the historical setting of this issue, which in its origin is a specification of Bharata's observation on *vāgabhinaya* The opposite party has taken their stand on the dictum काव्यमार्गे स्वरो न गण्यते Śrīdhara's partiality for this section and for music generally, which furnishes an analogy to *pānaka rasa*[14] is evident.

These arguments, which serve to confirm what was at best a conjecture about Śrīdhara's country as Mithilā, help us at the same time to fix his date The use of Vācaspati Miśra's gloss would make Śrīdhara not earlier than 1200 A D And thus the upper terminus would have to be shortened by 50 years There can, therefore, be no hesitation in dating him, in the first quarter of the 13th century, as we can allow a period of 25 years for the *Kāv pr vi* to be known in Orissa and be a subject of academic discussion and comment Whether Śrīdhara

Dist Thana, Bombay, who is editing the *Sar. hr al* for the Khairagarh Music University. M P

13 in pp 46-47 *Kāv pr. vi* where in our *tippanī* we referred to the *Nāt. śās* (ch xvii v 10 G. O S edn) which actually reads a bit differently Śrīdhara's citation is from the *Sar hr al* ch x v 64 as Dr Danielou informs me —उदात्तश्चानुदात्तश्च स्वरित कम्पित-स्तथा । वर्णाश्चत्वार एव स्यु पाठ्ययोगे च सर्वदा ॥ तत्र हि हास्यशृङ्गारयो' स्वरितोदात्त वीररौद्राद्भुतेषूदात्तकम्पित करुणबीभत्सभयानकेष्वनुदात्तस्वरितकम्पितम् ।

14 *Kāv pr vi* p 171 यथा हि चित्रे नील पानके गुडाम्लीका ग्रामरागे षड्जर्षभगान्धारादय पृथक्त्वेनावभासन्ते तथा क्रियाकारकपदानि तदर्थ-वाक्यार्थाभ्याममेदेनैव प्रतीयन्ते । The *Bṛhaddeśī* (I 89 90, T S. S edn pp 94-95) remarks —समूहवाचिनौ ग्रामौ स्वरश्रुत्यादिसयुतौ । यथा कुटुम्बिन' सर्वे एकीभूता वसन्ति हि । सर्वेयोगेषु स ग्रामो यत्र नित्य व्यवस्थित ॥

was himself a Maithila, or one domiciled there, with his family belonging to N W India (where Hindi in its older form was spoken, as evidenced by his use of the word noted above) is, however, immaterial, since his connection and association with its life and culture are direct and are proved by a lot of internal evidences

With these data before us, it is not difficult to determine the king whom he served as *sāndhivigrahika*[15] Though Śrīdhara nowhere mentions his royal master, this can in no way be regarded as a significant omission, for Śrīdhara is by nature and temperament reserved and he gives us no details about himself Nānyadeva's grandson Narasimhadeva,[16] (1187-1228), who, as the ruler of Mithilā, was still maintaining a show of its old prestige and position, was very likely Śrīdhara's master

Plan of the present edition

We have presented the *Kāv pr* text as Śrīdhara reads it with the *kārikās* and the verses numbered In the case of the former, a *kārika* is given one number, where we have a full verse, as is generally the case in printed editions of important works like the *Dhv āl* For the *Kāv pr vi*, we have given the readings as in our mss, except in cases where they are faulty In a good number of such cases, where the orthographical errors are palpable they have been emended In some of them the readings as in the mss have been retained with queries noted against them It is felt that there are still a few corrupt readings left and this was inevitable In the case of the illustrations, that are repeated, we have not counted them again, but indicated the number thereof where first such occur We have also reckoned the prose illustrations and numbered them Thus the number of illustrations shown here is 593 and not 603, as in Jhalkikar's edition

15. Probably as सान्धिविग्रहिक he was the chief minister of war and peace which post was equivalent to that of the minister in charge of external affairs of these days.

16 K P Jayaswal cited in *H.M* (p 264) describes Narasimhadeva as 'a weak king'.

There are two other departures from the way in which this work has been so long presented We do not stick to the practice of noting the number of *kārikās* The *kārikā* number in such editions is 142, the *sūtra* number is 212, of these extra 70, some are unnecessary, more than half of which are in the *alankāra* section (*ullāsa* ten) This differentiation is neither necessary nor called for in over half of the text In some cases, and that particularly in *ullāsa* ten, the points noted are different, and in some the division is awkward as in *kār* 18c (*viśiṣte lakṣanā naivam*) with *vyākhyātam* as the *vṛtti* thereon Similarly in *kār* 20a, 21c, 41c, 43c and 46cd (*bhedāstadekapañcāśat* with *vyākhyātāḥ* as the *vṛtti*) and in *kār* 73a (*vṛtti* reading as *vācyā vaktavyāḥ*), *kār* 80c (*ojaḥprakāsakāirvarnaiḥ*)

The present edition notes within brackets the sources cited *verbatim* for the *vṛtti* In case where the *Kāv pr vi* has pointed this out, we have not shown the source in the body of the text The solitary instance of *kār* 29, which is VI 15 (G O, S edition) of the *Nāt śāstra*, is not so shown here, for the idea has been to keep the *Kāv pr* text directly as the handiwork of the author

In the case of the illustrations we have identified them as far as that is possible in the present state of our knowledge At least 120 more illustrations are here identified for the first time than in Jhalkikar's edition where about 240 illustrations are identified (including some that are wrong or objectionable identifications) We have not indicated any anthology (excepting the socalled *Kav vac sam* which is now known to be the *Subhāsitaratnakosa* of Vidyādhara (about 1100 AD), in our reference. None of the other anthologies can be included, as they are later than *Kāv pr* In the case of the *Mahānātaka*, which as we have shown, in *A Clue to the Mahānātaka Problem* (*I HQ* Vol XI) is really a compilation which cannot date earlier than the tenth century and which has been interpolated in subsequent times, we have included it only for verses used by Bhoja who was older than Mammaṭa About 100 illustrations are improvisations (e g v 155, 161, 170, 174, 180, 184, 185, 209, 390, 391, 392, 393, 397, 398, 402) We are left with a little more than 120, quite a good many of which will, it is hoped, be located when the

Śr pr of Bhoja, itself an encyclopaedia of citations and more of classical works, esp dramas, are available in print

As to the Prakrit verses, every one of which is noted in Weber's *Gāhāsattasaī*, a few are not identifications at all from the *Kāv, pr* text point of view, We have included these latter with a query Some are traceable from other works such as the *Visamabānalīlā*,, the *Vajjalaggā* The rare *Gāhākosa* can be used by scholars but with little of substantial help and a good deal of caution Śrīdhara himself has added some to these Prakrit illustrations of the *Kāv pr*, in one or two of which he has given the reference As to the rest, they are all traceable either in the *Vya viv* or in the *Sarasvatīkanthābharana*

As to the abbreviations used In the text of the *Kāv pr vi* as printed here, the bracket sign ( ) shows an emendation, the sign [ ] shows an insertion,* as in the first two forms is meant to indicate foot-notes for variants in readings But this last had to be abandoned because of practical difficulties As for those in the body of the text noted as references they are generally in Devanagri type and are noted in the *parisista* (i-vi) Those in the introduction are shown in their Roman forms, and are enlisted at the very beginning (pp iii-iv) Some amongst such may have escaped our notice, but, it is hoped they will not cause any difficulty Occasionally there are references to research journals in the *tippanī*

At the end of the text (in the second vol) will be found eight appendices, all printed in Devanagri App A gives the alphabetical index of verses in the *Kāv pr*, where unindentified verses will be marked out from the rest by suitable marks App B will contain a list of authorities alphabetically arranged (*pramānoddhrti*) under the two heads of authors and works actually cited in the *Kāv pr* App C will contain a similar list of passages in the *kār or vrtti* text derived from earlier *alankāra* works (*smaryamānāni pramānāni*) It is apprehended that certain passages have escaped our notice, though we have taken all care to be exhaustive. App D will contain the alphabetical list of the extra verses cited by Śrīdhara in the *Kāv pr vi* In App E will be enlisted the *nyāyas* or maxims which Śrīdhara in the characteristic traditional manner of a commentator has used from different branches of literature In App F

will appear an alphabetical list of works and authors of *alankāra* cited by Śrīdhara, and in App G of such from other *śāstras* of which, it is likely, some popular works of Śrīdhara's time, have been out of vogue (viz p 180, fol 206) App H will be an index of important technical words in the *Kāv pr* and in the *Kāv pr vi* with references to pages in the printed edition for their elucidation

A word or two is necessary about the *tippanī* supplied by the editor It is meant, as noted in its introductory verses, as supplement in agreement with the matter of, but not treated in, Śrīdhara's commentary This filling up of gaps (*adhyāhāraprapūrti*) is an imperative necessity, for the *Kāv pr vi* is a very learned work The *tippanī* is fashioned on traditional lines (*pracīnocitavartmanā*), while at the same time, it has taken note of observations (*ukti*) and principles (*yukti*) of modern criticism as well as of the investigations of *alankāra* researchists (*navinonmesamūrti*) which have appeared in modern integrated contributions or in research journals for over the last fifty years The editor has been careful enough not to reduplicate matter which he had covered in his editions of other *alankāra* texts, the *Muktāvalī* on the *Al kaustubha* of Kavi-Karnapūra, the *Sanketa* (in English) of Rucaka and the *Kāv pr dīp* of Candīdāsa, or in his research papers to which references only are given It has been written in Sanskrit, partly, to meet the demands of the growingly wider circle of indigenous scholars who are interested in knowing the formative tendencies of the *śāstra* crystallised in *nibandha* works which they have to teach, and partly by virtue of necessity, for Sanskrit is the best medium for such an undertaking The university students, some of whom may engage themselves in intensive study and in research on *kāvyas* and on *alankāra* literature, will, it is hoped, find much of inspiration and guidance from the *tippanī* A genuine historic study of the *alankāraśāstra* which is vast in expanse and is, at the same time, profound in content is only possible when one takes to old texts and that in the old traditional method, and weighs them in the balance of comparative assessment which the *tippanī* is designed to encourage and foster

Corrigendum Through sheer oversight it has been noted (*intro* p v) that two of the leaves of mss. 'ka' are wrongly marked. Actually one (fol 89) is over-marked, in the case of the other (fol

21.) the marking is all right This leaf has been missing since the transcript copy was made by the editor several years ago Thus the total number of leaves is not 219 (221—2) but 220 (221—1) The text in the missing leaf has been prepared on the basis of the 'kha' manuscript only In the page lxiv in the last paragrah 102 should be read for 120, 298 for 240, and 28 should be inserted just after . 'including some', so in page vii in the last but one line Sam 291 should be read for Sam 219 In page xxvii the foot-note numberings in the body should be shown as 35, 36 and 37 respectively

A S Govt Colln Mss 4739 fol 11a

A S 111-C-116, fol 47a

काव्यप्रकाशः

(अथ प्रथम उल्लास·)

ग्रन्थारम्भे विघ्नविघातनाय समुचितेष्टदेवतां परामृशति—

नियतिकृतनियमरहितां ह्लादैकमयीमनन्यपरतन्त्राम् ।

नवरसरुचिरां निर्मितिमादधती भारती कवेर्जयति ॥१॥

काव्यप्रकाशविवेकः ॥

गजाननमदास्वादमाद्यन्मधुकरध्वनि ।

मुदेऽस्तु द्योतयन्ननन्तरनन्तरससम्पदम् ॥

रसनासु सता नित्य नृत्यन्ती भाति भारती ।

या वशीकुरुते विश्वमसीमगुणभूषणै ॥

सदाचारानुमितवेदबोधितविधेयभावो नमस्कार शास्त्रारम्भे करणीय इत्यभिप्रेत्याह वृत्तिकार —**ग्रन्थारम्भ** इति। प्रारिप्सितग्रन्थपरिसमाप्तिकामोऽत्राधिकारी, नियमेन तदारम्भेऽनुष्ठीयमानत्वात्। तत्र **विघ्न·** प्रतिबन्धकदुरितसद्भावो निर्वर्तकसुकृतविरहो वेति द्विविध । तत्(द्) **विघातायेति**। अभीष्टदेवता चाधिकृताऽनधिकृता चेति द्विविधा। अनयोश्चाधिकृताया प्रतिपत्तिर्गरीयसी। यथा चात्र प्रकृते वाङ्मयेऽधिष्ठातृतया च समर्थत्वेन च भगवती कविभारत्यधिक्रियते नैवमन्या, तत्प्रसादनिधेय (? विधेय)-वाग्वैभवो ब्रह्मादि । अत सैव स्तोतुमर्हतीत्याह—**समुचितेति**। **परामृशति** नमस्क्रिया-विषयत्वेन स्मरतीत्यर्थ । **नियतिः** कर्मापरपर्याया सर्वोत्पत्तिमन्निमित्तम्, तत्पारतन्त्र्याक्रान्तवैचित्र्यमिद ब्रह्मस्वरूप-(?) मवतिष्ठते। न चाय **नियम** कविवाचि, वक्रोक्ती(क्ति)नाऽलौकिकब्रह्मतत्त्वे विपर्यासप्राचुर्यात्। (2a) तदाह— विसमट्ठिअं व दीसइ

नत्वा गिरा गिरा सारे **प्रकाशे**ऽन्वयनर्मणा ।

विवेकलक्ष्यमालक्ष्य प्राचीनोचितवर्त्मना ॥

उक्तिभिर्युक्तिभि साक नवीनोन्मेषिमूर्तिभि ।

विवृति सुवृति क्लृप्ता साध्याहारप्रपूर्तिभि ॥

नियतिशक्त्या नियतरूपा सुखदु खमोहस्वभावा परमाण्वाद्युपादानकर्मादिसहकारिकारणपरतन्त्रा, षड्रसा, न च हृद्यैव तैः, तादृशी ब्रह्मणो निर्मितिर्निर्माणम्। एतद्विलक्षणा तु कविवाङ्निर्मिति। अतएव जयति। जयत्यर्थेन च नमस्कार आक्षिप्यते, इति तां प्रत्यस्मि प्रणत इति लभ्यते।

वितहट्ठिअं व पडिहाइ'[1] (गउडवहो ६६) इत्यादि। जगन्मूलकारण प्रकृति पुरुषेतर पदार्थराशिस्त्रैगुण्यात्मक इति साङ्ख्या। तस्याश्च बुद्ध्यहङ्कारादिपरिणताया सुखदु खमोहात्मनो गुणा।* तथा ह्युक्तमेव "कामिनीशरीर सम्प्रयुक्तवियुक्तप्रार्थ्यमानाना सुखदु खमोहानुदया (भवो ?) दया(?) द्व्यक्तमेतत्त्रैगुण्यात्मकतया निश्चीयते" (यो सू तत्त्ववैशा ४।१५ द्र)[2]। एतेन सर्वे भावा व्याख्याताः। भारतीनिर्मितेस्तु सुखैक स्वभावत्व(त्व) लोकोत्तरचमत्कारमाररसास्वादविश्रान्ताया हृदयसुखसवादप्रवणत्वात्। 'गुरुपरतन्त्र[त]ये'ति -+ वत् परतन्त्रशब्दोऽयमायत्तवाचीति न पुनरुक्तम्[3]। परमाणुद्व्यणुकादीनामुपादानकारणता। कर्मादीना सहकारिता। **कविभारती** चैतन्नापेक्षते, प्रतिभामात्रप्रभावादेव तस्या सद्भावात्। तथाचोक्तम्—

---

1 मुद्रित 'गउडवहो' पुस्तके 'ठिअमट्ठिअ दीसइ अठिअ वि तहट्ठिअ व पडिभाइ' इति पाठो दृश्यते। कविप्रजापते सृष्टिविषये स्वातन्त्र्य चित्रकाव्यविचारावसरे "अपारे काव्यससार" इत्याद्यभियुक्तोक्तिप्रामाण्येनेतरत्र "अतहट्ठिए वि तह सठिए व्वे" त्येतदनुरूपगाथोद्धारेण च प्रतिपादितमाचार्यानन्दवर्धनेन।

* आदर्शपुस्तकेऽग्रिमवाक्यीयात् 'मूलकारण प्रकृति'रित्यशादर्वागेव 'तस्याश्च परिणताया पुरुषेतर •इति साङ्ख्या' इति, ततश्च 'सुखदु ख गुणा' इत्यसमप्राय सन्निवेशो लभ्यते।

2 एवमेव 'वस्तुसाम्ये चित्तभेदात्तयोर्विभक्त पन्था' इति पातञ्जलयोगसूत्रोपरि (४।१५) 'अस्ति हि रक्तद्विष्टविमूढमध्यस्थानामेकस्या योषिति प्रतीयमानायां या त्वया दृश्यते सैव मयाऽपीत्यपि **मिश्राणां** विवृति।

+ (नवम उल्लासे काकुवक्रोक्त्युदाहरणे)

3 "अनन्यपरतन्त्रे"त्यत्र पुनरुक्तवदाभास इत्याशयष्टीकाकृताम्। "परतन्त्रशब्द एवायत्तवचन इति कश्चिदि"ति **प्रदीप**कृत श्रीधर तदनुगामिनमपर क वोद्दिश्य कटाक्षेणास्वरसतासूचनम्। न तदतिमनोज्ञम्। युक्तिस्तूपरि "गुरुपरतन्त्रतये"त्यश एवोट्टङ्किता।

इहाभिधेयं सप्रयोजनमित्याह—

काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये ।
सद्यः परनिर्वृतये कान्तासम्मिततयोपदेशयुजे ॥२॥

द्वे वर्त्मनी गिरो देव्या शास्त्रञ्च कविकर्म च ।
प्रज्ञोपज्ञं तयोराद्यं प्रतिभाभवमन्तिमम् ॥ इति (का कौ)

शान्तो नवमः स्थापयिष्यत इति शृङ्गारादयो **नव** काव्य**रसाः**। मधुराम्ललवणतिक्तकटु-कषायका षड् द्रव्याश्रिता इति लौकिकाः। **न चेति**—तिक्तादयो हि न हृद्याः। ननु नमस्कारे कर्तव्ये किं (2b)-मिदमुत्कर्षाभिधानम्? अत आह—**जयत्यर्थेन चेति**। समस्तगीर्वाणविलक्षणजगन्निर्माणनिपुणब्रह्मप्रतियोगिकेन जयेनार्थसामर्थ्यान्नमस्यताऽऽक्षिप्यते, तस्याश्च तथा विशेषिताया प्रकृतवक्तृकर्तृकतात्पर्यावसानादिति। तदिह प्रतियोगिक-वाङ्मयानुल्लेखाद्व्यतिरेको नामालङ्कारो, जयत्यर्थबलेन च नमस्काररूपं वस्तु, तद्देवता-विषया च रतिरलक्ष्यक्रमा ध्वन्यत इति त्रैविध्यमनुवक्तारो निरस्तपर्यास्तः (? निरस्ताः परास्ताः) इत्याचार्याः[4]। रसशब्दे श्लेषश्च।

यद्यप्यत्राभिधेयं प्रेक्षावत्प्रवृत्तौ साक्षान्न निमित्तं तथापि प्रयोजनवत्काव्याङ्गतया तदपि तथैवेत्याशयवानाह—**इहेति**। एतेनाभिधेयग्रन्थयोर्वाच्यवाचकभावोऽभिधेयद्वारा ग्रन्थस्य गौणमुख्यप्रयोजनाभ्यां कार्यकारणभावलक्षणश्च सम्बन्धः प्रदर्शितः। [**अर्थकृत** इति]-कृते इत्यव्ययं तादर्थ्ये, अर्थायेत्यर्थः। अथवा करणं कृत्। विद्याभूमीत्यादावन्थ (? वर्थ) लक्षण-(वात्स्या का सूत्र १।२।६)[5] सूत्रे पुरुषव्यापारसूचनार्थमर्जनवर्ज(? र्ध)न-

---

4 "त्रिधा ध्वनिरत्र श्लोकेऽस्मद्गुरुभिर्व्याख्यात' इति ध्वन्यालोकाद्यश्लोकीय-टीकारूपं लोचनग्रन्थमनुसरता गड्डलिकाप्रवाहपतितानाम् "अनुवक्तार" इति-विशेषणविशेषितानामुपरि केषां प्राक्तनटीकाकृतां टीकाकृत उपाध्यायस्य वा दौर्मनस्यसूचनपरं मन्तव्यमिदम्।

5 "विद्या-भूमि-हिरण्य-पशु-धान्य-भाण्डोपस्कर-मित्रादीनामर्जनमर्जितस्य विवर्धन-मर्थः" इति वात्स्यायनसूत्रेण "अध्यक्षप्रचारा"दित्याद्यनन्तरसूत्रे साभिप्राय सूचनमर्थशास्त्रेऽर्थलक्षणस्यानिर्देशविषयकम् "अर्थश्च राज्ञस्तन्मूलत्वाल्लोकयात्रायाः" "पुरुषकारपूर्वत्वात् सर्वप्रवृत्तीनां"मिति सूत्राणि तत्रत्यानि चात्र स्फुटं परामृष्टानि।

कालिदासादीनामिव यश., श्रीहर्षादेर्धावकादीनामिव धन, राजादिगतोचिताचारपरिज्ञानम्, आदित्यादेर्मयूरादीनामिवानर्थनिवारण, सकलप्रयोजन मौलिभूत समनन्तरमेव रसास्वादनसमुद्भूत विगलितवेद्यान्तरमानन्द प्रभु

ग्रहणात्तदनुसारेणैवमुन्नेयम् । एतेन (नेन) ग्रन्थकर्तुश्चतुर्वर्गनिर्वाहरसिकताऽपि (र्धाऽर्थनिर्वाहरसिकताऽपि)[6] सम्पद्यत इति । **यशस** इति स्पष्टत्वाद्दृष्टान्तमात्र माकाङ्क्षितमाचष्टे—**कालिदासादीनामिवे**ति । एवमुत्तरत्र । **व्यवहारपद** विवृणोति **राजादी** (3a)ति । आदिपदात् कोषजनपददुर्गादीन्यष्टादश तीर्थानि[7] । **निर्वृति-**

6 तेनेति सामान्येनावापरूपेणेहेत्याद्यवतरणिकाया मूलस्थाया भामहादिप्राचीनालङ्कारिकस्वरसत'श्चतुर्वर्गफलप्राप्ति' रित्यादि तत्तत्कारिकया "अस्य ग्रन्थस्य काव्याङ्गतया काव्यफलैरेव फलवत्त्वम्" इति चूर्णकगर्भया साहित्यदर्पणादौ यदुपस्थापित तस्यात्रोन्नयनम् । रसार्णवालङ्कारे (मु पु ४।५०) ऽर्थविवेचनप्रसङ्गे 'पुरुषार्थप्रभेदेन स चतुर्धा स्मृतो बुधै'रिति निर्देश एतदनुकूल एव । यदि तावत् कारिकाग्रन्थस्यैव विवरणत्वेनात्र निर्बन्धस्तदा यशोऽर्थ शिवेतरक्षति परनिर्वृतिरिति चतुष्क यथाक्रम कामार्थधर्ममोक्षप्रतिरूपकतयैवाक्षिप्यते । व्यवहारवित्त्वस्यार्थ एवान्तर्भाव । एवमेव चतुर्धानिर्वाहकता स्यात् । परमादर्शपुस्तकपाठतोऽर्थस्यार्जने चतुर्धा चेष्टा (विद्याऽऽदीनामुपायैरधिगतिरवन वर्धन सम्प्रयोगस्तीर्थेऽप्यर्थोऽयमुक्त' इति) याऽर्थ**शृङ्गारप्रकाशे** भोजेन विवृता सा नात्रोद्दिष्टेत्यभिधानमपि साहसिक्यम् ।

7 एतानि कौटिलीयार्थशास्त्रसम्मतानि परमितरथोद्दिष्टानि (१।१२।८ २२, Jolly's edn) आदिकविनाऽयोध्याकाण्डे परामृष्टानि (१००।३६) रामायणतिलके च विवृतानि । आदिपदलभ्यानि चार्थशास्त्रे स्तम्भकोषसङ्गवर्गाध्यायप्रसङ्गोपरि (८।४।४४, ४५, ४६, ६२, ७१) नयचन्द्रिकाटीकाया विवृतितो नाभिन्नानि श्रीधरकृतोद्देशानीत्यतो न पुरुषमाश्रयन्तीत्यापातत प्रतीयते । तीर्थपदस्य विभिन्न स्वरूपसूचन टीकाकृद्भिर्विहितमिति सम्भाव्यते । तद्यथा शिशुपालवधटीकाया (२।१११), "तीर्थानि विप्रश्रमणादिविशेषा" इति वल्लभो, "मन्त्राद्यष्टादश ('मन्त्र्याद्यष्टादश' इत्येव पाठ साधीयान्) स्थानानीति मल्लिनाथ । एव रघुटीकाया सञ्जीवन्यामपि (१७।६८) ।

सम्मितशब्दप्रधानवेदादिशास्त्रेभ्य सुहृत्सम्मितार्थतात्पर्यवत् पुराणादीतिहासेभ्यश्च शब्दार्थयोर्गुणभावेन रसाङ्गभूतव्यापारप्रवणतया विलक्षण यत् काव्य लोकोत्तरवर्णनानिपुणकविकर्म तत् कान्तेव सरसताऽऽपादनेनाभिमुखीकृत्य

पदार्थमाह—**आनन्दमिति**। अत्रैव **परत्व** योजयति **सकलेति**। सुखत्वाविशेषे कथ **मौलित्व**(मौलिभूतत्व)—मित्याह—**विगलितेति**। ब्रह्मास्वादसोदरस्य वैषयिकसुखविलक्षणत्वमुपपन्नमिति भाव। अत्रैव **रसास्वादने**त्यादिना बीजमाह। **समनन्तरमिति सद्य** शब्दार्थकथनम्। तदेतत् काव्यस्वरूपोपायवैलक्षण्यादिव्यवेच्य मुख्यतया प्रथमोपात्तमपि **काव्य**पदमिदानी व्याचष्टे—**प्रभुसम्मिते**ति।[8] यथा प्रभुरेव कुर्विति भृत्यमादिशति तथा श्रुतिस्मृत्यादयोऽपि पुरुष नियोजयन्ति। स च पुरुष इष्टसाधनतामनालोच्यैवाज्ञामात्रपरतन्त्रस्तत्र प्रवर्तते, निमित्तनैमित्तिकादीनामिष्टसाधनतामन्तरेणैव शब्दमात्रबोधितत्वात्। एव कार्यत्वादत एव शासनादन[र्था]न्तरत्वाच्छास्त्रपदेनामीषामुपादानम्। पुरावृत्ताख्यान**मितिहासः**। तस्य **पुराणादय** पञ्चलक्षणत्वादिभिरन्योन्यव्यावृत्ता प्रकारा। अस्येद वृत्तम् अमुष्मात् कर्मण फलमित्येव युक्तियुक्तसम्बन्धप्रकटनकारित्वादेषा हितसाधनलक्षणेऽर्थे भरो न तु नियोजने, अतएव च सुहृत्तुल्यता। सुहृदो हि प्रभुवन्न सुह (3b)द नियोजयन्ति, अपि तु बोधयन्ति। स च तमर्थमवधार्य श्रेय साधनतया स्वयमेव तत्र प्रवर्तते। तदेतत् प्रकारद्वय काव्ये नास्तीत्याह—**शब्दार्थयो**रिति। **गुणभाव** एव कथमित्याह—**रसाङ्गभूतव्यापारे**ति। [**व्यापारो**]रसाना निमित्तभूतविभावादिसयोजना। [तदुक्त] **हृदयदर्पणे**—

> शब्दप्राधान्यमाश्रित्य तत्र शास्त्र पृथग्विदु।
> अर्थे (अर्थ-) तत्त्वेन युक्ते तु वदन्त्याख्यानमेतयो।
> द्वयोर्गुणत्वे व्यापारप्राधान्ये काव्यगीर्भवेत्॥ इति

तदित्थ लोकशास्त्रवचनातिशायिताऽस्य स्फुटेत्याह—**विलक्षण**मिति। **यदि**ति प्रसिद्धिमवद्योतयन्ननिदप्रथमतामभिप्रैति। तत्र प्रमाणमाह **लोकोत्तरेति**। यदि काव्यनामक

---

8 अत्र मूले वृत्तिग्रन्थो हृदयदर्पणोद्भावित ध्वन्यालोकलोचने—(१२ पृ)ऽनूदित काव्यवैशिष्ट्यमुररीकृत्यैव सुस्थित इत्यन्यत्रोद्धृतात् हृदयदर्पणसन्दर्भात् प्रतीयते।

रामादिवद्वर्तितव्य न रावणादिवदित्युपदेश च यथायोग कवे· सहृदयस्य च करोतीति सर्वथा तत्र यतनीयम् ॥

एवमस्य प्रयोजनमुक्त्वा कारणमाह—

शक्तिर्निपुणता लोकशास्त्रकाव्याद्यवेक्षणात् ।
काव्यज्ञशिक्षयाऽभ्यास इति हेतुस्तदुद्भवे ॥३॥

कर्मविशेषो न स्यात्[9] तदाऽयमादिकवे प्रभृति प्रतायमान काव्यव्यवहारो न स्यादित्यर्थ । तथा चोक्त **काव्यकौतुके—**

प्रज्ञा नवनवोल्लेखशालिनी प्रतिभा मता ।
तदनुप्राणनाजीवद्वर्णनानिपुण कवि ।
तस्य कर्म स्मृत काव्यम्

इति ।

उपदेशश्चे(श्चे)ति—चकार पूर्वोक्तसमुच्चये । उपदेशस्वरूपमाह—**रामादिवदिति** । इष्टानिष्टफलस.धनयो प्रवृत्तिनिवृत्तिव्युत्पादनयोर्व्युत्पत्तिरित्यर्थ । तत्र वेदादिषू-(4 a)पदेशदिशि निविशमानेषु कि काव्यप्रणयनपरिश्रमाश्रयेणेत्यत आह—**कान्तेवेति** । मरसताऽऽपादन साधारणो धर्म । या हि का (क) प्रति जीवितमर्वस्वायमाना सा तस्य कान्ता । तेन मा यथा परिशीलनमात्रात् सरसीकरोत्येवमेव श्रुतावागतमात्र काव्य विभावादिमम्पदमर्पयति । रसाविष्टचित्ततया सुकुमारमतीनामपि सुकर व्युत्पत्त्याधानमि [त्यर्थ इ]ति भाव । **यथायोग**मिति—यशोऽर्थश्च द्वयोरपि । व्यवहारज्ञान सहृदयस्यैव, न कवे । अन्योन्याश्रयप्रसङ्गादशिवक्षतिरुभयोरपि । परनिर्वृत्युपदेशौ सहृदयस्यैवेति । ननु भावयत कवेरप्यस्ति निर्वृति , सत्य , किन्तु तदानीमसावपि सहृदय एव । अन्यद्धि कवित्वमन्यद्धि महृदयत्वम् । यदाह—सरस्वत्यास्तत्त्व कविसहृदयाख्य विजयते । (ध्व आ लो प्रस्तावनाश्लोके) ।

---

9 अत्र "भट्टनायकाभिप्रायेणेदमूचे न स्वाभिप्रायेण"ति माणिक्यचन्द्रकृत**सङ्केते** नानर्थकमाघोषणम् । 'तस्य कर्म स्मृत काव्य'मिति **काव्यकौतुको**द्धृतिरप्यप्रे स्मरणीया । व्यापारस्य प्राधान्यख्यापन न नव्यमतोपयोगि । वस्तुतस्तु **काव्यप्रकाश**ग्रन्थे क्वचित् क्वचित् परमत परवचनञ्च स्वाभिप्रायविरुद्धमप्यप्रतिषिद्ध सङ्कलितमिति न तिरोहित प्रेक्षावताम् ।

शक्ति कवित्वबीजरूप संस्कारविशेषो यां विना काव्य न प्रसरेत् प्रसृत वोपहसनीय स्यात्। लोकस्य स्थावरजङ्गमात्मकलोकवृत्तस्य। शास्त्राणां छन्दोव्याकरणाभिधानकोषकलाचतुर्वर्गगजतुरगखड्गादिलक्षणग्रन्थानां,

---

अग्रिमकारिकासङ्गतिमासूत्रयति—**इति सर्वेषे**ति। एव नाम कीर्त्यादिनिदानतया दृष्टादृष्टफल काव्यम् अतस्तन्निर्माणनैपुणगुणप्रणयिनाऽवश्य भाव्यमिति प्ररोचितस्यो-(स्यो)-पायजिज्ञासाया तत्प्रदर्शन भविष्यत्कारिकायामिति **शक्ति**रिति—अक्लिष्टानेकपदार्थ-ज्ञान शक्ति(4 b) स्तस्यां प्रमाण माह—**यां विने**ति। शब्दार्थरचनायुगलस्य समुल्लास प्रसरणम्। अग्राम्यत्वमनुपहास्यता, तदुभयमपि कार्यरूप न हेतुना विनाऽऽत्मानमाप्नुया-दिति भाव, अतएव व्यतिरेकमुखमुपन्यास। कवित्वबीज प्रतिभानमात्मगत (गत) सस्कारविशेष, तत्र शक्तिपद (द) सहचरविप्रकर्षात्। एव निर्दोषताऽऽदिविशिष्ट-शब्दार्थपरोऽपि **काव्यशब्दो** वृत्तौ शब्दार्थमात्रवचन उपचारात्। वर्णनीयसमस्तवस्तु-पार्वापर्यपरामर्शकौशल **निपुणता** युक्तायुक्तविवेक इत्यर्थ। सैवान्यत्र व्युत्पत्ति पदेनोक्ता[10]। तस्या कारणत्वमाकाङ्क्षितमिति सूत्रे सहेतुकाया उपादान, तदेतद् व्याचष्टे—**लोकस्ये**ति। **विमर्शनादि**ति सर्वत्र सम्बन्ध। लोक्यते लोकयतीति [च] **लोक** स्थावरजङ्गमात्मा। [तत्राद्य] तरुमहीधरादि, द्वितीय गोमहि[षा]दि। **लोक**शब्द-स्यात्र **वृत्त**परत्वं वर्णनीयानन्त्यख्यापनार्थम्, अन्यथा स्थावरजङ्गमात्मनो लोकस्यादिकविनैव वर्णितत्वात् काव्यपरिसमाप्तिरेव स्यात्[11]। अतएव **वामनो** (का सू १।३।२) "लोकवृत्त लोक" इत्युक्तवान्। तदेतद्व्याचष्टे—**लोकवृत्तस्ये**ति। शास्त्राणि काव्याङ्गोपदेशकानि। वाचा श्रव्योसर्वो-(त्सर्गो)-ऽवच्छेद (5a)-श्छन्द, अनवच्छिन्नाया वाच काव्यशरीरेऽ[न] न्तर्भावात्। वृत्तगन्धिचूर्णकोत्कलिकाप्रायमयतयाऽध्यासितत्रैविध्ये गन्येऽपि (गद्येऽपि) पद्यवदवच्छेदविशेषोद्भवैव [चा]रुता [स-]हृदयाना विद्योतत इति च्छन्द पदमाह्लादवच्छेदो-पलक्षणप्रतिपादकपरम्, ह्लादनार्थेन च्छदिना च्छन्द शब्दस्यानुशासनात्। प्रथममवच्छिद्य पश्चादावापोद्वापाभ्या पदानि निस्तरङ्गतामानीयन्त इति च्छन्द प्रथममनुसन्धेय, तत

---

10 यथा "अव्युत्पत्तिकृतो दोष शक्त्या सव्रियते कवे" रित्यालङ्कारिकमूर्धन्यानन्द-वर्धनाचार्यवचने।

11 रुचककृतकाव्यप्रकाशसङ्केतग्रन्थस्य (२१) प्रतिध्वनिरयम्। सर्वमेतत्-"वाल्मीकिव्यतिरिक्तस्ये"त्यादि (४।७) ध्वन्यालोकीयसत्क्षेपवचनेनावधारितम्।

काव्यानाञ्च महाकविसम्बन्धिनाम्, आदिग्रहणादितिहासादीनां च विमर्शनाद्व्युत्पत्तिः। काव्य कर्तुं विचारयितु च ये जानन्ति तदुपदेशेन करणे योजने च पौन.पुन्येन प्रवृत्तिरिति त्रय' सवलिता न तु व्यस्तास्तस्य काव्यस्योद्भवे निर्माणे समुल्लासे च हेतुर्न हेतव ॥

स्वरूपारोपेण यथार्थविशेषानुसरणम्, अनन्तर विभावादिसम्पत्प्रवणत्वचिलणमिति क्रमेण व्याकरणादीनामुपन्यास । बहिरङ्गानि चतुर्वर्गादिशास्त्राणीति [वि आ] पश्चात् क्रियन्त इति [**व्याकरण**] त्रिमुनिप्रणीत शब्दानुशासन शब्दशुद्धिद्वारेणोक्तम् **अभिधान कोषो**ऽर्थविशेषनिश्चायकताद्वारा, इतरथा तद्विपर्यासे दोष स्यात्। तद्यथा "नीविराग्रथन नार्या जघनस्थस्य वासस" इति **नाममाला**प्रताकमपश्यत कस्यचित् (का अ सू ग्र १।३।५) "नोविबन्धस्त्रिभुवनगुरोर्गोपवेशस्य भूया"दिति। कलेत्यादौ **लक्षणग्रन्थ**शब्द प्रत्येकमन्वीयते। गीतनृत्यादिका चातु षष्टिकी **कला**। इयञ्च विभावादिरूपतया प्रत्यासन्नतरा काव्यात्मन। अस्याश्च शास्त्राणि **दत्तिल (दत्तक) वि** (5b) **शाखिलादि**भि राचार्यैरखिलानि प्रणीतानि ग्रन्थगौरवभिया चात्र न प्रतन्यन्ते। एव धर्मादि शास्त्राणामप्युपयोग उन्नेय। **काव्याना**मिति—अयोनिजसिद्धिस्तथासति प्रभवतीति तात्पर्यमयोनिजप्रकृतिपुरुषापरपुरप्रवेशाखण्डमहात्म्य (माहात्म्य)-तूलिकापरिमलभेदात् पञ्च धा विभक्त **रसार्णवे**। [12]**इतिहासादीना**मिति—उक्तञ्च

न स शब्दो न तद्वाक्य न सा विद्या न सा कला।
जायते यन्न काव्याङ्गमहो भारो गुरु कवे ॥ (हृ द) इति,

अतएव पुराणधर्मशास्त्राद्यष्टादशविद्यास्थानाना मध्ये काव्यस्योट्टङ्कनमनालोकयन्त सूक्तिमालत्वात् कलैकदेशतामस्याभिदधाना अनादरणीया एव। नह्नीन्द्रियग्रामाणामन्तरन्त करण

---

12 अत्र प्रकाशवर्षकृतो **रसार्णवालङ्कार** उद्दिष्ट इति सम्भाव्यते। ध्वन्यालोकेऽपि चतुर्थोद्यते विषयस्यास्य सूचनम्। प्रपञ्चस्तु राजशेखरकृताया काव्यमीमासाया क्षेमेन्द्रकृते कविकण्ठाभरणे (२य सन्धौ) च। उपर्युद्दिष्टसंज्ञास्तु तद्ग्रन्थत क्वचित् क्वचिद् विलक्षणा एव। मुद्रिते (I H Q vol V) रसार्णवे नास्यादर्शन विप्रतिपत्तिकर यतः खण्डितोऽय ग्रन्थस्यादर्श। यथास्थान प्रकरणस्यास्य प्रवेशो नासम्भवीति युक्तिरप्यस्ति। सा यथा (समुद्दिष्टस्य काव्यस्ये)ति (२।१ मुदित रसार्णवे) परामृष्ट विवेचन मुद्रितग्रन्थे नोपलभ्यते।

न गण्यत इत्येतावता तस्याप्राधान्यमर्वाक्(ग्)दृशोऽपि केचन मन्यन्ते, तन्मध्यापरिगणनस्य प्रत्युत तत्प्रकर्षातिशयनिमित्तत्वात्। एवञ्च "कवित्ववक्तृत्वफला सरस्वती"-[13](का व सा) त्येवमादिप्रयोगेषु कवित्व[पद]स्य पूर्वनिपातो नाल्पाक्षरत्वनिबन्धन कि तर्हि ? अभ्यहितता-निमित्तक इत्यवगन्तव्यम्। चतुर्वर्गव्युत्पत्तिफलता च काव्यस्य स्फुटे(टै)व। ननु काव्यात्त्रिवर्गनिष्पत्ति स्यात्, ननु मोक्षो (न तु मोक्षो), यदत्र शृङ्गारेण प्रत्युत दोषकारिणी वाग्वृद्धि (रागवृद्धि) (6a) क्रियत इति चेत्, उक्तमत्र **भट्टतोतेन—**

विषयाभावतो नात्र रागस्याभ्यासगाढता।
स्थायी चेद्विषयो नैवमास्वादस्य म(स) गोचर ॥
आस्वाद एव रागश्चेन्न रागो योषिदास्पद।
कार्यात् कारणदोषश्चेत् कि सीता त्रिषयो(?)द्वयो ॥ इत्यादि

अन्यच्च— यथाऽऽदर्शान्मलेनैव मलमेवोपहन्यते।
तथा रागावबोधेन पश्यता शोध्यते मन ॥

अन्यच्च— सर्वाङ्गानुप्रवेश स्यात् सजातीय विना कुतः।
अतो भोग्योपदेशेऽस्मिन् भोगेष्वेवादरो मुने ॥ इति

अतएवाहु — धर्मार्थकाममोक्षेषु वैचक्षण्य कलासु च।
करोति कीर्ति प्रीति च साधुकाव्यनिबन्धनम् ॥ इति
—(भा का अ १।२)

विमर्शनाद्युत्पत्तिरिति—एताभ्यां सौत्रे **निपुणभा (ता)ऽवेक्षण**पदे व्याख्याते। **काव्यं कर्तुं विचारयितुञ्च ये जानन्ति ते** द्वये कविसहृदयाः काव्यज्ञा, तेषां **शिक्षा** उपदेशस्तेन पौन पुन्येन प्रवृत्ति**रभ्यासः**। व्याख्याद्वयप्रयोजनमाह—**करणे (प्र)योजने चेति**।

---

13 "आसीत् कवित्ववक्तृत्वफला यस्य सरस्वती"ति विवेकीयपद्यं **न्यायमञ्जरीकर्तु**-र्जयन्तभट्टस्य शक्तिख्यापनाविशेषणार्थं तत्सूनुनाऽ**भिनन्देन** प्रयुक्तम्। अभिनन्द-पक्षेऽप्येतद्दृढतर ख्याप्येत यथाऽऽह स स्वयमेव तत्कृते लघुयोगवाशिष्ठे (४५।१) 'वादी वाग्मी कविश्चाय'मिति। श्रीकण्ठचरित (२५।१२६) कर्तु**र्मङ्खकस्य** पृथ्वीराजविजयकर्तु**र्जयानकस्य** (१।११) च रचनाया लक्ष्यतया लक्षणतया धर्मस्यास्य निर्देशो वरीवर्ति। कुत्रप्यावयवस्य कुत्रापि चरमावयवस्यान्वर्थ-तेति समासे पूर्वनिपातसाधकप्रयासो मुधैवेत्यभियुक्ताः।

एवमस्य कारणमुक्त्वा स्वरूपमाह—

तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापि ॥

पाको हि सन्दर्भजीवित यद-(पद)परिवर्तासहिष्णुत्वलक्षण (णम्)। (का अ सू वृ १।३।१५ द्र) अयञ्च कथमभ्यासादृते सम्भवतीति? तत् किमेते शक्त्यादयो गोमयत्वश्रिकत्वनिमित्तभूय भजन्ते? नेत्याह। **इति त्रयः समलिता** इति—अमुमेवार्थमाविर्भावयितु सूत्रे **हेतु**रित्येकवचनम्। सौत्र तच्छब्दार्थविवरणान्तरितमाह—**काव्यस्ये**-(6b)ति। **उद्भव** उत्पत्तिरुत्कर्षश्च यथा हरिपदादुद्भूता गङ्गा, उद्भूतो राजा पराज(ज्ञ)यति[च]। उभयरूपोऽप्यत्राभिमत इत्यनूद्य व्याचष्टे **उद्भव** इत्यादि। यद्यपि शक्त्यादय सम्भूय व्याप्रियन्ते तथापि यथा घटस्य मृद्रूपताया मृद उत्कट उपयोगो रेखोपरेखाऽऽदौ तु सूत्रादीनाम्, एवमिहापि धर्मिसिद्धौ शक्तेर्गुणायुत्कर्षरूपे तु सम्यगुद्भवो व्युत्पत्त्यभ्यासयोरिति।

न प्रयोजनेन विनोपायजिज्ञासेति प्राक् प्रयोजनमुक्तम् अनन्तरमशक्योपायत्वशङ्कया म(स) लक्षणम् आकाङ्क्षत इति कारणम्, अथेदानीं लक्षण वाच्यमित्याह—**एवमस्य स्वरूप**-मिति। स्वमसाधारण रूप लक्षणमित्यर्थ। **तददोषा**विति[13a]। "अनेन कल्प्यमानोल्लासदशकस्य सक्षेपेण सूत्रण कृतम्। तथा च **तदि**ति सप्रयोजनं सहेतुकञ्च सप्रभेदश्च काव्यस्वरूपं प्रथमोल्लासनिर्दिष्ट सूचितम्। **शब्दार्थौ**विति धर्मिभूतयो शब्दार्थयोर्द्वितीयतृतीयोल्लासनिर्णीतयो सूत्रणम्। अनन्तर तदित्यनेनैव सप्रभेद यत् काव्यस्वरूपमुद्दिष्ट तस्य त्रयो भेदा सप्रपञ्चमुल्लासत्रयेण प्रतिपादिता सूचिता। **अदोषा**वित्यनेन दोषाणा परिहार्यत्वेन सूचिताना सप्तमोल्लासे निर्णय। **सगुणा**वित्यनेन सूचिता (7a)ना गुणानामष्टमे प्रपञ्चनम्। **अनलङ्कृती क्वापी**ति "विशेषप्रतिषेधे शेषाभ्यनुज्ञान"मिति न्यायेनोट्टङ्कितानामुभयेषा शब्दार्थालङ्काराणा क्रमेण नवमदशमयोरुल्लासयोर्निर्णय। [एवञ्च पदपञ्चकेनोल्लासदशक (दशक) सूचित (सूचितम्)]" (रु स २ पृ)। गुणाद्युपस्कृतस्यापि दोषकलङ्कितस्यानादेयतामाविष्कर्तुं प्रथम दोषपदोपादानम्। तत्र गुणा

13a 'तददोषा' वित्यार्यापूर्वार्धमुत्तरार्धन्तु 'इदमुत्तम'मिति। एवमुत्तरत्रापि कारिकाग्रन्थ क्वचिदार्यया बहुशोऽनुष्टुभा च पूर्णतया ग्रथितोऽत्र सस्करणे सहृयया तथाऽङ्कितश्च।

दोषगुणालङ्कारा वक्ष्यन्ते। क्वापीत्यनेनैतदाह यत् सर्वत्र सालङ्कारौ क्वचित्तु स्फुटालङ्कारविरहेऽपि न काव्यत्वहानि.। यथा

य कौमारहर. स एव हि वरस्ता एव चैत्रक्षपा-
स्ते चोन्मीलितमालतीसुरभय. प्रौढा. कदम्बानिला.।
सा चैवास्मि तथापि तत्र सुरतव्यापारलीलाविधौ
रेवारोधसि वेतसीतरुतले चेत समुत्कण्ठते ॥१॥

(शीलाभट्टारिकाया —क व स ५०८)

लङ्कारयोरभेदमेव केचिदास्थिवत्(दास्थिषत)[14]दोषाणाञ्च गुणाभावव्यतिरेकम् । अत आह **दोषगुणे**ति। **वक्ष्यन्ते** परस्परासङ्कीर्णा इति शेष । निषेधमुखे[ना]लङ्कारयोगप्रतिपादनेन कि तात्पर्यमित्याह—**क्वापीत्यनेने**ति। न तु गुणेनेवालङ्कारेणापि नित्य एव योग.(ग.) पर वैदग्धीभङ्गीभणित शून्य (?)-माभासत्वात्, अत आह **स्फुटेति**। **अनलङ्कृती** इति। नञीषदर्थे। एतदुक्त भवति—उद्भूतगुणमनुद्रिक्तालङ्कारमपि काव्य चमत्कारमावहत्येव यथा प्रस्तुतोदाहरणादि। उद्भूतालङ्कारन्तु गुणहीन न स्वदते यथा नीरस चित्रादि, तत्र शब्दार्थमात्रोपकारकत्वेनालङ्काराणा व्यवस्थिते। अतएव प्राधान्यात् प्रथम गुणानामेवोद्देश।

य. कौमारहर इति[15]—अत्र तत्रस्थिताना ग्रैष्मिकधूलिकदम्बाना वसन्त उद्भिन्नाङ्कुराणा

---

14 'आस्थितस्य पर धर्मं' (भा पु १२।६०।२६) मित्यादाविव आपूर्वकात्तिष्ठते-रत्र सकर्मकत्व समर्थनीयम्। वाक्येऽवाद्ये प्रत्यशे भामहदण्डिप्रभृतीनामन्तिमे वामनीयाना परामर्श ।

15 अलङ्कारसर्वस्वे रुचकेनात्र श्लोके सन्देहसङ्कर स्वीकृत । तत्रास्फुटत्वस्याशिक्तत्वेन समग्रत्वेन वा(यथा श्रीधरालोचने) ग्रहणमित्यकिञ्चित्करम्। अलङ्कारचर्चाया विवादे श्रीधरो मम्मटपक्षमेवानुसरति। चण्डीदासश्रीविद्याचक्रवर्त्ति-प्रभृतयो बहव प्रायेण रुचकमतानुसारिण । "काशकुशावलम्बनादलङ्काराभास-सम्भावनायामलङ्कारनैयत्यपक्षनिर्वाह इत्यल क्षुल्लकाशया। कविसरम्भ-गोचराणामलङ्काराणा न कस्यचिदुपालम्भ" इति भट्टगोपालमन्तव्य समीचीनमिव प्रतिभाति। 'वैदग्धीभङ्गीभणितिरलङ्कृति'रिति **कुन्तकलक्षणे**, तत् काव्य, तद्रहित काव्याभास एव। टीकाकृताऽपि प्राग्-'वैदग्ध्य भङ्गीभणितशून्यमाभासत्वा'दित्यभिहितम्।

अत्र स्फुटो न कश्चिदलङ्कारः। रसस्य हि प्राधान्यन्नालङ्कारता। तद्भेदान् क्रमेणाह—

येऽनिलास्ते वासन्तिकमालतीपरिमलोल्लासिता इति व्याख्येयम्। (7b) एवञ्च निकुरम्बी भूता सामग्री रसोद्दीपनहेतुर्वर्णिता हेतुर्भवतीति काश्मीरका। "ये तु ऋतुभेदमिष्ट वर्णयन्ति यथा चैत्रक्षपा इति वसन्तस्य, मालतीत्यादिना च निदाघप्रावृषोर्निर्देश इति, न तै रसोद्दीपनहेतुमिलिता सामग्री व्याख्याता स्यात्। एतस्मिश्च पक्षे कदम्बानिलाना कथ मालतीपरिमलोल्लासकत्व, भिन्नर्तुभवत्वात्[16]। नापि कदम्बरूपा समूहरूपा अनिला इति शोभना व्याख्या। तस्मात् पूर्वव्याख्यानमेव साधु। **अत्र स्फुट** इति—अत्र बहूना वाक्यार्थाना तुल्यकक्षत्वेन निर्देशात्तुल्ययोगिता, औपम्यस्य चाप्रतीतेरस्फुटतेति [च] केचित्। तदसत्, वस्यचिद् गुणस्य वा क्रियाया वा साधारण्येनाप्रतीतेस्तुल्ययोगितालक्षणस्यैवाभावात्। औपम्यञ्च तुल्ययोगिताया प्राणभूत, तदभावे सैव नास्तीति कस्या अस्फुटत्वम्? एतेन दीपकमपि प्रत्युक्तम्। समुच्चयस्तु वैचित्र्यातिशयाभावान्न महद्भिः**रुद्रट**प्रभृतिभिरङ्गीकृत इति स न चिन्त्यते।

कौमारहर इति चित्रमस्फुटस्त्वमलङ्करण यैर्व्याख्यात तदपि न साधु, तस्य मुख्यालङ्करणत्वाभावात्। न तच्चमत्कारकारि आश्चर्यमात्र करोतीति नैतावता मुख्यालङ्कारक(?)त्वम्। तथा**चोद्भट**प्रभृतिभिर्न तत् स्वीकृतम्। यत् पुनरिह चित्रमन्यद्वा-(8a)ऽलङ्कारकत्वेन वक्ष्यते तदस्य ग्रन्थस्य व्यापकत्वप्रतिपादनार्थम्। तस्मादेतदपि न व्याख्येयम्। तस्माद्विक्रमेतत्। इह "य. कौमारहर" इत्यादीन्युत्कण्ठाकारणानि, तेषु सत्स्वपि सा नोत्पन्ना, तद्विरुद्धाया उत्कण्ठाया उत्पादात्, अतश्च विशेषोक्तिरियम्। सा च कार्यस्य साक्षान्निषिध्यमानत्वेनाप्रतीतेरस्फुटा। विरुद्धोपलब्धिद्वारेण ह्यत्र कार्यनिषेध प्रतीयते न साक्षादित्यस्फुटा विशेषोक्ति। यद्वा उत्पन्नाया उत्कण्ठाया कारणानि

---

16 काश्मीरकरत्नकण्ठकृते **सारसमुच्चये** 'भाद्रक्षपा' इत्यसाम्प्रदायिको वैकल्पिकः पाठो वसन्ते सर्वपुष्पाणि वर्ण्यन्त'इति 'कविसम्प्रदाय इति केचि'दित्यगतिकगतिराश्रिता च। श्रीधरकृतोद्धारे दीर्घे रुचकग्रन्थे काश्मीरकेतराणा प्राक्तनतरनिबन्धोद्धृतैतत्पद्यव्याख्यान' 'हस्ते लीलाकमल'मित्यादि मेघदूतीयपद्य ऋतुसमाहारसूचक'श्च्युतसुमनस कुन्दा' इत्यादि समताऽऽख्यार्थगुणोदाहरणे वा ऋतुसन्धिप्रतिपादनपरो भाव प्रकाशित इति प्रतिभाति।

इदमुत्तममतिशयिनि व्यङ्ग्ये वाच्याद्ध्वनिर्बुधैः कथितः ॥४॥

इदमिति काव्यम्। बुधैर्वैयाकरणैः प्रधानभूतस्फोटरूपव्यङ्ग्यव्यञ्जकस्य

न विद्यन्ते, तानि हि कौमारहरादीनामसन्निधानादीनि, तद्विरुद्धानाञ्च सन्निधानादीनामत्र भावात्तदभाव । तेनेय विभावना कारणविरुद्धत्वोपलब्धिद्वारेण प्रतिषिद्धा, साक्षाद्-निषिध्यमानत्वात्। एवञ्च विशेषोक्तिविभावना वा। सा चास्फुटा व्याख्येया" (रु स -४ पृ)। अत्र च सा एकत्रा एकप्रमाणाभावात् सम्भवन्नपि सन्देहसङ्करो न स्फुट, अस्फुटारब्धत्वात्। ये तु सङ्करस्य पृथगलङ्कारता न मन्यन्ते तन्मते तत्सम्भावनाऽपि नास्ति। ननु विभावाद्युपकृताया रतेश्चर्वणाऽऽयत्तत्वात् स्फुट एवात्र रसवदलङ्कार इत्याह—**रसस्य** हीति। सत्यम्, इह स्फुटो रस प्रधानम्, न च प्राधान्ये सत्यलङ्कारता घटते, अलङ्काराणामुपस्कारकत्वाद्रसादी-(8b)नाञ्च प्राधान्येनोपस्कार्यत्वात्। अलङ्कार्यव्यतिरिक्त श्चालङ्कारोऽभ्युपगन्तव्य एन (एव), लोके तथासिद्धत्वात्, यथा गुणिव्यतिरिक्तो गुण ।

सिद्धे काव्यसामान्यलक्षणे विभागो विशेषलक्षणञ्च वक्तव्यमित्याह। **तद्भेदा**निति श्लिष्ट पदम्। भिद्यत इत्यवान्तरविशेषो भिद्यतेऽनेनेति भेदो व्यावर्तको धर्म इति च। विभागस्य विशेषलक्षणप्रयोजकधर्मिनिर्देशरूपत्वाद्भिन्न वाक्य क्रियते। प्रतिलक्षण वाक्य भो(ते)[नो]पादीयत इति न कश्चिद्विशेष[17]। तेनायमर्थो भवति—द्विधा (त्रिधा) वाक्य (काव्य) ध्वनिर्गुणीभूतव्यङ्ग्य चित्रञ्चेति। तेषाञ्च क्रमेणैतानि लक्षणानीति। प्रक्रान्तमपि **काव्य**पद व्यवहितमितीदपदपरामर्शनीयं स्मारयति—**इदमिति काव्य**मिति। [अस्ति च तत्र] वाच्यापेक्षया चमत्कारकारी कश्चन व्यङ्ग्यगत प्रकर्षविशेष । क्रियासामान्य-विशेषाभ्या कारकसामान्यविशेषयोराक्षेपत एव लाभात् कि बुधैरित्यनेन ? इत्यत आह—**बुधैर्वैयाकरणै**रिति। नाय निर्मूलो ध्वनिव्यवहार किन्तु ध्वननव्यापारानुबन्धीति प्रकाशयितु बुधैरित्युक्तम्। "प्रथमे हि विद्वासो वैयाकरणा व्याकरणमूलत्वात् सर्व-विद्यानाम्" (ध्व आ १।१३ वृत्तौ)। ते च मन्यन्ते प्रत्येकसमुदायविकल्पानुपपत्त्या न वर्णानामर्थप्रतिपत्तिजन-(9a)कत्वम्, अतो न वर्णा शब्दः किन्त्वन्य एव। स्फुटत्यस्मादर्थ इति स्फोट उच्यते। न च वर्णोच्चारणवैयर्थ्यम्, अज्ञातस्य तस्याज्ञापकत्वात्, वर्णमन्तरेण

---

17 एतस्यैवानुवाद**श्चण्डीदास**कृत**काव्यप्रकाशदीपिका**या "तस्य च विशेषलक्षण-प्रयोजनकधर्मिनिर्देशमात्ररूपस्य पृथग्वाक्य अभिधान नातिफलवदिति प्रतिलक्षण वाक्यरूपमेवोपादानम्" (१५-१६ पृ)।

शब्दस्य ध्वनिरिति व्यवहार कृत.। ततस्तन्मतानुसारिभिरन्यैरपि न्यग्भावित-वाच्यव्यङ्ग्यव्यञ्जनक्षमस्य शब्दार्थयुगलस्य। यथा—

निःशेषच्युतचन्दन स्तनतट निर्मृष्टरागोऽधरो
नेत्रे दूरमनञ्जने पुलकिता तन्वी तवेय तनुः।
मिथ्यावादिनि दूति बान्धवजनस्याज्ञातपीडागमे
वापी स्नातुमितो गताऽसि न पुनस्तस्याधमस्यान्तिकम् ॥२॥

(अ श —वेम)

च तस्याज्ञानात्। न चैवमुत्तरध्वनिवैयर्थ्यम्, पूर्वपूर्वध्वनिजनिताव्यक्तज्ञानजन्याखिलसस्कार-सहकृतस्यात(न्त्य) ध्वने स्फोटाभिव्यक्तिहेतुत्वात्। यथोक्तम्—

नादैराहितबीजायामन्त्येन ध्वनिना सह।
आवृत्तिपरिपाकाया बुद्धौ शब्दोऽवधार्यते ॥ इति (वा, प १।८५)

एवमादिना ध्वननमूलो वर्णेषु ध्वनिव्यवहारः प्रसिद्ध। अत्रापि तथैवेति। यस्तु शब्द कुरु, मा शब्द कार्षी, शब्दकार्यय माणवक इति ध्वनावेव शब्दव्यवहार सोऽभि-व्यञ्जकाभिव्यङ्ग्ययोरभेदोपचारात्। अक्षरार्थस्तु—अर्थप्रतिपत्तौ निमित्ततया प्रधानरूप स्फोटरूप यद् **व्यङ्ग्य तद्व्यञ्जनक्षमस्य** तद्व्यञ्जकयनुगुणध्वननाविष्टस्य वर्णात्मकस्य यथा तथा **न्यग्भावित** सापेक्षतया गुणीभूत **वाच्य** येन तथाभूतस्य वस्त्वलङ्काररसादेर्व्यञ्जकस्य यद् **व्यञ्जनक्षम शब्दार्थयुगल** तदात्मन काव्यविशेषस्य व्यञ्जकत्वसाम्याद्ध्वनिरिति व्यवहार कृत इति। एतेन तर्कतन्त्रादिशास्त्रगतविशेषगवेषणे क्रियमाणेऽपि न क्वापि कदाऽपि ध्वनि (ध्वने)र्नाम जगाम श्रोत्रमैत्रीमिति प्रलप(9b)न्तोऽनादिसिद्धाया ध्वननवृत्तेरनुमानादिना प्रकारेण ये प्रत्याख्यानमारभन्ते ते शुष्कतर्कादि-(ति)कर्कशधियो दूरपरास्ता[17] इति सूचित भवति।

यथा चैतत्तथा पञ्चमे प्रपञ्चयिष्यत इत्याशयेनोदाहरणमात्रमाह—**निःशेषेत्यादि।** "अत्र **वापीं स्नातु गताऽसी**ति वाक्यार्थभावनादशायामेव नायकस्वरूपानुसन्धानसहकृतस्य

---

17 "एतेन शब्दसामर्थ्यमहिम्ना सोऽपि वारित। यमन्य पण्डितम्मन्य प्रपेदे कञ्चन ध्वनिम्" इति न्यायमञ्जर्या सकटाक्षाक्षेप "अनुमानेऽन्तर्भाव सर्वस्यापि ध्वने" रित्यादिना महिमभट्टस्य साटोपप्रयासोऽपि सममेवोद्दिष्टोऽनेन प्रघट्टकेन।

अत्र तदन्तिकमेव रन्तु गताऽसीति प्राधान्येनाधमपदेन व्यज्यते ॥

बोद्धुरनुपपत्तिनो लक्षणया विपरीतोऽर्थं प्रतीतिपथमवतरतीति ततो वर्णं (रन्तु)मिति प्रयोजनाद्भोगो व्यज्यते, तदन्तिकमेव गताऽसीति लक्ष्यत" इति **वाचस्पतिमिश्राः**[18]। वयन्तु ब्रूम —पदसमयलभ्यमर्थं बुभुत्समान एव "भम धम्मिअ" (ध्वन्या १।४ का वृत्तौ) इत्यादाविति वक्ष्यमाण (विवोपलक्षण ?) न्यायेन विनैव लक्षणयाऽर्थान्तरप्रतीतिरिति। तथाहि **नि शेषे**ति वलिभङ्गादितोऽपि चन्दनस्य च्यवन न तु क्षालन। । नून निर्यन्त्रण-प्रवृत्तसर्वाङ्गीनमाश्लेष विहितवानिति प्रतीयते। **निर्मृष्टो** न तु किञ्चिन्मृष्ट। **दूर-मनञ्जने**, निकटे तु साञ्जने ललाटनेत्रगलकपोलादिष्वपि स्थानेषु चुम्बनस्य विकल्पितत्वात्। **पुलकिता तन्वी**त्युभय व्यङ्ग्यपक्षे। तत् कि व्यङ्ग्यसद्भावमात्रेण ध्वनित्व, नेत्याह— **प्राधान्येने**ति। सर्वत्र काव्ये रस एवात्मा, तत्प्रकाशनबुद्धि(१०१)नैव कविव्यापारात्, अतएव यदुपात्तमपि न रसप्रतीतौ व्याप्रियते तदनङ्गमेव। एवञ्च यदपेक्षया यस्य प्रधान-(प्राधान्य) प्रत्यासत्तिराकृष्यते तत्तदपेक्षया मुख्यमित्याख्यायते। अस्ति चात्र शाठ्यादि-धर्मप्रतिपादको**ऽधम**पदसहिता**द्रन्तु**मित्यस्मादीर्ष्यारोषोद्भटो विप्रलम्भानुवेध इति। एवञ्च यद्यपि रसध्वनेरप्युदाहरणमेतत् सम्भवति, तथापि रसस्यालौकिकत्वात्तावन्मात्रादेव चानवगमात् "वैदग्ध्येन युगपन्निषेधे विधौ च वाच्ये विधिनिषेधयोर्व्यङ्ग्यत्वेन वस्तुध्वनि-रूपतयोदाहृतम्। ध्वनिकृता हि विधौ वाच्ये निषेध पृथङ् निषेधे वाच्ये विधि पृथगुदाहृत, विधिनिषेधद्वारेण चोदाहरण वाच्यव्यङ्ग्ययोरत्यन्तवैलक्षण्यख्यापनार्थम्" (रु स पृ ५)।

---

18 वाचस्पतिमिश्रमतमिद पूर्वेषामपि केषाञ्चित्तदनुबन्धृणा व्याख्यातॄणा मतत्वेनो-द्धोष्य चण्डीदास सुबुद्धिमिश्रप्रभृतिभि समर्थ्यते। चण्डीदासेन श्रीधरमत रुचकमतानुवर्त्येव साकूत निराकृतम् (१८।१६ पृ)। उपलक्षणपदमत्र मीमासकनयसम्मतमर्थमावहति (मी सू ११।२६)। लक्षणात उपलक्षणस्य वैलक्षण्यमानन्दवर्धनेनाप्यङ्गीकृतम् (ध्व आ १।२२)। 'उपलक्षणन्यायेने'ति रुचकग्रन्थे लब्धस्यानुवपनरीतिरिति चण्डीदासकृतालोचन उद्देश। 'स्वशक्त्युत्-पत्तिविधानलक्षण तन्त्र, परशक्तीनामात्मन्यध्यारोपणमावाप' इत्यपि सर्वतन्त्र समञ्जस व्याख्यान वल्लभदेवकृतशिशुपालवधव्याख्यायामस्त्येतदनुहारि।

अतादृशि गुणीभूतव्यङ्ग्य व्यङ्ग्ये तु मध्यमम् ।

अतादृशि वाच्यादनतिशायिनि । यथा—

ग्रामतरुण तरुण्या नववञ्जुलमञ्जरीसनाथकरम् ।
पश्यन्त्या भवति मुहुर्नितरां मलिना मुखच्छाया ॥३॥

(रु का अ ७।३६)

अत्र वञ्जुललतागृहे दत्तसङ्केता नागतेति व्यङ्ग्य गुणीभूत, तदपेक्षया वाच्यस्यैव चमत्कारित्वात् ।

शब्दचित्र वाच्यचित्रमव्यङ्ग्य त्ववर स्मृतम् ॥५॥

अतादृशीति—अतादृशि व्यङ्ग्ये सति **गुणीभूतव्यङ्ग्यमिति** योजना । तच्च **मध्यम** नोत्कृष्ट नाप्यपकृष्टमित्यर्थ । तादृशस्य व्यङ्ग्यस्याभावश्चित्रेऽप्यस्तीत्यत आह—**वाच्यादनतिशायिनी**ति । व्यक्तमेव व्यङ्ग्य किन्तूदारचमत्कारानाविष्कारानुवचन च (?) न वाच्यादतिरिच्यते । यद्यपि सर्वत्र रसपर्यन्तत्वमिति वाच्यात्तस्य गुणीभाव एव, यद्यपि चाखण्डास्वादविषय काव्यार्थस्तथापि विचारकेणावान्तरव्य (10b)ङ्ग्य वाच्यसमुदायमधिकृत्यावापोद्धारबुद्ध्या जीवितान्वेषणे क्रियमाणे क्वचित् प्रतीयमान भृत्यवद्वाच्यमेवोपस्कुर्वाण गुणीभावमासादयति । तद् यथा प्रकृतोदाहरणे । **ग्रामे**त्यादि । ग्राम एव **यस्तरुण** इति श्रृङ्गारप्रधानभूतयुवप्रकृत्योचित्याभिमतस्पृहाभाजनत्वम् । **तरुण्या** इत्यपि तथा । **नवेति** तादृशमञ्जरीविलोकनोत्कण्ठितयोरुचितमेव वेतसगृहानुसरणम् । अतएव **सनाथे**ति । यस्तयाऽलङ्क्रियते स एव कृतकृत्य करो नान्य इत्यात्मनि कोऽपि धिक्कार, अतएव तथाभूतस्यैव तात्कालिकदर्शनयोग्यत्वात् सविशेषणमुपादानम् । **पश्यन्त्या** इति वर्तमानाऽपदेशेन पुनः पुन सम्पादनमभिव्यञ्जयता । कामिस्पृहानिमित्तवशादेव भवतीत्यपि वर्तमानोपपत्ति [19] । यथा यथा तात्कालिकी चित्तवृत्तिरुत्कृष्यते तथा तथा **मुखच्छाया** मालिन्यमयीति **मुहुर्नितरामि**त्यव्ययद्वयस्वरस । तदेव सङ्केतभङ्गो यद्यपि व्यज्यते तथापि वाच्यं वैवर्ण्यमेव तरुणीमन सन्तापमावेदयितुमुद्धुरम् । सङ्केतभङ्ग केवलमस्यैव निमित्तभावेनोपकुरुते । तदेतद्विवृणोति—**अत्रे**त्यादि ।

अवरमिति—धन्यादिशब्दैरे(रि)वोत्तमादिशब्दैरपि (11a) विभागो मन्तव्य इत्यभिप्रायेणोत्तमादिव्यपदेश । बीजश्चात्र यथास्थान निगदिष्यते । **अव्यङ्ग्य**

---

19 वर्तमानेति कातन्त्रीयलकारसञ्ज्ञाऽत्रोद्दिष्टा ।

चित्रमिति गुणालङ्कारयुक्तम्। अव्यङ्ग्यमिति स्फुटप्रतीयमानार्थरहितम्। अवरमधमम्। यथा

स्वच्छन्दोच्छलदच्छकच्छकुहरच्छातेतराम्बुच्छटा-
मूर्छन्मोहमहर्षिहर्षविहितस्नानाह्निकाऽह्नाय व.।
भिद्यादुद्यदुदारदर्दुरदरीदीर्घादरिद्रद्रुम-
द्रोहोद्रेकमहोर्मिमेदुरमदा मन्दाकिनी मन्दताम्॥४॥
विनिर्गत मानदमात्ममन्दिराद्भवत्युपश्रुत्य यदृच्छयाऽपि यम्।
ससम्भ्रमेन्द्रद्रुतपातितार्गला निमीलिताक्षीव भियाऽमरावती॥५॥

(हय व)

इति काव्यप्रकाशे काव्यस्य प्रयोजनकारणस्वरूपविशेषनिर्णयो नाम
प्रथम उल्लास॥

मितीषदर्थे नञ्, द्योतमानस्यार्थस्य काव्येऽत्यन्ताभावासम्भवात्। तदेतल्लक्षणपदं **चित्र**मिति [च] लक्ष्यपदमभ्याहार्यम्। **चित्र**मितीति गुणालङ्कारद्वारा शब्दार्थधर्मो उक्ता। तथाच वक्ष्यति "गुणवृत्त्या पुनस्तेषां वृत्ति शब्दार्थयोर्मते"ति (८म उ)। अतएव सङ्क्षिप्य विभाग-माह—**शब्दचित्र वाच्यचित्र**मिति। **स्वच्छन्दे**त्यादि। **भिद्या**दित्याशीर्लिङ्। **मन्दाकिनी** भगवती गङ्गा [**वो**] युष्माक **मन्दतां** भिन्द्यादित्यर्थ। **छात** तनु। **स्नान**रूप**माह्निक**-मह्न कृत्यम्। **अह्नाय** झटित्येव। **दर्दुरा** मण्डूका। **दरी**भिरुपलक्षिता **द्रुमाः**। 'ये तु दर्दुर' गिरिविशेष व्याचक्षते तै कवेर्लिपिदेशानभिज्ञत्व प्रकाशित स्यात्, यतश्च पूर्वसमुद्रगामिन्या मन्दाकिन्या दक्षिणापथस्थितेन दर्दुरगिरिणा सम्बन्धो नास्ति। तथाच **कालिदासः** (रघु ४।५१)-

"स निर्विश्य यथाकाम तटेष्वालीनचन्दनौ।
स्तनाविव दिशस्तस्या शैलौ मलयदर्दुरौ॥" इति (र स ५ पृ)।

अत्र सन्दर्भपरिसमाप्तिपर्यन्तविच्छित्यनुप्रासनिवेशनमात्रेणानपेक्षितार्थेन सहृदयहृदया-वर्जकत्व न तु भगवद्गङ्गागतव्यङ्ग्यरत्यादिभावसौष्ठवेन। (11b) नहि [तत्] साक्षाद्वाच्यद्वारा काञ्चन चमत्कारमात्रामर्पयति। [स्फुट] **प्रतीयमानार्थे**ति—**विनिर्गत**-

मिति। **यमिति** हयग्रीवम्[20]। **अमरावती** भवतीति समन्वय। अत्र गुणोत्प्रेक्षया वाच्यालङ्कारेण काव्य सनाथीकृतम्, न तु व्यङ्ग्येन केनचित्, येनेन्द्रो जित इति लौकिक-वाक्यसाधारण्येनापि प्रभावप्रतीतेः सम्भवात्। वीररसध्वनिस्त्वत्र सम्भवन्नपि न स्फुट इत्यव्यङ्ग्यम्। एतच्चित्रनिर्णये षष्ठे वक्ष्यति।

इति महासान्धिविग्रहिकश्रीश्रीधरविरचिते काव्यप्रकाशविवेके
प्रथम उल्लास

---

२० पद्यमिद भर्तृमेण्ठकृतहयग्रीववधादुद्धृतम्। "काव्य कल्पान्तरस्थायि जायेत सदलङ्कृती"ति सर्गबन्धमहाकाव्यलक्षणान्तपद्ये "वशवीर्यश्रुतादीनि वर्णयित्वा रिपोरपी"ति लक्षणपरिपूरके तत्रत्ये चैतत्सदृशकाव्यानां ग्रहणमिति हि विपश्चित।

(अथ द्वितीय उल्लास.)

क्रमेण शब्दार्थयो. स्वरूपमाह—

स्याद्वाचको लाक्षणिक. शब्दोऽत्र व्यञ्जकस्त्रिधा ।

अत्रेति काव्ये । एषा स्वरूप वक्ष्यते ॥

वाच्यादयस्तदर्था. स्यु

वाच्यलक्ष्यव्यङ्ग्या ॥

तात्पर्यार्थोऽपि केषुचित् ॥६॥

आकाङ्क्षायोग्यतासन्निधिवशाद्वक्ष्यमाणस्वरूपाणां पदार्थाना समन्वये

वृत्तिकार उल्लाससङ्गति कुर्वन्नाह **क्रमेणे**ति । येन क्रमेण लक्षणे प्रकान्तौ तदभि(ति)क्रमे कारणाभावात्तेनैवेत्यर्थ । **स्वरूप**मवान्तरविशेष । शब्द्यते ज्ञाप्यतेऽनेनेति शब्द । अस्य च विभागवाक्यादेव त्रित्वे लब्धे चतुर्थप्रकारो न सम्भवतीत्यावेदयितु **त्रिधे**ति । गौणी तु लक्षणातो न व्यतिरिच्यते लक्षणाया गौणस्य व्याप्तत्वात् । **काव्य** इति निर्धारणे सप्तमी । शब्दार्थयोर्मध्ये शब्दोऽत्रावधार्यत इत्यर्थ । प्रसिद्धाभिधावृत्तिविवेचनमन्तरेण व्यञ्जनविवेचन प्रयोजनीभूत न निर्णीत स्यादिति ता अप्यस्य विचिन्त्यन्ते(साऽप्यस्य विचिन्त्यते) । **एषा**मिति वाचकादीनामर्थस्वरूपजिज्ञासोद्रे(12a)कात् तदभिधाय वक्ष्यत इत्यर्थ । ननु नान्यस्य क्वचिद्विवक्षितो विशेष प्रसिद्धो यत्रादिपद वर्तते—अत आह **वाच्ये**ति । वाच्यादीना सम्बन्धिशब्दत्वादर्थस्य विशेष प्रतीयते, तद्विषयोऽयमादिशब्द इति भाव । अर्थ्यन्त इति **अर्था** वाचकादीना क्रमेण बोध्या इति । ननु चास्तु गौण्या लक्षणायामन्तर्भावस्तात्पर्यशक्तिस्त्वतिरिच्यते, तत् किमिति तामादाय शब्दार्थप्रकारश्चतुर्थो न गण्यत इत्यत आह **तात्पर्यार्थोऽपीति** । **केषुचित्**, वादिना मतेषु, अतोऽसार्वलौकिकत्वात् समशीर्षिकया न गण्यत इत्यर्थ । एषा वृत्तिरभिधात कथ भिद्यत इत्यत आह—**आकाङ्क्षेति,** प्रतिपत्तुर्जिज्ञासाऽऽकाङ्क्षा, बाधागोचरै मुख्य[1](?) **योग्यता** सम्बन्धार्हत्वमिति यावत् । बुद्धिविशेष (निवेश ?) **सन्निधिः** । तथाचोक्तमन्यत्र—

---

1 'बाधागोचरैर्मुख्य'मिति पाठ सम्भाव्यते ।

तात्पर्यार्थो विशेषवपुरपदार्थोऽपि वाक्यार्थः समुल्लसतीत्यभिहितान्वय-वादिनां मतम् ॥ वाच्य एव वाक्यार्थ इत्यन्विताभिधानवादिनः ।

सर्वेषां प्रायशोऽर्थानां व्यञ्जकत्वमपीष्यते ॥

तत्र वाच्यस्य यथा

माए घरोवअरण अज्ज हु णत्थि त्ति साहिअ तुमए ।
ता भण कि करणिज्ज एमे अ ण वासरो ठाइ ॥६।

(गा स वे ८८६)

"आकाङ्क्षा सन्निधानञ्च योग्यता चेति तत्त्रयम् ।
सम्बन्धकारकत्वेन क्लृप्तन्नानन्तरश्रुति ॥ (त वा ४३६पृ)

तथा— यस्य येनाभिसम्बन्धो दूरस्थस्यापि तेन स ।
अर्थतो ह्यसमानानामानन्तर्यमकारणम् ॥

अपि पश्यामि धावन्त दूरे यान्त वनस्पतिम् ।
त्वा ब्रवीमि विशालाक्षि या पिनष्टि जरद्गवम् ॥ इति"[2]

(शवरभाष्ये ४।३।११) (रु स ५पृ)

एतत्त्रितयसहकवि-(कारि) चकव्यावर्तिता शब्दस्यार्थावगमनशक्तिस्तात्पर्यम् । समभिव्याहृ-(12b)तपदार्थसंस्पर्धा (सर्गा-)त्मकश्वा(काचा)स्य पृथगेव विषय । शुद्धो हि स्वार्थ पदसङ्केतगोचर । अतएव वाक्यार्थ(र्थे) लक्षणेति भ्रान्तमतमपास्तम् । जात्यादयो वक्ष्य-माणरूपा **पदार्थास्तेषा समन्वये** कर्तृकर्मक्रियाव्यापारे **विशेषवपु** ससर्गाधिकवाक्यार्थ-शरीर । **अपदार्थोऽपीति** केवलपदागम्य । अनन्वितानामभिधान पश्चादन्वयप्रतीति-रिति वादिनस्तौतातितादय । **वाच्य एवेति** प्रयोगपतितानामावापोद्वापाभ्या शक्तिग्रहण

---

2 भावत्रातकृतकौषितकीगृह्यसूत्रविवरणे (Adyar Library 39 N 37 Folio 66) 'यस्य स्यायेन अर्थतो ह्यसमर्थाना'मिति प्रथमश्लोके पाठ । वात्स्यायनीयन्यायभाष्ये (१।२।६) 'यस्य येनार्थसम्बन्ध' 'अर्थतो ह्यसमर्था-ना'मिति च पाठान्तरम् । द्वितीयश्लोके पिनष्टीत्यत्र पिनक्षीति मुद्रितशावर-भाष्ये पाठ । यान्तमित्यत्र 'यात'मिति रुचकधृतो 'जात'मिति सारसमुच्चय-गृहीतश्च पाठ । या पिनष्टीत्यत्र पिनक्षीति पिनेक्षीति चासङ्गतौ पाठौ कुत्रचित् ।

अत्र स्वैरविहारार्थिनीति व्यज्यते।

लक्ष्यस्य यथा

साहेन्ती सहि सुहअ खणे खणे दूम्मिआसि मज्झ कए।
सब्भावणेहकरणिज्जसरिसअ दाव विरइअ तुमए ॥७॥

(गा स वे ८४०)

ततश्च योग्यपदार्थान्तरा-(१ अ)न्वित एव स्वार्थे शक्तिर्गृह्यत इति ससर्गात्मको वाक्यार्थ शक्तिगोचर एवेत्य**न्विताभि[धान]वादिन** प्रभाकरगुरो र्मतमिति सम्बन्ध [3]।

सर्वेषामिति सर्वशब्दो न व्यक्तिकात्स्न्र्य इत्याह **प्रायश** इत्यादि, क्वचित् कस्यचिन्नेत्यर्थ । माए (3)' इत्यादि—मातर्गृहोपकरणमद्य खलु नास्तीति कथित त्वया। तद् भण कि करणीयमेवमेव न वासरस्तिष्ठति[4] ॥ मातरिति सम्बोधनम्। काकुविश्वास्यता-माविष्करोति। तथा च मय्युपस्थिताया तव गमनमनर्हमिति व्यज्यते। गृहपदेन भृत्यादि-समुदायस्तस्योपकरणमित्यवश्यसम्पाद्यता व्यनक्ति। अद्य नास्ति न त्वन्यदा, तेनैतत्क्षण-प्रसक्तत्वादविनयपूर्वरङ्गादिशङ्कानि-(१३ a)रास। तत सकृद्गमन न दोषायेति ध्वनति। त्वया शिष्ट न तु मयैवेदमुन्नीतमिति माऽस्ताऽन्यथा शङ्किष्ठा इति प्रकाश[य]ति। भणेति निदेशकारिणी तेऽह न तु स्वयमेव किञ्चिदाचरामीति द्योतयति। करणीयमिति सम्पादना-र्हम्। अतोऽत्र विमति मा विधासीरिति कटाक्षयति। एवमेवेति। उपकरण विना यादृशी नामास्मदृशा सा वक्तुमपि नार्हतीति प्रत्याययति। इति श्रुतावगतादेवार्थाद्वक्ष्यमाण-सहकारिसमवहितात् स्वच्छन्दविहारार्थिनीत्यर्थोऽवगम्यमान स्थापयति ध्वननव्यापारम्। **साहेन्ती**त्यादि—'शासती साधयन्ती वा सखि सुभग क्षणे क्षणे खेदिताऽसि मम कृते। सद्भावस्नेहकरणीयसदृशन्तावद्विरचित त्वया ॥' शासती मदीयामवस्था तस्मै कथयन्ती साधयन्ती मयि पक्षपातिन कुर्वतीत्यर्थ। पदस्वरस पूर्ववद् गवेषणीय। अत्र वाच्य-स्यापकारिणी वक्तुश्चापकारसरब्धस्य पर्यालोचनाद् बाधितमुख्यार्थ शब्दो विपरीतलक्षणया

---

3 आहुरिति शेष इति बहुवचनसम्बन्ध केचिद्दर्शयन्ति। अन्ये त्वत्रैकवचनेन बहुनुग्रहाभावो ध्वनित इति मन्यन्ते।

4 एषु न तावच्छाया प्रदर्श्यते परन्तु तस्या यथायोग प्रतिवाक्यदिशा विशदन-मपीति ध्वन्यालोकलोचनकारादिभिरनुसृत पन्था। स एवात्राप्याश्रित। भूय प्रतीतिरित्यग्रे टीकापाठ क्रियाविशेषणत्वेन समाधेय।

अत्र मत्प्रिय रमयन्त्या त्वया शत्रुत्वमाचरितमिति लक्ष्यम्। तेन च कामुक विषय सापराधत्वप्रकाशनं व्यङ्ग्यम्।

व्यङ्ग्यस्य यथा—

उअ णिच्चलणिप्पदा भिसिणीपत्तम्मि रेहइ वलाआ।
णिम्मलमरगअभाअणपरिट्ठिआ सखसुत्ति व्व ॥८॥ (गा स १४)

अत्र निस्पन्दत्वेन आश्वस्तत्वम्। तेन च जनरहितत्वम्। अत्र सङ्केतस्थान-

---

कौटिल्य[ात्रि] स्नेहत्वादिक लक्षयति। स च लक्षितोऽर्थोऽर्थान्तर प्रकाशयतीति लक्ष्यस्य व्यञ्जकत्वम्। ननु वक्त्रादिपर्यालोचनायदि मुख्यार्थबाधस्तर्हि मूर्धाभिषिक्तेषु "भम धम्मिअ" इत्यादिषु (13 b) ध्वन्युदाहरणेषु मुख्यार्थबाधाद्विपरीतलक्षणाप्रवेशप्रसङ्ग•। नैतदिह, यत्र वाच्योऽर्थ कयाचिद् गमनिकया समर्थयितु शक्यते तत्र तस्य समूलत्वान्न वक्त्रादिविशेष-वशाद्बाध। केवल वक्त्रादिविशेषोऽर्थान्तरमेवावगूरयति सत्वागूरितो विरोधान्मुख्यमर्थ यद्यत सत्यतयाऽवगमयति तस्यान्यत्व क्वोपयुज्यते, तस्य हि युक्तिवशात् प्ररूढप्रतीते सविधान (ना ?) मेवेति कुतो मुख्यार्थबाध, कुतो वा लक्षणा ? यत्र तु वाच्यस्य कयाचिद् गमनि-कया समर्थयितुमशक्यस्य वक्त्रादिवशाद् बाध्यतया प्रतीतिस्तत्र मुख्यार्थबाधाल्लक्षणा। "भम धम्मिअ" इत्यादौ वाच्यस्य समर्थयितु शक्यत्वान्मुख्यार्थबाधाभावे न विपरीतलक्षणायोग। "साहेन्ती"त्यादौ तु वाच्यस्य समर्थयितुमशक्यत्वाद्वक्त्रादिवशाद्दूषन्नेवान्वयो बाधित इत्यस्ति मुख्यार्थबाध। सम्बन्धश्चात्र विरोधाभिध वैपरीत्यमेवेति न किञ्चिदसङ्गतम्। तथा चोक्तम्

"क्वचिद्बाध्यतया ख्याति क्वचिदस्य च (क्वचित् ख्यातस्य) बाधनम्।
पूर्वत्र लक्षणैव स्यादुत्तरत्राभिधैव तु ॥" (रु स ६-७ पृ)

उअ णिच्चलेत्यादि—उअ पश्य। वाक्यस्यात्र कर्मता। निश्चलनिस्पन्दबिसिनी पत्रे शोभते वलाका। (14 a) निर्मलमरकतभाजनस्थिता शङ्खशुक्तिरिव ॥ निश्चलेति सम्बोधनम्। ग्राह्यमाणोऽपि न भाव गृह्णाति य स एवमुच्यते। शङ्खशुक्तिर्मुक्ताशुक्ति। अत्र निस्पन्दत्वेन विश्वासो व्यज्यते, तेन विविक्तता ध्वन्यते, तेन च सङ्केतस्थानमिति व्यङ्ग्यत्रयम्। तत्र पूर्वार्थद्वयप्रतीतावपि न कश्चन चमत्कार( )। तृ(प्र)तीय[5]मानार्थ-भाना**देव** काव्यत्वप्रतिलम्भ। अतएव पूर्वो[क्तो]-दाहरणेषु व्यङ्ग्यपरम्परासम्भवेऽपि

---

5 तृतीयार्थभानादेवेत्यपि सङ्गत पाठ स्यात्।

मेतदिति कयाचित् कश्चित् प्रत्युच्यते। अथवा मिथ्या वदसि, न त्वमत्रागतोऽभूरिति व्यज्यते ॥

वाचकादीनां क्रमेण स्वरूपमाह—

साक्षात्सङ्केतितं योऽर्थमभिधत्ते स वाचकः ॥२॥

इहागृहीतसङ्केतस्य शब्दस्यार्थप्रतीतेरभावात् सङ्केतसहाय एव शब्दोऽर्थविशेष प्रतिपादयतीति यस्य यत्राव्यवधानेन सङ्केतो गृह्यते स तस्य वाचकः।

सङ्केतितश्चतुर्भेदो जात्यादिर्जातिरेव वा।

यद्यप्यर्थक्रियाकारितया प्रवृत्तिनिवृत्तियोग्या व्यक्तिरेव तथाप्यानन्त्याद्

नाय विशेष इत्याशयाविष्कार । सम्भोगाच्च विप्रलम्भ प्रकर्षवानिति मत्वा पक्षान्तरमाह— **अथवेति**। व्यापकविरुद्धोपि (प) लब्धेः-(ब्धेय)व न त्व गत इति प्रतीयत इति चेन्न, अनुमानसामग्रीखण्डनस्य करिष्यमाणत्वात्।

एषा [स्व]रूप वक्ष्यत इत्युक्त, तस्यायमवसर इत्याह—**वाचकादीना**मिति। **साक्षादि**त्यर्थान्तराव्यवधानेन। **सङ्केतित**मिति वैशेषिकमतानुसारेणाभिधानप्रतिपादनम्[6]। **इहेति** शाब्दे व्यवहारे। **अगृहीतसङ्केतस्य** प्रतिपत्तुरिति यावत्।

जात्यादिरिति जातिगुणक्रियाद्रव्याणि। ननु प्रतीतावेव सङ्केतग्रहस्योपयोग, प्रतीतिश्च प्रवृत्तिनिवृत्तिमात्रोपयोगिनी, ते चेष्टानिष्टसाधनयोरेव, (14b) व्यक्तिश्च तादृशी नोपाधिरिति कथ न चतुर्विध सङ्केतविषयग्रह, कथञ्च जातिरेवेत्यत

---

6 "बुद्धिपूर्वा वाक्यकृतिर्वेदे" (६।१।१) इति "पुनर्विशिष्टे प्रवृत्ति"रिति (६।१।१०) वैशेषिकसूत्रेषु पाठात्। सङ्केतितमिति वचनव्यक्तिरपरभाषाप्रायेति रुचकमत यस्य प्रतिध्वनि साहित्यचूडामणौ "अभिदधातिरत्र शब्दवृत्तिमात्रे प्रतिपादनलक्षणे वर्तते।... इतरथा पर्यायस्यापि लक्षणत्वापत्ति"रिति। ततश्च तत्त्वे निघण्टुपाठादेवाशेषवैशेषिकार्थप्रतिपत्तिप्रसङ्ग इत्यसङ्गत स्वकपोलकल्पितो विश्लेषणप्रयास। आदर्शपुस्तके वाक्यस्यास्यादौ "वाचकादीति पक्षान्तरमाह अथवे"ति विसदृशी पूर्वतरवाक्यांशस्यायथा पुनरावृत्ति।

व्यभिचाराच्च(द्रा) तत्र सङ्केतः कर्तुं न युज्यत इति गौ शुक्लश्चलो डित्थ इत्यादीनां विषयविभागो न प्राप्नोतीति च तदुपाधावेव सङ्केतः। उपाधिश्च द्विविधो वस्तुधर्मो वक्तृयदृच्छासनिवेशितश्च। वस्तुधर्मोऽपि द्विविधः सिद्ध· साध्यश्च। सिद्धोऽपि द्विविध· पदार्थस्य प्राणप्रदो विशेषाधानहेतुश्च।

आह—**यद्यपीति**[7]। अनुगतरूपपुरस्कारेण श्रृङ्गग्राहिकया सङ्केतग्रहो वाच्य। तथाचैकस्या व्यक्तौ तद्ग्रहेऽपि कथ व्यक्त्यन्तरे प्रयोग स्यात्? तत्रापि सङ्केतग्रह इति चेत् तर्हि व्यक्त्यन्तरे कथमित्यानन्त्यम्। **व्यभिचाराद्धे**[8]ति "यत्र व्यक्तौ सङ्केत सा व्यवहारकाल(ले) व्यभिचरति" (रु सं ७पृ)। एवञ्च व्यक्ताविव जातावपि प्रतिव्यक्तिभिन्नरूपत्वादानन्त्यव्यवहारो दुष्परिहर। नहि विद्यमानायामग्याकृतौ गामानयेत्य (ति क-)श्चित् पिष्टमयी गामानयतीति। ननु जातिपक्षेऽपि जाते सर्वगतत्वात् किमिति मृद्गविकाऽऽनयन न भवति? सास्नाऽऽदिमत प्राणिन एव गोत्वाभिव्यञ्जकत्वात्—इत्यास्ता तावत्। **तत्रेति** व्यक्तौ। **सङ्केतः कर्तुं न युज्यते** न शक्यत इत्यर्थ। किञ्च यदि व्यक्तिमात्र सङ्केतगोचर कथ न घटपदस्य पटे प्रयोग[9]? अप्रयोगादेवेति चेन्न, प्रयोगसामग्रीसम्भवे तस्य वाङ्मात्रत्वात्। अपि च श्रृङ्गग्राहिकया सङ्केतग्रहे चैव व्यक्तिर्गोपदसमयग्रहविषय, नैव तत्र समानाधिकरणप्रयुज्यमानशुक्लचलशब्दयोश्च विषय इत्यमीषा घटकलसादिवत् पर्या-(15 a)यत्वप्रसङ्ग इत्याह—**गौः शुक्ल** इति। कृतकशब्दवादिना हि मते पारमेश्वर सङ्केत सकललोकव्यवहारानुकूलतया सर्वैरनुगृहीत। इतरथा प्रकृत्युच्चारण(णे) प्रयोज्यप्रयोजकपुरुषविप्रतिपत्तौ सव्यवहारलोपप्रसङ्ग, तत एव च जगदादित आरभ्य तथैव प्रवाहाविच्छेदस्याप्युपपत्तिरिति। नित्यशब्दवादिना मत औत्पत्तिकसम्बन्धग्रहणापरपर्याया व्युत्पत्ति सङ्केतपदेन विवक्षिता। **उपाधिश्चेति**, **वस्तुधर्म**स्तल्लब्धा वृत्ति, **वक्तृयदृच्छासन्निवेशितो** वस्तुषु न वर्तते वक्त्रा तु स्वातन्त्र्येण

---

7 अत्रादर्शपुस्तके किञ्चिद्गलितमिति प्रतिभाति। काव्यप्रकाशदीपिकातोऽत्रालोकपात क्रियते—**अर्थक्रियाकारितयेति**, अर्थ प्रयोजन तस्य क्रिया निर्वाह, वज्राग्निवत् समुदितत्व कार्याणामिति (३३ पृ)।

8 'व्यभिचाराच्चे'ति मुद्रितपुस्तकेषु पाठ·।

9 व्यक्तिविवेके "घटतीति घटो ज्ञेयो नाघटन् घटतामियात्। अघटत्वाविशेषेण पटोऽपि स्याद् घटोऽन्यथे"त्याद्युद्घोषणमेतदभिप्रायकमेव।

तत्राद्यो जाति। उक्त हि वाक्यपदीये "न हि गौ· स्वरूपेण गौर्नाप्यगौ-गौत्वाभिसम्बन्धात्तु गौ" रिति[10]। द्वितीयो गुणः। शुक्लादिना हि लब्धसत्ताक वस्तु विशिष्यते। साध्यः पूर्वापरीभूतावयव क्रियारूप·। डित्थादिशब्दाना-मन्त्यबुद्धिनिर्ग्राह्य सस्कृतक्रमस्वरूप वक्त्रा यदृच्छया डित्थादिष्वर्थेषूपाधित्वेन सन्निवेश्यत इति सोऽय सञ्ज्ञारूपो यदृच्छात्मक इति "गौ· शुक्लश्चलो डित्थ इत्यादौ चतुष्टयी शब्दानां प्रवृत्ति" रिति महाभाष्यकारः (ऋ ६ क प्र सू·)। **परमाणुत्वा-दीनां तु गुणमध्यपाठात् पारिभाषिक गुणत्वम्। गुणक्रियायदृच्छानां वस्तुत एकरूपाणामप्याश्रयभेदाद्भेद इव लक्ष्यते, यथैकस्य मुखस्य खड्गमुकुर-तैलाद्यालम्बनभेदात्।**

सङ्केतावच्छेदकतया कल्पित। **प्राणप्रद** इति-समाधिपदम्, (?) तेनाश्रयोत्पत्ति क्षणेऽपि सन्निति तात्पर्यम्। **विशेषाधानहेतु**रिति—व्यक्ते समवायिकारणतया गुण-प्राक्कालसम्बन्धनियमान्न जातिरूपो धर्म। प्राणप्रद इत्यत्र प्रामाणिकसम्मतिमाह—**उक्त** **ही**ति भर्तृहरिणेति शेष। स्वरूपेण व्यक्तिरूपेण न गौर्गोपदवाच्य। तत् किमगौरश्वादि, सोऽपो[ह] नास्तीत्याह—**नागौ**रिति। तेनान्वयव्यतिरेकाभ्या जातिरेव शाब्दव्यवहारहेतु-रित्युक्तप्रायम्। द्वितीयस्तु न जात्यन्तर्भूत इत्यत्र प्रमाणमाह(15 b) **शुक्लादिना ही**ति-विवृतमेतत्। कथ **साध्यः** क्रियारूपो, द्रव्यादेरपि साध्यत्वात्। अत आह **पूर्वे**ति। अक्रमरूपस्य क्रमप्राप्तिश्च प्रत्ययेनोच्यते। अपूर्वापरौ पूर्वापरौ भूतावक्यवौ यस्या क्रियाया इति विग्रह। पूर्वाऽधिश्रयणादिरपर उदकसेकादि। एतद्रूपा यथा पाकक्रिया तथा-ऽन्याऽप्यनुसर्तव्या। तदुक्तम्—कालानुयाति(यि) यद्रूप धात्वर्थस्य क्रियेति तत्।[11] तेन

---

10 भर्तृहरिकृत वाक्यपदीयं कारिकावृत्तिभ्यामुभाभ्या युतमिति विपश्चिता निश्चय। तेन गद्यमयोऽयमशो वृत्तौ स्थातुमर्हति। प्रथमखण्डे लवपुरत (Lahore) सम्पादिते वृत्तिग्रन्थोऽपि मुद्रित। उत्तरखण्डद्वये कुत्राप्ययमंश स्यादिति सम्भाव्यते।

11 एतच्च भर्तृहरिमतं महाभाष्यप्रदीपे कैयटेनैवं सङ्कलितम्—'गुणभूतैरवयवै समूह क्रमजन्मनाम्। बुद्ध्या प्रकल्पितो भेद क्रियेति व्यपदिश्यते॥ समूहश्च तथाभूत प्रतिभेद समूहिषु। समाप्यते ततो भेदे कालभेदस्य सम्भव॥ अनन्तरं फलं यस्या· कल्प्यते ता क्रिया विदु·। प्रधानभूता तादर्थ्यादन्यासा तु तदाख्यते"ति।

हिमपय·शङ्खाद्याश्रयेषु परमार्थतो भिन्नेषु शुक्लादिषु यद्वशेन शुक्ल शुक्ल इत्याद्यभिन्नाभिधानप्रत्ययोत्पत्तिस्तच्छुक्लत्वादि सामान्यम्। गुडतण्डुलादि-पाकादिष्वेवमेव पाकत्वादि। बालवृद्धशुकाद्युदीरितेषु डित्थादिशब्देषु च प्रतिक्षणं भिद्यमानेषु डित्थाद्यर्थेषु वा डित्थत्वाद्यस्तीति सर्वेषां शब्दानां

धात्वर्थं क्रियेत्यभिप्रेतम्, सर्वत्र पूर्वापरीभूतो भावात्मैव धातुप्रत्याय्य। एकस्मिश्च क्षणे समुदायताऽऽरोपणेन प्रयोग एकापूपी(ति)वत (अ प्रः १म—३१पृ) **अन्त्येति**—अन्ते भवाऽन्त्याऽवि(व)शिष्टेत्यर्थ। उच्चारणानन्तरमेकयैव धिया विषयीकृत, न तु पूर्ववत खण्डश उत्पन्नयेति। [त-]देव व्युत्पादयति **संस्कृत क्रमे**ति[12]। यदृच्छाकल्पितत्वाद्[13] डित्थादिशब्दा एव यदृच्छा इत्युच्यन्ते। एतेषा स्वरूप तत्संज्ञिषु पुरुषै सतत्स-(सतत-)मुपाधतया निधीयते। तदेतदभिसन्धाय भगवान् भाष्यकारश्चातुर्विध्य शब्दस्याभ्यधादित्याह—**चतुष्टयी**ति। उक्तगुणलक्षणासम्भव मन्यमान आह-**परमाणुत्वेति**[14]। नन्वेतावताऽपि लक्षणमव्यापकमेव। सत्यम् एवन्तु[15]

· · ...

---

12 संहृतक्रम स्वरूपमिति मुद्रितप्रसिद्धपुस्तकेषु पाठो लक्ष्यते। संहृत शून्यमिति प्रायिक व्याख्यानम्। श्रीधरव्याख्यानन्तु वर्णसंहार(-भरत ना शा) वेणीसंहारेत्यादिप्रयोगदर्शनादुत्पलशतपत्रवेधादिवत् क्रमस्तत्रास्ति न स लक्ष्य इति रीत्या स्फोटतत्त्वप्रतिष्ठाक्षमम्।

13 'जातिमत्समुदायेऽपि संज्ञावत् कल्प्यते परै'रिति वाक्यपदीयवचनाद् यदृच्छा-शब्दाना तथाभाव।

14 परमाणिवत्यन्यत्र पाठ। चण्डीदासकृतदीपिकाया परमाणवादीनामिति भाव-परोऽय निर्देश इति विवरण श्रीधरगृहीतपाठस्य तात्पर्यं प्रामाणिकत्वञ्चा-वेदयति।

15 अत्रादर्शपुस्तके चतुर्णां (१६-६) पत्राणामभावो यत्कृता त्रुटि पुस्तकान्तरप्राप्तिसमाधानेनैव विनिवार्यते। तत्र चाशा क्षोदीयस्येवेति महद्वैशसम्।

जातिरेव प्रवृत्तिनिमित्तमित्यन्ये। तद्वानपोहो वा शब्दार्थः कैश्चिदुक्त इति ग्रन्थगौरवभयात् प्रकृतानुपयोगाच्च न दर्शितम् ॥

स मुख्योऽर्थस्तत्र मुख्यो व्यापारोऽस्याभिधोच्यते ॥८॥

स इति साक्षात्-सङ्केतितः। अस्येति शब्दस्य।

मुख्यार्थबाधे तद्योगे रूढितोऽथ प्रयोजनात्।
अन्योऽर्थो लक्ष्यते यत् सा लक्षणाऽऽरोपितक्रिया ॥९॥

'कर्मणि कुशल' इत्यादौ दर्भग्रहणाद्ययोगाद् 'गङ्गाया घोष' इत्यादौ च गङ्गाऽऽदीना घोषाद्याधारत्वासम्भवान्मुख्यार्थस्य बाधे विवेचकत्वादौ सामीप्ये च सम्बन्धे रूढितः प्रसिद्धेस्तथा गङ्गातटे घोष इत्यादेः प्रयोगाद् येषां न तथा प्रतिपत्तिस्तेषां पावनत्वादीनां धर्माणां तथा प्रतिपादनात्मनः प्रयोजनाच्च मुख्येनामुख्योऽर्थो लक्ष्यते यत् स आरोपितः शब्दव्यापारः सान्तरार्थनिष्ठो लक्षणा[16]।

स्वसिद्धये पराक्षेपः परार्थं स्वसमर्पणम्।
उपादानं लक्षणं चेत्युक्ता शुद्धैव सा द्विधा ॥१०॥

'कुन्ताः प्रविशन्ति' 'यष्टयः प्रविशन्ति' इत्यादौ कुन्तादिभिरात्मनः प्रवेशसिद्ध्यर्थं स्वसयोगिनः पुरुषा आक्षिप्यन्ते। तत उपादानेनेय लक्षणा। "गौरनुबन्ध्य" इत्यादौ श्रुतिचोदितमनुबन्धनं कथं मे स्यादिति जात्या व्यक्तिराक्षिप्यते न तु शब्देनोच्यते "विशेष्यं नाभिधा गच्छेत् क्षीणशक्तिर्विशेषणे" इति न्यायादित्युपादानलक्षणा तु नोदाहर्तव्या। न चात्र[17] प्रयोजनमस्ति न वा रूढिरियम्। व्यक्त्यविनाभावित्वात्तु जात्या व्यक्तिराक्षिप्यते। यथा क्रियतामित्यत्र कर्ता। कुर्वित्यत्र कर्म। प्रविश पिण्डीमित्यादौ गृह भक्षयेत्यादि च। 'पीनो देवदत्तो दिवा न भुङ्क्ते' इत्यत्र च रात्रिभोजनं न लक्ष्यते श्रुतार्थापत्तेरर्थापत्तेर्वा तस्य विषयत्वात्। 'गङ्गायां घोष' इत्यत्र तटस्य घोषाधिकरणत्वसिद्धये गङ्गाशब्दः

(२०a) धर्म इति। न तावदिय प्रयोजनलक्षणा नापि रूढेत्याह **न चेति**। शब्दानुपस्थितौ कथं तर्हि व्यक्तेः प्रतीतिरिति चेद्, अत आह **व्यक्त्यविनेति**। "अविनाभावित्वलक्षणेनाक्षेपेण य(त)स्याः प्रतीतिः, प्रविश पिण्डीमित्यादिवत्।

16 तथाच शब्दव्यापारविचारे एव वाच्यवाचकार्थनिष्ठो व्यापारावभिधालक्षणे इति।

17 'न ह्यत्रे'ति प्रायिकः पाठः।

स्वार्थमर्पयति—इत्येवमादौ लक्षणेनैषा लक्षणा। उभयरूपा चेय शुद्धा, उपचारेणामिश्रितत्वात्।

अनयोर्लक्ष्यस्य लक्षकस्य च न भेदरूप ताटस्थ्यम्। तटादीनां गङ्गाऽऽदि-शब्दै· प्रतिपादने तत्त्वप्रतिपत्तौ हि प्रतिपिपादयिषितप्रयोजनसप्रत्यय·। गङ्गा-सम्बन्धमात्रप्रतीतौ तु गङ्गातटे घोष इति मुख्यशब्दाभिधानाल्लक्षणायाः को भेद·।

न तु लक्षणैषा, तद्विकार-(तस्य द्विप्रकार)त्वादत्र तदसम्भवात्। द्विविधो ह्याक्षेपो लक्षणामूलोऽविनाभावित्वमूलश्च। अत्र चोत्तर एव पक्ष इति न लक्षणासम्भावना कार्येत्यर्थ·" (रु स १पृ)। उदाहरणान्तरेणाविनाभावमूलमाक्षेप स्फुटयति—**क्रियतामिति** कर्मणि लकार, अतः क्रियैव धातूपात्तौ (त्ता) कर्तारमाक्षिपति। कुर्विति युष्मदर्थ-कर्तरि लकार। कारककालसख्यास्तिङ्वाच्या एव, नहि कारकत्वेन क्रियाव्यापकत्वेन वा कर्तृकर्मणोरस्ति विशेषो येन कर्मण्यभिधानम्। अन्यत्राक्षेप इति कल्पना घटते। उक्तञ्च—

आत्मनेपदरूपेण सर्वत्रैवादिकर्मणि।
लकार स्यात्तथैवाय कर्तर्यपि भवेन्न किम्॥

न च सर्वा क्रिया कर्मव्याप्तेति चेत्, मा भूद्, या तावत्तादृशी तत्र का वार्ता? यदि चाख्यातेन सख्याया नाभिधान तत (?), चैत्र पचतीति सामानाधिकरण्य न स्यादित्यादिकमव सेयम्। यथा क्रियासामान्येन कारकसामान्यमाक्षिप्यते तथा तद्विशेषेण तद्विशेषोऽपि क्वचिदि-(20b)त्याह—**प्रविशेति**। प्रवेशात्मा क्रियाविशेष सन्निहितायामन्य(मन्वय)योग्याया पिण्ड्यामसम्भवन् व्यवहितमपि गृहात्मक कारकविशेषमाक्षिपति। योग्यकर्मोपलक्षण-श्चैतत्। एव कारकविशेषेणापि क्रियाविशेष क्वचिदित्याह **पिण्डीमिति**। एतद्धि कर्मपद प्रविशेत्येतस्मिन्नसम्भवद् योग्यमेव भक्षयेत्यादिक्रियापदमाक्षिपति। तदेतद्द्वयमेकजातीयतया समासेनोपन्यस्तम्। **पीन** इति—दिवाभोजनाभावे पीनत्व नानवाप्य[रात्रिभोजन] रात्रि-भोजने पर्यवस्यति। कस्य पुन प्रमाणस्यात्र व्यापार इति जिज्ञासुरु(मु)त्तरयति—**श्रुतेति**। **तस्येत्ये**कशेषनिर्देशो दृष्टान्तदार्ष्टान्तिकसाधारणतया प्रमाणाभिधानाय। "दृष्ट श्रुतो वाऽर्थोऽन्यथा नोपपद्यत इत्यर्थकल्पनाऽर्थापत्तिरित्येतद्भाष्ट्टा विवृण्वते। दृष्ट इति प्रत्यक्षानु-मानोपमानार्थापत्त्यभावलक्षणै पञ्चभि प्रमाणैरुपलब्ध। प्राधान्यख्यापनार्थं शब्दस्य भेदेन निर्देश। श्रुत इति शब्दलक्षणप्रमाणेन ज्ञातोऽर्थो वस्तुविशेषोऽन्यथा नोपपद्यत" (रु· स· ७पृ) इति शब्दस्य कल्पन श्रुतार्थापत्ति। शाब्दी ह्याकाङ्क्षा शब्दैरेव पूर्यते। नहि शाब्दाशाब्दयोरन्वय, इतरथा पठेति श्रुत्वा प्रत्यक्षादिना कर्म जानताऽप्य

(तोऽप्य) (21a)-न्वयप्रतीतिप्रसङ्गात् । 'तत् परसन्निधि प्रयोजक' इति चेन्न, नियमेन तात्पर्यावधारणस्य वाक्यार्थ प्रतीत्यसङ्गतत्वात् । अनवधारणे चोक्तमेवेत्यलमवान्तरेण बहुना। अर्थापत्तिव्यवस्थाऽपि, (?)अर्थमन्तरेण न युज्यत इति याऽर्थस्य कल्पना साऽर्थापत्ति । तत्र यथा (यया ?) मन्त्रस्तब्धोऽग्निर्न दहतीति न स्वरूपमात्रेण दाहक इति विस्फोट दाहकार्य प्रत्यक्षेणोपलभ्याग्ने र्यया दाहिकाशक्ति• कल्प्यते, सा प्रत्यक्षपूर्विकाऽर्थापत्ति । "न चेदमनुमानम्, अतीन्द्रियत्वाच्छक्ते स्वप्नेऽप्यनुपलभ्यत्वात्, अन्वय व्यतिरेकग्रहणासम्भवात् कार्यहेतुत्वायोगात् । देशान्तरप्राप्त्याऽऽदित्यस्य गतिक्रियामनुमाय गमनशक्ति कल्प्यत इत्यनुमानपूर्विका सा । एवमन्या अपि ज्ञेया "। (रु स ८पृ•) **प्रभाकरगुरुस्तूाह**[18]—दृष्ट श्रुतो वेति लौकिकीयमनाप्तोक्तिरतो लोकप्रसिद्धयोपलब्धि-मात्रे वर्तते, न तु विकल्पप्रतिपादन इति । शब्देऽपि हि कल्पितेऽर्थप्रतोत्यैव प्रकृतसमाधान, तद्वरमर्थ एव कल्प्यतामिति । तेन **भट्टमते** श्रुतार्थापत्तौ तु रात्रिभोजनमर्थ एव । अत्र च बलाबलमीमासा प्रकृतानुपयोगिनी । उभयत्र-(न)येऽपि यथाश्रुतस्योपपत्तेरित्याशयवत श्रुतार्थापत्तेर्वेत्यनास्था । **ल**(21b)-**क्षण**मुपलक्षण तेन लक्षणा लक्षणलक्षणा यथा गङ्गाया मिति सप्तमी घोषप्रतिवासक्रियाऽधिकरणप्रतिपत्तिफलेति तात्पर्यमवद्गत, न तु श्रौतोप-(त उप)लक्षणस्यार्थस्य वाक्यार्थानुप्रवेश इति । अवच्छेदतोऽपि बाधकस्य निश्चीय-मानत्वात् केवलमसौ सम्बन्धद्वारा तटमुपलक्षयन्नास्ते । तदिदमुक्त **स्वार्थमर्पयती**ति । एतेन जहत्स्वार्था लक्षणलक्षणेत्युक्त भवति । शुद्धेति पद विवृणोति **उभयेति** । क्वचिदभिव्यक्तिस्वरूपभेदयोरेव ससर्गमात्रमारोप्यते शब्दबलाद् यथा—

"प्रतीच्छत्याशोकी किशलयपरावृत्तिमधर कपोल पाण्डुत्वादवतरति तालीपरिणतिम् ।
परिम्लानप्रायामनुवदति दृष्टि कमलिनी' नवीनस्तन्वङ्ग्या मनसिजविकारो विजयते[19] ॥ इति
(स क पृ ५४ , हेम का अ वि १६८ पृ)

---

18 अर्थापत्तिरपि दृष्ट श्रुतो वाऽर्थोऽन्यथा नोपपद्यत इत्यर्थकल्पनेति शबरभाष्यम् । तदेवावलम्ब्य सम्प्रदायद्वयस्य स्वस्वसिद्धान्तप्रकटनम् । पर न चाप्यस्या प्रमाणत्वे कश्चिद्विप्रतिपद्यत इति श्लोकवार्त्तिकस्वरसान्नात्रानयो प्रमाणताया विप्रतिपत्ति ।

19 सरस्वतीकण्ठाभरणे समाधिगुणोदाहरणे पद्यमेतदुपयुक्तम् । तत्र चतुर्थ पादस्तूतो भिन्न एव नेय किन्तूपचरितैव शुद्धेति रत्नदर्पणकार । प्राचीन-नाटकादपि कस्मादेतदुद्धृत स्यात् । एवमादिषु प्रयोजनस्यातिगूढतयाऽनादरणीय-त्वाद्व्यञ्जकत्वेन न कृत्य किञ्चिदिति लोचनोक्तदिशा न व्यञ्जकत्वमाश्रयणीयम् ।

सारोपाऽन्या तु यत्रोक्तौ विषयी विषयस्तथा ॥

आरोप्यमाण· आरोपविषयश्च यत्रानपह्नुतभेदौ सामानाधिकरण्येन निर्दिश्येते सा लक्षणा सारोपा ॥

तदिदमुपचरिता वृत्ति । एतदसङ्कर **शुद्धत्वम्**। तदेतत् प्रकृतयोर्व्युत्पादयति। **अनयो- रिति** शुद्धभेदयो । लक्ष्यस्तटादिरर्थो लक्षक प्रवाहादि । **न तटस्थत्वमि**ति— अनेन 'तटस्थे लक्षणा शुद्धे'ति (अ वृ मा ५ का) भट्टमुकुलमत दूषितम्। गङ्गागता हि पावनत्वादयस्तटे प्रतिपादयितुमभीष्टास्ते च तटस्य गङ्गारूपत्वप्रतीतौ प्रतीयन्ते। न च भेदस्वभावो(वे) तटस्थ इति तटस्थत्व-(22a) प्रतिपादनमयुक्तम्। अत्र तत्- सामीप्यात्तद्धर्मानुमानमनैकान्तिक ? तदिहोपचारेण सम्बन्धमात्रमभिमतविरुद्धमवगम्येतेत्यत आह **गङ्गेति**। **भेदो** विशेष ।

सारोपेति—अन्यस्यान्यत्रावाप आरोप । अस्य च विषयत्वष्टम्भत्वाद्विषय्यारोप्य- माणोऽर्थो विषय । प्रस्तावादारोपस्य वक्ष्यमाणभेदेन सह पृथग्भाव दर्शयति— **अनपह्नुते**ति। तथेति व्याचष्टे **सामानाधिकरण्येने**ति। एतदन्यथाऽनुपपत्तिरेवात्र गौणताबीजम्। ननु चाग्नि माणवकमानयेति वाक्यानन्तर पिङ्गलमाणवकानयनदर्शना- दाख्यातार्थमुख्यतैवात्र युक्ता, न तु गौणतेति। न च सोपपदाद्धोर्मन्दप्रतीतिरल्पवि षयत्व गौणत्वमिति वाच्यम्, तेषामपि (तस्या अपि) वाचकशक्ति विनाऽसम्भवात्, तत् कुतो- ऽय गौणमुख्यप्रविभाग इति ? अत्रोच्यते—य साक्षादेव शब्दात् प्रतीयते स मुख- मिव भवतीति मुख्य·। यस्तु प्रतीतार्थावलम्बिगुणसम्बन्धिव्यवधानेन गम्यते स गुणेभ्य आगत इति गौण । ननु यद्गिरिशिखरमारुह्य प्रेक्ष्यते तदपि प्रत्यक्षेमेवेति न्यायाद् गुणव्यवधानेनापि शब्दत प्रतीयमानोऽर्थो मुख्य एवेति युज्यते, न हि स्वसामग्रीव्यवधा- (22b)न कारकाणा कारकत्व विहन्ति, अश्वेनापि ग्रामादि गच्छन् गन्तैव भवति। नैवम्। अस्त्यत्रापरोऽपि विशेष । अनादृत्यैव माणवकप्रत्यय ज्वलनमग्निशब्दात् प्रति- पन्न दृश्यत्ते(ते), न त्वनादृत्य ज्वलनप्रत्यय माणवकप्रतिपत्ति । कुत पुनरेतत्। यो योऽग्नि- सदृशो विवक्ष्यते तत्र तत्राग्निशब्दस्य प्रयोगात्तत्सादृश्यविगमे चाप्रयोगादग्निसदृशानयनेनैव पिङ्गलमाणवकानयनोपपत्तेस्तद्गुणान्तरादपि प्रयोगादग्निसादृश्य प्रवृत्तौ निमित्तम्, न तु ज्वलनेऽप्रतीते तत्सादृश्य प्रतीयते, तस्माज्ज्वलनेऽग्निशब्दो मुख्यो, माणवके तु गौण इति। तदाहु —

प्राक् प्रतीतस्य मुख्यत्व मुखतः प्रथमोद्गते ।
पश्चाद्गम्यस्य गोणत्व गुणागमनहेतुकम् ।।
स्वार्थे प्रवर्तमानेऽपि यस्यार्थ योऽवलम्बते ।
निमित्त तत्र मुख्य स्यान्निमित्ताद् गौण उच्यते ॥

तस्य च लक्षणायामन्तर्भाव इति लक्ष्यते। शुक्तिकाया रजतमिति रज्जावहिरित्येव प्रकारो योऽपदेश स भ्रातृ-(भ्रान्ति ?), मुख्यत्वेन तद्भावोपपत्तेर्न तु गोण (?)। तदुक्तम्—

सन्निहितरजतशकले रजतमतिर्भवति यादृशी सत्या ।
भेदानध्यवसायादियमपि तादृक् परिस्फुरति ।। (श्र प्र ?)

एवम् कर्णौ पिधाय य (शब्दः) श्रूयतेऽनाहताह्वय ।

न तस्याद्योद्घोष (न तस्य घोष) इत्याख्या (23a) मुख्यवृत्त्योपजायते ॥ इति। कर्णाद्वेडायां घोष इति यो व्यपदेशस्तत्र कर्णाद्वेडाया अश्रावणार्थेन (अश्रावणत्वेन) यद्यपि घोष इति व्यपदेशो न मुख्यस्तथापि यदा श्रोत्रेन्द्रियस्य बहिर्वृत्तिनिरोधाज्जाठरानल-पच्यमानान्नरसादिशब्द श्रूयते, अनाहि(ह)ताख्य शब्दब्रह्मोन्मिषति (च), तदा तयो-र्घोषव्यपदेशो मुख्य एव। कि पुनरनाहताख्य शब्दब्रह्म ? उच्यते। शब्दब्रह्मण-श्चतस्रोऽवस्था, वैखरी, मध्यमा, पश्यन्ती, सूक्ष्मेति। तथाचोक्त भाष्यकृता[20]—

अनादिनिधन ब्रह्म शब्दतत्त्व [यदक्षरम्]।
विवर्ततेऽर्थभावेन प्रक्रिया जगतो यत ॥ (वा प १।१२)
वैखरी शब्दनिष्पत्तिर्मध्यमा श्रुतिगोचरा ।
द्योतिकाऽर्थस्य पश्यन्ती सूक्ष्मा ब्रह्मैव केवलम् ॥

---

20 एवमादर्शपुस्तके। परमेतद्वाक्यपदीयवचनम्। स्फोटप्रमाणकाना वचनाना मुख्यतो वाक्यपदीयादुद्धतानामुपस्थापन ध्वन्यालोकलोचने सरस्वतीकण्ठा-भरणोपरि रत्नदर्पणे विस्तरतो विचारश्चालङ्कारकौस्तुभे कविकर्णपूरकृते तद्वि-श्लेषोऽस्मत्कृताया मौक्तिकावल्याम् (३।२०-३० पृ)। अनाहतलक्षण-ञ्चैतत्प्रसङ्गे तन्त्रशास्त्रपरिभाषितमिव प्रतिभाति। केवल बुद्ध्युपादानक्रम-रूपेत्यादि रत्नदर्पणे धृत पाठो मध्यमालक्षणपद्ये। अत्र घोष आद्योद्घोषो वा प्राचीनाना महाभाष्यकृदादीना दृष्टान्ते भेर्याघातत्वेन वर्ण्यते (१।१।६६),

तत्र वेखरो तावद्विखरो देहस्तत्र भवा वैखरो । कथमुत्पद्यत इति चेत्—

स्थानेषु विवृते वायौ कृतवर्णपरिग्रहा ।

वैखरी वाक् प्रयोक्तॄणा प्राणवृत्तिनिबन्धना ॥ (वा प १।१४३ वृ)

इयश्च चतुर्विधा, वर्णपदवाक्यवर्णसमुदायभेदात् । स्वार्थानुभवगोचरा मध्यमा यथा—

अन्त सजल्परूपाया क्रमरूपानुपातिनी ।

प्राणवृत्तिमतिक्रम्य मध्यमा वाक् प्रवर्तते ॥ (वा प १।१४३ वृ)

इयश्च द्विविधा सुखात्मिका दु खात्मिका च । ज्ञानरूपा पश्यन्ती यथा—

वाक्यपदीये प्राकृतार्थंकृतध्वनिभेदव्यवस्थापन तन्त्रादिषु "इच्छाशक्तिबलोद्घुष्टो ज्ञानशक्तिप्रदीपक । पुरूपिणी च सा शक्ति क्रियाऽऽख्या सृजति प्रभुः ॥ असावेव बिन्दुः स्थानान्तरगत पराद्याख्यो भवति'। पश्यन्ती मध्यमा चापि वैखरी शब्दजन्मभूरित्यादिरीत्या तत्प्रपञ्च । यथा दवेडा वशशलाका लक्षणया तदाश्रय क्रीडामयो व्यापार । महाभारतेऽनुगीतापर्वणि ब्राह्मणगीताख्यमर्थो विवृत 'स्थावर' जङ्गमञ्चैव विद्ध्युभे मनसी मम' इत्युपक्रम्य 'तत प्राण प्रादुरभूद्वाचमाप्याययत पुन । तस्मादुच्छ्वासमासाद्य न वाग्वदति कर्हिचित ॥ घोषिणी जातनिर्घोषा अघोषा च प्रवर्तते । तयोरपि च घोषिण्या निर्घोषैव गरीयसी ॥ गौरिव प्रसवत्यर्थान् रसमुत्तमशालिनी । सतत स्यन्दते ह्येषा शाश्वत ब्रह्मवादिनी' ॥ इत्यादिसन्दर्भे सन्तानेन 'तस्मान्मन स्थावरत्वा द्विशिष्टस्तथा देवी जङ्गमत्वाद्विशिष्टे'त्यन्तेन प्रतिपादित विवृतश्च तत्तात्पर्य भारतभावदीपे इत्यलम् । अत्रोद्धृताना वैखरीमुखाना लक्षण वाक्यपदीयवृत्तौ कुत्राप्यविकल कुत्र वा सङ्क्षिप्ततरमुपलभ्यते । लवपुरसम्पादिते वाक्यपदीये तु इत्थपठ्यते (पृ १२८-२६) । पुनश्चाह 'स्थानेषु विवृते वायौ॰ ॥१॥ केवल बुद्ध्युपादानाक्रमरूपा प्रवर्तते ॥२॥ अविभागा तु पश्यन्ती सर्वत सहृत-क्रमा । स्वरूपज्योतिरेवान्तः सूक्ष्मा वागनपायिनी ॥३॥ सेयमाकीर्यमाणाऽपि नित्यमागन्तुकैर्मलै । अन्त्या कलेव सोमस्य नात्यन्तमभिभूयते ॥४॥ तस्या दृष्टस्वरूपायामधिकारो निवर्तते । पुरुषे षोडशकले तामाहुरमृता कलाम् ॥५॥ प्राप्तोपरागरूपा सा विभ्रवैरनुषङ्गिभि । वैखरीसत्त्वमात्रेव गुणैर्न व्यवकीर्यत इति ।

विषय्यन्तःकृतेऽन्यस्मिन् सा स्यात् साध्यवसानिका ॥११॥

विषयिणाऽऽरोप्यमाणेनान्तःकृते निगीर्णे अन्यस्मिन्नारोपविषये सति साध्य-वसाना स्यात्।

भेदाविमौ च सादृश्यात् सम्बन्धान्तरतस्तथा।

गौणौ शुद्धौ च विज्ञेयौ—

इन्द्रियोपलब्धिरूपा येन्द्रियाधानसम्भवा। अप्रदर्शितभेदा च पश्यन्ती सा प्रकीर्तिता ॥

इयञ्च त्रिभेदा, हेयोपादेयोपेक्षणी (23b)-यभेदात्। योगिगोचरा सूक्ष्मा यथा—

नादाख्या सर्वभूतेषु जीवरूपेण संस्थिता। अनादिनिधना या तु सूक्ष्मा वागनपायिनी ॥

इयञ्च त्रिविधा स्थूल-सूक्ष्म पर भेदात्।

स्थूलं शब्दमिति प्राहु सूक्ष्मश्चित्ता (च्चित्त) मथो भवेत्।

चित्तया रहित (चित्तव्यवहित) यत्तु तत्पर परिकीर्तितम् ॥ इति

श्रुतिरप्याह— चत्वारि वाक् परिमितानि तानि विदुर्ब्राह्मणा [ये] मनीषिणः।

गुहा त्रीणि तानि नेङ्गयन्ति तुरीय वाचं ह वै मनुष्या वदन्ति ॥

(ऋ स १।१६४।४५)

गुहाशयेषु त्रिषु यदेतत् सूक्ष्मेति गीयते। तदनाहतमित्या[ख्यमा]-मनन्तीति।

विषय्यन्तःकृतेऽन्यस्मिन्निति—विषयसान्निध्याद्विषये विषयिमात्रप्रयोगो विषयस्य निगरणमध्यवसानमित्यनर्थान्तरम्। अस्याश्च वृत्तेस्तद्भावापत्तावन्तर्भाव श्रीभोजराज मते। यदाह—"अर्थस्यातथात्वेऽध्यासादिभिस्तथात्वोपपादन तद्भावापत्ति"रिति। (शृ प्र, २) तत्र जानतोऽप्यतस्मिंस्तदित्यारोपणमध्यास इति। **निगीर्ण** इत्युपमागर्भम्।

सादृश्यादिति—लक्षणाया सम्बन्धो न सयोगसमवायलक्षण किन्तु नियामकोपाधि-लक्षण एव, तादर्थ्यादिभिरपि तत्स्वीकारात्। तथा च सादृश्यमपि तत्कोटिनिविष्टमिति कथ गौणी भिन्ना ? आह च—

अभिधेयेन सम्बन्धात् सारूप्यात् समवायत।

वैपरीत्यात् क्रियायोगाल्लक्षणा पञ्चधा मता[21] ॥ इति

(24a) द्विरेफशब्दस्य द्वौ रेफौ यस्येति कृत्वा योऽभिधेयोऽत्र भ्रमरशब्दस्तेन यस्य सम्बन्धः षट्पदलक्षणस्यार्थस्य सोऽर्थो द्विरेफशब्देन लक्ष्यते। [एवम्] रोदरश्चक्रवाक इति। रूढलक्षणा चेय, तेन द्विरेफत्व रोदरत्वञ्च यद्यपि कुररेऽपि सम्भवति तथापि स न

---

21 प्राचीनमीमांसकभर्तृमित्रस्येय कारिकेति भट्टमुकुल। ध्वन्यालोकलोचना-दावपीयमुदाहृता विशदञ्च तत्र व्याकृता।

इमावारोपाध्यवसानरूपौ सादृश्यहेतू भेदौ 'गौर्वाहीकः' इत्यत्र 'गौरयम्' इत्यत्र च। अत्र हि स्वार्थसहचारिणो गुणा जाड्यमान्द्यादयो लक्ष्यमाणा अपि गोशब्दस्य परार्थाभिधाने प्रवृत्तिनिमित्तत्वमुपयान्तीति केचित्। स्वार्थसहचारिगुणाभेदेन परार्थगता गुणा एव लक्ष्यन्ते न परार्थोऽभिधीयत इत्यन्ये। साधारणगुणाश्रयत्वेन परार्थ एव लक्ष्यत इत्यपरे।

लक्ष्यत इति[22]। एवमभिधेयेन सम्बन्ध व्याख्यातरूप निमित्तीकृत्य सादृश्यादयो व्याख्येया। **वामनो**ऽप्याह—'सादृश्याल्लक्षणा वक्रोक्ति'रिति (का अ सू वृ ४।३।८)। समवायत सम्बन्धादित्यर्थः। क्रियायोगात् कार्यकारणभावादित्यर्थः। अतो गौण्या लक्षणाया-मन्तर्भावात् **सम्बन्धान्तरमि**त्यत्रान्तरशब्द सादृश्यादन्यत्वमाह **इमावि**त्यादि। तथा सारोपाधि(ध्य)वसाने इत्यनुकर्षणे वा(ना) सङ्गति, अतो रूपशब्देन पूरणि-(रूपपि ?)[23] सादृश्याद्गौणो सम्बन्धान्तर[त] शुद्धाविति यथाक्रममन्वय। तत्र गौणी यथा **"गौ र्वाहीकः" "गौरय"**मिति। **अत्र हीति**—गोशब्दो लक्षणया जाड्य-मान्द्यादीन्युपस्थापयति। निमित्तश्च स्वार्थेन गोवि (गवि) जात्या (जाड्यात्) सामानाधिकरण्यम्। तत्रस्थान्येव प्रवृत्तिनिमित्तीकृत्य वाहीकमभिधत्त इति **केचिदा**हु। तदसत्, शक्तिगौरवात्, लाघवार्थमेव च लक्षणाऽङ्गीकारात्। अतो मतान्तरमाह—**स्वार्थे**ति। गुणाभेदेन स्वार्थ-सहचरितगुणैकजातीयत्वेन (24b) परार्थवृत्तिगुणमात्र **लक्ष्यते** परार्थस्तु(त्व)क्षिप्यत इति। इदमपि न सम्यक्, [गो]पदात् परार्थोपस्थितिप्रसङ्गात्। अत स्वमतमाह—

---

22 रोदरत्वमिति चक्रवाककुररपदयोर्वर्णविश्लेषे 'च् अ क् र् अ व् आ क् अ', 'क् उ र् अ र् अ' इत्येव वर्णविन्यासगर्भे 'र' वर्णस्य मध्यपातित्वम्। लोचनग्रन्थस्योपयोगोऽत्र टीकाकृता कृत इति नातिरोहितमेव।

23 आरोपाध्यवसानरूपाविति प्रतीक गलित स्यात्। 'प्रशसाया रूप'-(पा ५।३।६६)बित्यादिना प्राशस्त्यबोधको रूपप्प्रत्ययो गुणाधानार्थ इति टीकाकृता-माशय प्रतिभाति। प्रकृत्यर्थस्य परिपूर्णतेह प्रशसेति वैयाकरणाना विवरण-मुपचारस्वरूपं समादधदेतदुपयोगि। अत्यन्त विशकलितयो सादृश्यातिशय-महिम्ना भेदप्रतीतिस्थगनेन परिपूर्णतायामालङ्कारिक सिद्धान्तेनोपचारस्थापनमु-पचारे च गौणी। प्रत्ययस्य 'रूपशब्द' इति निर्देशेन सह टीकाकृत 'अत्र कल्पपदेने'ति चतुर्थोल्लासस्यान्तिमे भागे प्रयोगस्तुलनीय।

उक्तश्चान्यत्र—"अभिधेयाविनाभूतप्रतीतिर्लक्षणोच्यते ।

लक्ष्यमाणगुणैर्योगाद्वृत्तेरिष्टा तु गौणता" (त वा ३।४।१२) इति।

अविनाभावोऽत्र सम्बन्धमात्र न तु नान्तरीयकत्वम्। तत्त्वे हि 'मञ्चाः क्रोशन्ति' इत्यादौ न लक्षणा स्यात्। अविनाभावो वाऽऽक्षेपेणैव सिद्धेर्लक्षणाया नोपयोग इत्युक्तम्। 'आयुर्घृतम्' 'आयुरेवेद'मित्यादौ च सादृश्यादन्यत् कार्य-कारणभावादि सम्बन्धान्तरम्। एवमादौ च कार्यकारणभावादिलक्षणपूर्

साधारणेति। प्रकृते तु पक्षत्रयोक्तेऽपि न काचित् क्षति [24]। अत्रैव प्रामाणिक [भट्ट]-सङ्गति (सम्मति) माह—**अभिधेयेति**। वाच्यसम्बन्धिनमर्थं प्रत्येतु या शब्दव्यापार-भूता **प्रतीतिः** सा लक्षणेति यदि वा प्रतीयतेऽनयेति प्रतीतिर्ज्ञानानुकुला वृत्तिः। यद्यप्य-परार्धमात्रमेव प्रस्तुतोपयोगि तथापि लक्षणाविशेषत्व गुणवृत्तेराख्यातु पूर्वार्धमपि लिखित-वान्। ननु यद्यविनाभावो लक्षणानिमित्त कथ न प्रागुक्तयोगमात्रहानि ? अत आह—**अविनाभाव** इति। सम्बन्धमात्रमविनाभावपदेन वार्त्तिकेऽभिमतम्, कथमन्यथा मञ्चा क्रोशन्तीत्येवमादौ लक्षणा ? अत्रापि केचिदाचार्यदेशीया कथञ्चिदविनाभाव समर्थयन्ते। तदाह **अविनाभावो वे**ति—गृहीतव्याप्ते पक्षधर्मतादर्शनात् परामर्शोदये-ऽनुमितिसामग्री सम्भूतेति न शब्दव्यापारसिद्धि। **उक्तमिति**—व्यक्तयविनाभावित्वादिति। अत्रान्तरे शुद्धभेदद्वयमुदाहरति—**आयुरिति**। **सादृश्यादन्यदि**ति सम्बन्धान्तरपद-

---

24 टीकाकृत्तु 'केचित्' 'अन्ये' 'अपरे' इति वृत्तिपरामर्शादेव मन्यते। 'अपरे' इति निर्दिष्टेनान्तिमपदेन स्वमतमित्यपि लिखतीति विचित्रा शैली! एतदनन्तरवाक्ये यद्भट्टपद तत्त्वादर्शपुस्तके लिपिकारानवधानात् पूर्वतरे वाक्ये प्रवेशितम्। मूलकोष एकत्रस्थित गलितसूचकचिह्नमन्यपङ्क्तिविपर्यासतोऽन्यथोद्-बुद्धमिति स्यात्। मानान्तरविरुद्धे तु मुख्यार्थस्य परिग्रह इति मूल-भट्टवार्त्तिकीयपङ्क्तिरिहादौ परामर्शनीया। भट्टवार्त्तिकमते गौणीलक्षणयो-र्भिन्नवृत्तित्वमापतेत्। अत्र मूले त्वन्यथा सिद्धान्तितमिति श्रीधरकृतनिर्णय। भट्टवचनस्थ [तु] पदस्यान्यथा समर्थनेन स्वनिर्णयानुकूल सम्बन्धमात्रमविनाभाव-पदेनेत्यादिनाऽत्र विवृतम्। चण्डीदासस्तु (४८-४६ पृ) भट्टवार्त्तिकीयभेद स्वीकुर्व-न्नपि मूले तस्य प्रतिध्वनिमुपलभमान इव मम्मटोपरि विषमुद्गीर्यालङ्कारशास्त्र-प्रामाण्ये पूर्वमीमांसकाद्युद्भाविततर्कवैतथ्यमुपपादयन्नुपसंहरति।

आरोपाध्यवसाने। अत्र गौणभेदयोर्भेदेऽपि ताद्रूप्यप्रतीतिः सर्वथैवाभेदागमश्च प्रयोजनम्। शुद्धभेदयोस्त्वन्यवैलक्षण्येनाव्यभिचारेण च कार्यकारित्वादि। क्वचित् तादर्थ्यादुपचारो यथा इन्द्रार्था स्थूणा इन्द्रः। क्वचित् स्वस्वामिभावाद् यथा राजकीयः पुरुषो राजा। क्वचिदवयवावयविभावाद् यथाऽग्रहस्त इत्यत्राग्रमात्रेऽवयवे हस्तः। क्वचित् तात्कर्म्याद् यथाऽतक्षा तक्षा।

लक्षणा तेन षड्विधा ॥१२॥

आद्यभेदाभ्यां सह। सा च

व्यङ्ग्येन रहिता रूढौ सहिता तु प्रयोजने।

प्रयोजनं हि व्यञ्जनव्यापारगम्यमेव।

तच्च गूढमगूढं वा—

व्याख्यानम्। **ताद्रूप्येति सर्वथेति** चेति यथासङ्ख्यम्। एवं तादर्थ्यादिलक्षणास्वपि द्रष्टव्यम्। **अग्रहस्त** इति—"इह हस्ता (25a)ग्रमग्रहस्त इति प्रयोगद्वयं दृश्यते, तत्राद्ये षष्ठीसमासः, द्वितीये तु सामानाधिकरण्ये विशेषणसमासः। तत्र हस्तावयवेऽग्रमात्रे हस्तशब्दो 'ग्रामो दग्ध' इत्यादिवदवयवे समुदायोपचाराद्वर्तते। तदुक्तं **वामनेन** 'हस्ताग्राग्रहस्तशब्दौ गुणगुणिनो र्भेदाभेदाभ्या'मिति (का अ सू वृ ५।२।२०)। विपरीतलक्षणा प्रागेवोदाहृतेति न पुनरुपन्यस्तवान्।

षड्विधेति—उपाधिसङ्कलनमिदम्। तत्रानन्तरं चतुर्णामेव प्रकाराणामभिधानाद् दूरान्तरितं प्रकारद्वयं स्मारितम्। **आद्येति**—उपादानलक्षणालक्षणलक्षणाभ्यां सहेति। तदयं परमार्थः—लक्षणाद्वयी रूढा चारूढा च। प्रत्येकमुपादानलक्षण-लक्षणलक्षणाभ्यां चत्वारो भेदाः। तत्रापि प्रभिद्य सारोपा-साध्यवसानाभ्यामष्टौ। तत्रापि सादृश्यसम्बन्धान्तराभ्यां षोडशेति।

सोऽयं ध्वनौ निर्णेतव्ये लक्षणाप्रपञ्चविवेकं (विवेचनं) किमर्थमित्याशङ्क्य विवक्षितविवेकं करोति सूत्रकार इत्याह **सा चेति**। तेन रूढिलक्षणा हेयकोटिः। प्रयोजनवतीमुपादाय तत्पृष्ठे व्यङ्ग्योद्दङ्कनेन विवक्षितवाच्यस्य वक्ष्यमाणत्वात्। ननु प्रयोजनस्य प्रतिभासमात्रेण कथं व्यङ्ग्यसद्भाव इत्यत आह **प्रयोजनं हीति**। यस्मात् प्रयोजनाद् गो(व्यङ्ग्यो?)-व्यञ्जनादेवावगम्यते ततस्ते (25b)-नैव **व्यङ्ग्येन सहितेति**। ततः किं सर्वत्र प्रयोजनलक्षणा

तच्चेति व्यङ्ग्यम्। गूढ यथा—

मुख विकसितस्मित वशितवक्रिम प्रेक्षित
समुच्छलितविभ्रमा गतिरपास्तसस्था मति·।
उरो मुकुलितस्तन जघनमंसबन्धोद्धुर
बतेन्दुवदनातनौ तरुणिमोद्गमो मोदते ॥९॥ (ध्व आ लो ६३ पृ)

ध्वनिमूलमित्याह **तच्चेति**। **'वा'** शब्द समुच्चये, लक्ष्यापेक्षया विकल्प इति केचित्। **गूढ** काव्यतत्त्वार्थपारावारीणमतिविभवलक्षणसहृदयप्रतिभामात्रप्रकाशनीयम्। **अगूढ** सहृ(द)याहृदयसाधारणप्रतिभासम्। आभ्यामेव भेदाभ्या ध्वनिर्गुणीभूतव्यङ्ग्य [च] वक्ष्यते। व्यङ्ग्येनेति कारिकाया प्रक्रान्तमतो व्याचष्टे **तच्चेति**। **व्यङ्ग्यमिति**—आत्मनो विभुत्वेऽपि यथाविशिष्टाधिष्ठानयुक्तशरीर एव जीवव्यवहारो न तु घटादौ, तथा ललितोचित-सन्निवेशचारुणि शब्दार्थशरीर एव ध्वनिव्यवहारो न पुन "मिहो वटु"रित्यादौ, शौर्यातिशयव्यङ्ग्यसम्भवेऽपि श्रुतार्थापत्ताविवार्थान्तरस्याभिधेयार्थोपपादन एव पर्यवसानादिति भाव। अतएव हृदयदर्पणे यदुक्त 'सर्वत्र काव्यव्यवहार स्यादि'ति तदपहस्तितम्[25]। गूढागूढविभागश्चाय न कल्पनामात्रमूल किन्तु लक्ष्यप्रसिद्धिमवतीर्ण इति दुर्रूढप्रबोधार्थ मुदाहरणद्वयमाह—**यथेति**। **विकसितस्मितमिति** "अत्र विकसितत्वेन प्रसृतत्व वशित-त्वेनायतत्वमेव समुच्छलितत्वादिनोल्लसितत्वादि च लक्ष्यते। प्रयोजनत्वञ्च तेषामेवा-सविज्ञानपदनिबन्धन लोकोत्तरसातिशयत्वम्। तथाहि ल-(26a)क्ष्य धर्मधर्मिभेदाद्द्विविधम्। तत्र धर्मी यत्र लक्ष्यते तत्र धर्मा प्रयोजनम्, यथा गङ्गाशब्देन तटे लक्ष्ये पावनत्वादय। यत्र तु धर्मा एव लक्ष्या न तत्र धर्मान्तराणि प्रयोजनीभूतानि सम्भवन्ति, धर्माणा धर्मान्तरा-भावात्, अपि तु तत्र तेषामेव सातिशयत्व प्रयोजनम्। यथा 'रामोऽस्मी'त्यादौ रामपदेन राज्यभ्रशवनवासादिधर्मेषु लक्षितेषु लोकातिक्रान्तातिशयत्वमेव प्रयोजनम्, एवमिहापि बोद्धव्यम्" (रु स ८ पृ·)। यत्तु **हृदयदर्पण** उक्तम्—'रामोऽस्मीत्यादो हृहा-हेति सरम्भोत्थोऽय चमत्कार' इति। तत्रापि सरम्भ आवेगो विप्रलम्भव्यभिचारी[ति] रसध्वनिस्तावदुपगत। न च 'राम'शब्दाभिव्यक्तधर्मान्तरसाचिव्यमन्तरेण सरम्भोल्लासोऽपि। अह सहे तस्या कि वर्तत इत्येवमामोद (मात्मा हि) सरम्भ।" (ध्व आ लो ६३ पृ)

---

25 सर्वमेतदिहोत्तरत्राप्यनुमानखण्डनादिध्वनिध्वंसनाक्षेपविषयक ध्वन्यालोकलोचनतो गृहीतम्।

अगूढ यथा—

श्रीपरिचयाज्जडा अपि भवन्त्यभिज्ञा विदग्धचरितानाम्।

उपदिशति कामिनीनां यौवनमद एव ललितानि ॥१०॥ (रविगुप्तस्य)

अत्रोपदिशतीति ।

तदेषा कथिता त्रिधा ॥१३॥

अव्यङ्ग्या गूढव्यङ्ग्याऽगूढव्यङ्ग्या च ।

तद्भूर्लाक्षणिकः—

शब्द इति सम्बध्यते । तद्भूस्तदाश्रय ।

तत्र व्यापारो व्यञ्जनात्मकः ।

कुत इत्याह—

यस्य प्रतीतिमाधातु लक्षणा समुपास्यते ॥१४॥

फले शब्दैकगम्येऽत्र व्यञ्जनान्नापरा क्रिया ।

किञ्च 'यस्य मित्ताएयमित्राणी'-(४र्थ उ ७३ श्लो)त्यादौ धर्मान्तरपरिणत सञ्ज्ञिविशेष मित्तादिशब्दा यत् प्रतिपादयन्ति तत्र सरम्भस्य सम्भावनाऽपि नास्तीत्यास्तामेतत् । **उपदिशतीति**—'अत्राप्रयासेन शिक्षादानमभिधेयवत् स्फुट प्रतीयते' (रु. सं ८ पृ) **तदेषेति** वाचा [त्रिधा] कराठत षोढा अर्थतश्च षोडशव(धा) व्याख्याता । तेन प्रयोजनवतीद्विधोपादाय सा शृङ्खला योजयितव्येति भाव । व्यङ्ग्येन रहिता सहिता चेति द्वैविध्यमुपक्रम्य **त्रिधेत्यु**पसहारग्रन्थो विरुद्ध (26b) इव प्रतिभासते, अत आह—**अव्यङ्ग्या गूढव्यङ्ग्याऽगूढव्यङ्ग्या चे**ति—द्वन्द्वपरवर्तिनो व्यङ्ग्यशब्दस्य प्रत्येकमन्वय ।

एवं लक्षणास्वरूप विविच्य प्रकृत उपयोजयति **तद्भूरि**ति। [शब्द इति] प्रकान्तविशेष्यपदमिहापि सम्बन्धनीयमित्याह **शब्द इति** । ततो भवतीत्यसङ्गतार्थभ्रम निवारयति **तदाश्रय** इति—तस्या लक्षणाया भूर्भूमिराश्रय , व्यापारस्य व्यापारितन्त्रत्वादित्यर्थः । व्यङ्ग्येन सहितेत्युक्त तत् साधयितुमभ्युपगमवाक्य सूत्रप्रतीक **तत्रेति** । प्रयोजनवल्लक्षणावृत्तौ शाब्दव्यापार प्रयोजनप्रतीत्यनुगुण इति शेषः । अत्र शिष्यजिज्ञासामनूद्य प्रमाणमवतारयति **कुत** इत्यादि । **आधातु**मुत्पादयितु तुमन्प्रत्ययेनोद्दिश्य तामाह । उद्देशना च प्रतिपिपादयिषैव । सैव रूढिलक्षणाया प्रयोजिका, अन्यथा "काश्चिन्नैव त्वशक्तित" (तन्त्र वा ७म उ उद्धति)

इति निषिद्धस्य प्रयोगे दुष्टतैव स्यात् । नन्वस्तु प्रतीति, तथापि कथ ध्वननसिद्धि ? अत आह **शब्दैकगम्य** इति—विवक्षिततमे लक्षि[त] मात्रे गम्ये। अभिधाऽऽदिभि सिद्धसाधन-माशङ्क्याह **नापरेति** । **क्रिया** व्यापार, भाव्यनिष्ठस्य भावकव्यापारस्यैव करोत्यर्थत्वात् । अयमभिसन्धि —अस्ति तावत् 'किमिव हि मधुराणा मण्डन नाकृतीना'-(अभि श १।१३) मित्यत्र मधुरपदश्रवणा-(27a) नन्तर यथा शर्करादिमाधुर्यमविवेकिनो विवेकिनो वा झटिति साक्षात्कारमात्रगोचर चमत्कारमर्पयति तथा वर्णनीयाऽऽकृतिरिति सहृदयावर्जकविशेष-प्रतिपत्ति । सा च न स्मृतिरननुभूतविषयत्वात् । अनुभूतिस्तु(श्च) प्रत्यक्षाद्य-न्यतमत् करणमपेक्षते, तत्र[प्रत्यक्षो]पमा(ना)दीनामसम्भावनीयत्वाल्लिङ्ग वा शब्दो वेति द्वयमवतिष्ठते । तयोराद्यस्तावन्न सम्भवति, मधुरपदप्रयोगस्य व्यभिचारित्वात्तद्व्याप्यत्वा-सिद्धे । यत्र यत्रैव महाकवय• प्रयुञ्जते तत्र तत्रानुमेति चेत, न, व्याप्तिग्रहणकाले मौलिकस्य प्रमाणस्याभावात् । स्यादेतत्, 'गुणवृत्तौ गिरा यावत् सामग्रीष्टा निबन्धन सैव लिङ्ग भविष्यतो'[26]-(व्य वि १।४५) ति, नैतत् मुख्याथानुपपत्त्यादेरेव सामग्रीत्वात्, तस्याश्च प्रयोजनप्रतीतिप्रतिबन्धे मानाभावात् । अत शब्द एव करणम् । सोऽपि मधुरादिरेव स्यादन्यो वा ? नान्य, कस्यचिदसन्निधे कस्यचिदवर्जनीयसन्निधित्वात् । न (स)चाभिमत शब्दो विना व्यापारेण ज्ञान जनयति । स च [व्यापारो] व्यञ्जनमेव । व्याचष्टे **प्रयोजने-**

---

26 "सैव लिङ्गतयाऽस्माभिरिष्यतेऽर्थान्तर प्रती' त्युत्तरार्ध पाठो व्यक्तिविवेकीयसग्रह-श्लोके । अत्र भूमिकाया सूत्रपातनमिव प्रस्तुतस्य मुखबन्ध इव वा य प्रकारोऽनुसृतो ग्रन्थकृता तस्यैव विवरण टीकायाम् । पञ्चमोल्लासोत्तरार्ध-प्रतिपाद्यस्य व्यञ्जनव्यापारस्यानन्यतन्त्रतासमर्थकस्य तत्रैवाबीज फलपाकप्रभृति-प्रदर्शने सौष्ठव स्यात् । काव्यपुरुषावतारस्य ध्वनिप्रस्थानस्थापयितुः श्रीमदानन्द-वर्धनाचार्यस्य ध्वन्यालोके प्रथमोद्द्योते सैव प्रक्रिया या क्वचित् सूत्राकाराऽपि यथा ध्वनिलक्षणस्थापने, 'शब्दो नैव स्खलद्गति' रित्यादो वा, क्वचिच्च प्रपञ्च-पञ्चनपरा यथाऽलङ्काराणामापाततो ध्वनिना समानावकाशाना पृथक् पृथग्विवेचने लक्षणोपलक्षणयोर्भेदप्रदर्शनादौ वा एकार्थीभूता । नव्यतन्त्रतन्त्रयितृलोचन-कृत्कृता विषयस्यैव द्विधा विभक्तिरादिमोद्द्योतद्वयविवरणे । सर्वथेतरत्रैकार्थ्य-मनुसरन्नपि ग्रन्थरचनाया मम्मटभट्टस्तत्रैतामेव च्छिन्नप्राया प्रणालीमनु-सरति ।

प्रयोजनप्रतिपिपादयिषया यत्र लक्षणया शब्दप्रयोगस्तत्र नान्यतस्तत्प्रतीतिरपि तु तस्मादेव शब्दात्। न चात्र व्यञ्जनादृतेऽन्यो व्यापारः। तथाहि—

नाभिधा समयाभावात्—

गङ्गायां घोष इत्यादौ ये पावनत्वादयो धर्मास्तटादौ प्रतीयन्ते न तत्र गङ्गादिशब्दा सङ्केतिता.।

हेत्वभावान्नलक्षणा ॥१५॥

मुख्यार्थबाधादित्रय हेतु.।

तथाच

लक्ष्य न मुख्य नाप्यत्र बाधो योग फलेन नो।
न प्रयोजनमेतस्मिन् न च शब्द. स्खलद्गतिः ॥१६॥

त्यादि। ननु भवतु शब्दव्यापार, स पुनरभिधाऽऽदिभ्यो न व्यतिरिच्यत इत्याह **तथाहीति।** समयापेक्षया (पेक्षा) हि प्रतिपादनाशक्तिरभिधा—न च गङ्गा (27b)पदात् पावनत्वादिप्रतीतिर्भवन्ती समयमपेक्षते, तदिदमुक्त "**न तत्र सङ्केतिता**" इति। नापि तात्पर्यशक्तिस्तस्या ससर्गभेदेव(भेद एव) पर्यवसानादिति पूरणीयम्। अतएव हि 'ते चाभिधातात्पर्यलक्षणाभ्यो व्यापारान्तरेण गम्या' (१८ का वृत्ति) इत्युपसहारग्रन्थो घटते। अस्तु तर्हि तृतीयकक्षापातिनी लक्षणा, इत्यत आह—**हेत्वभावादिति। तथाचेति**—यथा मुख्यार्थबाधादित्रय न निमित्ततया सम्भाव्यते तथेदमुच्यत इति। **लक्ष्य न मुख्य**मिति—"इद प्रयोजनवत्त्वस्य लक्षणीयत्वसम्भावनायामुत्तरम्। तत्र मुख्यार्थबाधसम्बन्धे प्रयोजने [च] सति लक्षणा प्रवर्तते। न च प्रयोजने लक्षयितव्ये त्रयमेतत् सम्भवति। तथाहि तटादेर्लक्ष्यस्य बाधे प्रयोजनं लक्ष्य स्यात, न च तदभिप्रायेण मुख्यार्थबाधो घटते, न हि तटादिर्मुख्योऽर्थो, लक्षणीयत्वात्। नापि तस्य बाधस्तस्य घोषाधिकरणत्वोपपत्ते। अपि च सम्बन्धनिबन्धना लक्षणा प्रयोजने प्रवर्तितु नार्हति, तटादेर्लक्ष्यस्य पावनत्वादेश्च प्रयोजनस्य सम्बन्धाभावाद्, गङ्गागता हि पावनत्वादयस्तटे प्रतिपाद्या न स्वगता, स्वगताना स्वप्रतिपाद्यताऽर्हत्वात्। न च गङ्गागतपावनत्वादिभिस्तटेन कश्चित् सम्बन्ध'। अतएव 'तटस्थे लक्षणा शुद्धे'ति (अ वृ मा) प्रागदूषितम्। किञ्च प्रयोजने लक्ष-(28a)णीये लक्ष्यत्वादेव प्रयोजन मार्गणीयम्। न च तदस्ति। नापि युज्यते।" (ह सं ८-९ पृ.) लक्ष्यमाणत्वप्रयोजनान्तरानुसरणशरणतायामनवस्थाप्रसङ्गादित्याह **एवमपीति**—न च बीजाङ्कुरादिव-

यथा गङ्गाशब्दः स्रोतसि सबाध इति तट लक्षयति तद्वद् यदि तटेऽपि सबाधः स्यात् तत् प्रयोजन लक्षयेत्। न च तटं मुख्योऽर्थः। नाप्यत्र बाधः। न च गङ्गाशब्दार्थस्य तटस्य पावनत्वाद्यैर्लक्षणीयैः सम्बन्ध.। नापि प्रयोजने लक्ष्ये किञ्चित् प्रयोजनम्। नापि गङ्गाशब्दस्तटमिव प्रयोजनं प्रतिपादयितुमसमर्थः।

एवमप्यनवस्था स्याद् या मूलक्षतिकारिणी।

एवमपि प्रयोजन चेल्लक्ष्यते तत् प्रयोजनान्तरेण तदपि प्रयोजनान्तरेणेति प्रकृताप्रतीतिकृदनवस्था भवेत्।

ननु पावनत्वादिधर्मयुक्तमेव तट लक्ष्यते, 'गङ्गायास्तटे घोष' इत्यतोऽधिकस्यार्थस्य प्रतीतिश्च प्रयोजनमिति विशिष्टे लक्षणा तत् किं व्यञ्जनयेत्याह—

प्रयोजनेन सहित लक्षणीय न युज्यते ॥१७॥

ददोष प्राथमिकप्रतीतिहेतुभङ्गत्वादित्याह—**या मूलक्षतिकारिणी**ति, तदित्थ "तावत्तित्या-भावात् प्रयोजने लक्षणा न युज्यते, अपि च लक्षणीयेऽर्थे शब्दस्य स्खलद्गतित्व प्रतिपादयितु शब्दो न शक्तो निराकाङ्क्षत्वेन तत्रैव विश्रान्ते। मुख्यार्थबाधात्तु स्खलद्‌गतित्वं न शङ्कनीयम्। वाच्याभिप्रायेण मुख्यार्थबाधो लक्ष्याभिप्रायेण तु न(?) स्खलद्गतित्वमिति महाननयोर्भेद। तस्मात् प्रयोजनलक्षणाया असम्भवे व्यञ्जनमेव शब्दव्यापार इति स्थितम्" (रु. स ६पृ.)।

प्रयोजनेन सहितमिति—"कश्चिद् ब्रूयाद्, गङ्गाया घोष इत्यादौ पावनत्वादिप्रयोजन-विशिष्टमेव तटादि लक्षयिष्यते, तस्यैव प्रत्य(त्ये)यत्वात्, एवञ्च नास्ति व्यञ्जनव्यापारस्य विषय इति। तत्रोच्यते—लक्षणाया प्रयोजनं प्रस्तुतं, लक्षणा च शब्दव्यापार। व्यापारश्च विषयनिष्ठ एव, तन्मुखेन स्वरूपप्रतिलम्भात्। विषयश्चात्र प्रत्येयत्वात् प्रतीति-गोचरत्वेन, न सम्पाद्यत्वेन। एवञ्च लक्षणाया प्रयोजनमिति भणिते यादृशी लक्षणा तादृश्या प्रयोजनं वाच्यम्, प्रत्येयविषयनिष्ठशब्दव्यापाररूपा हि लक्षणा, (28b) तस्या गर्भीकृत (प्रयोजन) विषयाया प्रयोजनविषये कोऽवसर. प्रयोजनस्य? लक्षणाविषयत्वेन गर्भीकृतत्वभङ्गया हि विषयस्य प्रयोजन, न तु प्रयोजन विषयः। तत्तु प्रत्येयतया विषयत्वेन विचार्यमाणं तदतिरिक्तव्यापारान्तरविषयो भवितुमर्हति, उत्तरकालिकत्वात्। तच्च व्यापारा-न्तरं व्यञ्जनमेव। एतादृशी चोपपत्तिर्ग्रन्थकृता दृष्टान्तमुखेन प्रकाशिता" (रु स ६पृ)।

कुत इत्याह—

ज्ञानस्य विषयो ह्यन्यः फलमन्यदुदाहृतम्।
प्रत्यक्षादेर्नीलादिर्विषयः। फल तु प्रकटता सवित्तिर्वा ॥

फल प्रकटयति (**प्रकटतेति**) ज्ञानज्ञेयभावनियामको ज्ञेयगतो ज्ञाततालक्षणो धर्म प्रकटता। तथाच ज्ञानस्य परोक्षत्वप्रतिपादनार्थं **भट्टाचार्येणोक्तम्**[27] (?) यथा रूपादिप्रकाशान्यथाऽनुपपत्त्येन्द्रियसिद्धिस्तथा ज्ञानस्यापि सिद्धिरिति। तथाहि तस्य(?) भाष्यम् 'न हि कश्चिदज्ञातेऽर्थे बुद्धिमुपलभते ज्ञाते त्वनुमानादवगच्छति' (श भा १।१।५) वार्त्तिकञ्च 'तस्य ज्ञानं ज्ञाततावशा'दिति 'ज्ञातता च विषयप्राकट्यमुच्यत'-(त वा) इति। सम्यग्वित्ति **सवित्तिर**नुव्यवसायात्मक ज्ञानमित्यर्थ। व्यवसायो हि ज्ञान यथाऽयं घट इति ज्ञान, तद्विषय तु ज्ञानमनुव्यवसायो यथा घटमह जानामीति वैशेषिकादय। एवञ्च केनचिदभियुक्तेन ध्वनिध्वंसनामनि स्वप्रकरणे यद्गर्जितम्[28] 'यद्येन न साध्यते तस्यापि तत्प्रयोजनत्वे सर्वस्य सर्वप्रयोजनत्वप्रसङ्ग, ततस्तत्साध्यत्व-विपक्षादतस्तत्साधकत्वात् (29a)तत्प्रयोजनत्व व्यावर्तमान तत्साध्यत्वेन व्याप्यते। ततश्च यद्यत्प्रयोजन तत्तत्साध्य यथा पाकादिफलभूतमोदनादि। लक्षणाप्रयोजनञ्च पावनत्वादि

27 एव श्लोकवार्त्तिके भट्टा—नित्य सत्सु यथा लोके रूपादिषु घटे पृथक्। चक्षुराद्यनुरोधेन सवित्तिर्व्यवतिष्ठते ॥ एवमेव घटत्वादौ सर्वान् प्रति भवन्त्यपि। वाचकस्मृतिभेदेन सवित्तिर्व्यवतिष्ठते ॥ तस्माद्बुद्धि स्थितोऽप्यात्मा नराणा चक्षुरादिभिः। प्राप्य वाऽप्राप्य वा बुद्धेर्विषयत्वेन कल्प्यते ॥ तत्र सुचरित-मिश्राश्च 'सिद्ध तावत् प्रतीतिबलाद्बाह्यालम्बन ज्ञानमिति, स बाह्योऽर्थात्मा प्राप्यैवेन्द्रियै प्रकाश्यते' इति। २य खण्डे (१८१-८२ पृ)

28 इत्थं "उपादायापि ये हेयास्तानुपायान् प्रचक्षते। उपायाना हि नियमो नावश्य-मुपतिष्ठत" इति न्यायेन वाक्यबोधज्ञानपरिच्छेदयोर्मीमासकमत शरणीकुर्वता-मप्यस्माकमस्मदुपजीव्यव्यञ्जनाविषये न तै सवाद इति दर्शयितुम् 'एवञ्च केनचिदभियुक्तेने'त्याद्यवतारए टीकायाम्। 'इदन्तावदय प्रतीतिज्ञो मीमांसक' इति "मीमांसकस्य प्रपौत्र प्रति नैमित्तिकत्वमभिमत"मिति, "श्रोत्रियस्यानुवाकहतबुद्धे-रतिकौशलमि"ति, 'जैमिनिसूत्रे ह्येव योज्यते न काव्येऽपी'त्यादिविशेषणैस्तस्याभि-युक्तस्य हृदयदर्पणकर्तुर्भट्टनायकाचार्यस्य नव्यालङ्कारिकसिद्धान्ते तिरस्कारो-प्येतदर्थोऽन्वर्थ एव।

विशिष्टे लक्षणा नैव

व्याख्यातम् ।

विशेषा. स्युस्तु लक्षिते ॥१८॥

तटादौ ये विशेषाः पावनत्वादयस्ते चाभिधातात्पर्यलक्षणाभ्यो व्यापारान्तरेण गम्याः । तच्च व्यञ्जनध्वननद्योतनादिशब्दवाच्यमवश्यमेषितव्यम् ।

तस्मात्तत्साध्यतयाऽस्यापि प्रतीतिरित्यादि, तत् साध्यत्वसाधनात् प्रत्येयत्वेन च विषयत्वस्यासमर्थनान्नि सारमेवेति नेह विस्तारितम् । यत्तु ओदनादे पाकविषयत्वमुच्यते तदुद्देश्यत्वात्, न प्रतीतिगोचरत्वात् । प्रतीतिगोचरत्वञ्चेह प्रस्तुतमित्यल दु समर्थसमर्थनेन । अन्ये तु पावनादिविशिष्टे लक्षणामित्थ दूषयन्ति । अनन्वयप्रभवाऽन्वयपर्यवसायिनी च लक्षणा न्याय्या, अन्यथा भेदाश्रयणस्य निर्हेतुक(त्व) स्यात् । एव मुख्यार्थबाधापर्यवसायिनाऽनन्वयेन समुत्थापिता लक्षणा येन विनाऽन्वयघटन न स्यात्तदेव विषयीकरोति, नातिरिक्त किञ्चित् । कठिनद्रव्यञ्च तटादिक विना 'गङ्गायां घोष' इत्यादौ न भवत्यन्वयो न तु पावनत्वादिभिर्विनेति तदेव लक्षणीयम्, न नु (न तु) पावनत्वादि प्रयोजनभुतमिति । तदत्र व्यञ्जनमेव साधु ।" उपसहरति—**विशिष्टे लक्षणा नैवमि**ति—अयञ्च सूत्रभाग उपसंहार्यव्याख्ययैव व्याख्यात इत्यत **व्याख्यातमिति । विशेषा. स्युरि**ति सम्भावनाप्राणा हि लिङ् । पावनत्वादयो विशेषा प्रयोजन-(29b)रूपा स्यु प्रतीतिविषया इति शेष । सा च प्रतीतिरौत्तरकालिकी भवन्ती प्रतिक्षिपति प्रसिद्धयाभिधाना शब्दप्रवृत्तिमुपादत्ते च विलक्षणामिति । प्रकरणार्थं सङ्कलयन्नाह न चेति (**तटादौ** चेति) । तत्रैव ध्वननादिशब्दाना सङ्केतः । तेन यत् कश्चिदाह ध्वनिर्ध्वनिरित्यलीकसहृदयत्वभावकानामसदर्थव्यवहार-(ध्व आ वृ. ८ पृ) स्तदपास्तमित्याह **तच्चे**ति । तथाचोक्तम्[29]—

यत्राभिधालक्षणयोर्न योगस्तात्पर्यशक्तेरपि न प्रसक्तिः ।

शब्दस्य तत्र ध्वननाभिधानव्यापार एषोऽभिनवश्चकास्ति ॥ इति

ननु वृत्तित्रयविवेके कृते किमपरमवशिष्यते यदर्थमनेकार्थेत्यादि(अनेकार्थस्येत्यादि) रुत्तर

---

29 तथाचोक्तमिति प्राक्तननिबन्धकृता परामर्श । सग्रहश्लोककल्पोऽय ध्वन्यालोकलोचनादर्वाचीने कुत्रापि निबन्धे स्यादिति वितर्क्यते ।

एव लक्षणामूल व्यञ्जकत्वमुक्तम्। अभिधामूल त्वाह—

अनेकार्थस्य शब्दस्य वाचकत्वे नियन्त्रिते।
सयोगाद्यैरवाच्यार्थधीकृद्व्यापृतिरञ्जनम् ॥१९॥

"सयोगो विप्रयोगश्च साहचर्य विरोधिता।
अर्थः प्रकरण लिङ्ग शब्दस्यान्यस्य सन्निधिः ॥
(वा. प २।३१७)
सामर्थ्यमौचिती देशः कालो व्यक्तिः स्वराद्य.।
शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतवः ॥"

इत्युक्तदिशा सशङ्खचक्रो हरिः, अशङ्खचक्रो हरि रित्युच्यते। रामलक्ष्मणाविति

प्रबन्ध इत्यत आह **एवमिति**। सामान्यतो ध्वनेनिरूपयितव्यस्य भूमिरचनमिदम्—तत्रा(च)र्थशक्तिमूलस्य 'सर्वेषा प्रायश' (८क) इत्यादिना पूर्वग्रन्थेनाविवक्षितवाच्यस्य लक्षणामूलध्वननकथनेन कृतं, शब्दशक्तिमूलानुस्वानरूपस्य तु साम्प्रत क्रियते। यद्यपि साऽभिधास्वरूपाऽभिधानानन्तरमेव तदर्हति तथापि लक्षणामूलोक्तन्यायव्युत्पन्नेन सुज्ञातमिदं प्रस्तूयते। यद्यपि च लक्षणामूलेऽप्यभिधाऽप्यस्ति मूलभूता तथाप्यसाक्षादिति विशेष। अनेकाभिधानशक्ति[म]तोऽनेकार्थवाचकत्वनियन्त्रणमर्था(३०a)न्तराद्व्यवच्छिद्य क्वचिदेकत्राभिधाव्यवस्था। अत्र हेतु **संयोगाद्यैरिति**। **व्यापृतिर्व्यापार**। संयोगाद्यान् दर्शयति **सयोग** इत्यादि। प्रसिद्धार्थान्तरसम्बन्धेन क्वचिदभिधा विशेष्यमात्रनियते वस्तुन्यवतिष्ठते यथा 'सशङ्खचक्रो हरि'रित्यत्र शङ्खचक्रसम्बन्धाद्धरिशब्द सिंहाश्वसूर्यचन्द्रादिभ्यो व्यावृत्ताऽभिधाशक्तिरच्युते व्यवतिष्ठते भगवद्व्यक्तयतिरिक्तस्य तत्सम्बन्धाप्रतीते। एव विप्रयोगेणापि '**अशङ्खचक्रो हरिः**'। 'प्रसिद्धिपूर्वक प्रतिषेधो न चान्यत्र प्रसक्ति'रिति तत्रैवाभिधाया व्यवस्थिते। न च विप्रयोगानुपपत्ति कादाचित्कस्य सम्भवति। साहचर्य सहचरणप्रसिद्धि, "**रामलक्ष्मणा**"विति द्वन्द्वबलात् सामान्यत साहित्यावगति। प्रकारान्तरेण चेदन्यतरप्रसिद्धिस्तदा संयोगोदाहरणमप्येतत्। **विरोधिता** बाध्यबाधकभाव सहानवस्थितिश्च। [**रामार्जुनेति**] परशुरामेणापि पितृबधकोपात् सहस्रार्जुनबध कृत इति प्रसिद्धिविरोधितया रामशब्दो दाशरथिप्रभृतिभ्यो व्यावृत्त परशुरामेऽर्जुनशब्दस्तु पार्थादेरपेत कार्तवीर्ये। [**तयो रिति**] तत्तुल्यचेष्टयोरत्यन्तवैरिणो कयोश्चित् सादृश्येनोपनिबन्धात्। सहानवस्थितौ तु "च्छायातपाविवे"ति द्रष्टव्यम्। अत्र हि च्छायाशब्द सत्त्वानवस्थितिप्रतिसंज्ञानादेव

दाशरथौ। 'रामार्जुनगतिस्तयो'रिति भार्गवकार्तवीर्ययो । 'स्थाणु भज भवच्छिदे' इति हरे। 'सर्वे जानाति देव' इति युष्मदर्थे। 'कुपितो मकरध्वज' इति कामे। 'देवस्य पुराराते'रिति शम्भौ। 'मधुना मत्त' कोकिल' इति वसन्ते। 'पातु वो दयितामुख'मिति साम्मुख्ये। 'भात्यत्र परमेश्वर' इति राजधानी-रूपाद् देशाद्राजनि। 'चित्रभानुर्विभाती'ति दिने रवौ, रात्रौ वह्नौ। 'मित्र भाती'ति सुहृदि। 'मित्रो भाती'ति रवौ। इन्द्रशत्रुरित्यादौ वेदे एव न काव्ये स्वरो विशेषप्रतीतिकृत्।

तेजोऽभावे[30]। (30b) अर्थ प्रयोजनम्, भवच्छेदस्य प्रयोजकत्वाद् भवच्छेद प्रयोजन-मुद्दिश्य सेव्यश्चेत्तदा **स्थाणु**शब्द शङ्कोर्व्यावृत्त परमेश्वर एव। **सर्वे जानाति देव** इति वक्तृश्रोतृबुद्धिस्थतालक्षणेन प्रकरणेन निर्जना (रा) दिव्यावृत्तो देवशब्द पार्थिवे। यदि हि कश्चित् सम्बोध्य ब्रूते तदाऽय नियम। सम्बोधन चानुवादस्यैव। तदुक्तम् "सम्बोधन न लोकेन (केऽनु) विधातव्येन वस्तुने"ति। अनुवादश्च प्रकरणमपेक्षते। तदिदमुक्त युष्मदर्थ इति। **लिङ्ग** चिह्न, कामस्य मकरचिह्नत्वात्। **शब्दस्येति** नियतार्थस्य **सन्निधिः** समभिव्याहार। परमेश्वरगोचरतया नियतार्थेन पुरारातिशब्देन सामानाधिकरण्याद् देवशब्दस्तत्रैव। **सामर्थ्य** शक्ति। कोकिलमदे (मदने) वसन्तस्यैव सामर्थ्यमतो मधुशब्द क्षौद्रादिव्यावृत्तस्तत्र। अर्हत्व**मौचिती**। उत्कण्ठितस्य मनोरथसिद्ध्यर्हत्वेन मुखशब्दस्योपायादिभ्यो व्यवच्छेद। **देशो**ऽधिकरण राजधानीमभिसन्धाय चेत् सर्वनाम-प्रयोगस्तदा परमेश्वरशब्दस्य जगत्कर्तृत्वव्यावृत्ति। **काल.** प्रतीत एव। तेन दिवा रवेर्जाज्वल्यमानत्वाच्चित्रभानुशब्द उभयवाचकोऽपि रवौ नियम्यते, रात्रौ तु तस्यासम्भवा-

---

30 अत्रापि 'सद्दानवस्थितीति पाठ स्यात्'। परम् आदर्शपुस्तकस्थपाठे "ध्वान्तस्य वामोरुविचारणाया वैशेषिक चारु मत मत मे" इति नैषधीयपद्ये तमस्तत्त्व-निरूपणार्थको ध्वान्तशब्द इवात्र च्छायाशब्दोऽपि प्रसिद्धकल्पः। 'द्रव्यगुणकर्म-निष्पत्तिवैधर्म्यादभावस्तम'(५।२।१९) इति वैशेषिकसूत्रम्। न्यायकन्दलीकारा श्रीधराचार्या "भाभावे सति तमस प्रतीतेर्भाऽभावस्तम" इति निरणैषु'। निरुक्तपदार्थे सत्त्वस्य द्रव्यात्मकस्याभाव इति तुच्छो भेद। अभीद्धतपोमूलस्य तापसर्वस्वस्य सत्त्वस्यानवस्थितिलक्षणायाश्छायाया अनातपत्वेन सङ्गिताया एतदेव वैशिष्ट्यम्।

द्वह्निमभिधत्ते। "व्यक्ति, प्रातिपदिकार्थव्यञ्जक पुस्त्वादि" "लुपि युक्तवद्व्यक्ति-(31a)वचन" (पा १।२।५१) इतिवत् (रु स १० ख)। **मित्रशब्द** सुहृदि नपुसक एव, रवौ तु पुमानेव। उदात्तादिरूपो वर्णधर्म **स्वर**। **इन्द्रशत्रु**रिति, अत्र हि षष्ठीतत्पुरुषे 'समासस्ये'-(पा ६।१।२२३) त्यनेनान्तोदात्ते इन्द्रस्य शत्रु शमयिता शातयिता वा प्रतीयते। यदा तु 'बहुव्रीहौ प्रकृत्या पूर्वपद' (पा ६।२।१)मिति पूर्वपदोदात्तो बहुव्रीहिस्तदेन्द्रशत्रुर्यस्य सोऽयमिन्द्रशत्रुरिति, इन्द्र एवास्य शमयिता शातयिता वेति। "यद्यपि नोदात्तादि काव्ये विशेषप्रतीतिनिमित्त तथापि काकुर्विशेषप्रतीतिकृदेव भवति, यथा "मथ्नामि कौरवशत समरे न कोपा"दिति (वेणी स० १।१५) "स्वस्था भवन्तु मयि जीवति धार्तराष्ट्रा"-(वेणी १।७) इति (च) (रु स १० पृ)। ग्रन्थकृता त्वेतदग्रे सूत्रयितव्यमित्यभिप्रेत्योदात्तादिनिषेध कृत। क्वचित्तु स्वरकृतोऽपि विशेषा दृश्यते यथा—

सुभ्रु त्व कुपितेत्यपास्तमशन त्यक्ता कथा योषिता
दूरादेव मयोज्झिता सुरभय स्रग्गन्धधूपादय।
राग रागिणि मुञ्च मय्यवनते दृष्टे प्रसीदाधुना
सत्य त्वद्विरहाद्भवन्ति दयिते शून्या ममान्धा दिश [31]॥ (स कं १६४ पृ)

अत्र चरणतलपतिते मयि दृष्टे सति त्व प्रसीदेति कुपितप्रियतमाप्रसादनपरमप्येतदन्तोदात्त दृष्टे इत्यत्र सम्बुद्धावाद्युदात्ते प्लुतकरणेनेद कुपितदृष्टिप्रसादनपर भवति। एतदेवा(31b)भिसन्धायाह **वेद एवे**ति। यथा वेदे बहुलमुपयोगस्तथा न काव्ये, क्वचित्तु भवत्येवेत्यर्थ। तथा च पाठ्यगुणेषु "हास्यशृङ्गारयो स्वरितोदात्त वीररौद्राद्भुतेष्वनुदात्त-

31 स्वरपदेनेह प्रकरणे काकोरुदात्तादित्रयस्य ह्रस्वदीर्घप्लुतात्मकस्य त्रिकस्य च सर्वस्यैव संग्रह इति साम्प्रदायिका। भोजेनास्मिन् श्लोके प्लुतस्वरकरणेनोपायविशेषेणार्थान्तर सूचितमिति दर्शितम्। टीकाकृत्त्वत्र चातुर्येणोदात्तस्वरस्याद्यन्तोदात्ताभ्यामपि तथा स्यादिति सूचयति। क्वाचित्कमपि नैतदतिविरलमिति तस्याशय। नाट्ये त्वभिनययोगत एतत् स्फुटीभवतीत्यग्रिमवाक्ये तात्पर्यम्। सरस्वतीकण्ठाभरणे चतुर्थचरणान्त्यभागे "सर्वा ममान्धा दिश' इति पाठो दृश्यते। मम्मटभट्टास्त्वेतादृशाना काकुव्यतिरिक्ताना ग्रहण नानुमन्यन्त इति वृत्तिस्थोदाहरणैरापातत प्रतिभाति। हेमचन्द्राचार्यास्तु काकौ पाठक्रमेऽन्तर्भावान्न मम्मटाद्युक्तवक्रोक्तिसमाधायकत्वमिति वदन्तो मुनिमतमुद्धरन्ति, यत्रायं नाट्यशास्त्रीयोद्धारस्यानुवादो दृश्यते-[काव्यानुविवेके २३६ पृ (नि सा)]। हेमचन्द्रग्रन्थोऽपि श्रीधरेणावलोकितो भवेदिति सूचितमस्माभिरुपोद्घाते।

आदिग्रहणात्

> एद्दहमेत्तत्थणिआ एद्दहमेत्तेहि अच्छिवत्तेहि ।
> एद्दहमेत्तावत्था एद्दहमेत्तेहिँ दिअएहि ॥११
>
> (स क आ १६६ पृ , गा स वे ६७३)

इत्यादावभिनयादयः।

इत्थं सयोगादिभिरर्थान्तराभिधायकत्वे निवारितेऽप्यनेकार्थस्य शब्दस्य यत् क्वचिदर्थान्तरप्रतिपादन तत्र नाभिधा, नियमनात्तस्याः। न च लक्षणा, मुख्यार्थबाधाद्यभावात्। अपि त्वञ्जन व्यञ्जनमेव व्यापार. यथा—

> भद्रात्मनो दुरधिरोहतनोर्विशालवशोन्नतेः कृतशिलीमुखसग्रहस्य ।
> यस्यानुपप्लुतगतेः परवारणस्य दानाम्बुसेकसुभगः सतत करोऽभूत् ॥१२
>
> (क अ १।३८)

कम्पितं करुणबीभत्सभयानकेष्वनुदात्तस्वरितकम्पितमुत्पादयेत्'' (ना शा १७, नि सा १२७ पृ) दित्युदात्तानुदात्तस्वरितकम्पितानामुपयोगो मुनिना दर्शित ।

एद्दहेति इयन्मात्रस्तनीयन्मात्राभ्यामक्षिपत्राभ्यामुपलक्षिता । इयन्मात्रावस्थेयन्मात्रै-र्दिवसैरिति । अभिमुखनयनात् सवादिवस्तुस्वरूपप्रकाशिका क्रियाऽ**भिनयः**। अयश्चाङ्गिक-वाचिकाहार्यसात्त्विकभेदाच्चतुर्धा। तत्राङ्गेन शिरोहस्तादिना नि र्वृत्त आङ्गिक, वचनेन गद्गद-स्वरविकारादिना वाचिक, आह्रियमाणैर्मसीवेशस्रगुपस्कारादिभि कृत आहार्य, सत्त्वेन निर्वृत्त सात्त्विक इति। **आदि**पदेनापदेशादय । तत्रात्मनिर्देशिका क्रियाऽपदेशो यथा—इत स दैत्य प्राप्तश्रीर्नेत एवार्हति क्षयम्। विषवृक्षोऽपि संवर्ध्य स्वय छेत्तुम-साम्प्रतम् ॥ (कु स २।५५) इति। अत्रापि यावदात्मानमपदिश्यैवमभिहितवानिति नानुसन्धीयते तावन्न श्री[प्राप्ति]क्षययो कारणविशेष प्रतीयते। एव ''भर्तृदारिके, दिष्ट्या वर्धामहे यदत्रैव कोऽपि कस्या-(32a)पि तिष्ठतीति मामङ्गुलिदलविलासेनाख्यातवती''-(मा मा १ अ)त्यादौ निर्देशादयोऽत्र द्रष्टव्या ।

भद्रात्मन इति। भद्र कल्याणप्रकृति, भद्रा हस्तिना विशिष्टा जातिश्च। **वंशः** कुल पृष्ठदण्डश्च। **शिलीमुखा** बाणा भ्रमराश्च। **गति**र्ज्ञान चलनश्च। पराञ्छत्रून् वारयतीति **परवारणः** प्रकृष्टो हस्ती च। **दानं** त्यागो मदश्च। **करः** पाणि स्थूलहस्तश्च। अत्र परवारणशब्द प्रकरणाद्वर्त-(र्ण)नीये नियन्त्रिताभिधाशक्तिक इति व्यवस्था। ननु योऽयं द्वितीयः करिरूपोऽर्थं प्रतीयते स तावन्नाभिधया,

तद्युक्तो व्यञ्जकः शब्दः—

तद्युक्तो व्यञ्जनयुक्तः।

यत् सोऽर्थान्तरयुक् तथा ।
अर्थोऽपि व्यञ्जकस्तत्र सहकारितया मतः ॥२०॥

तथेति व्यञ्जकः ।

इति काव्यप्रकाशे शब्दार्थस्वरूपनिर्णयो नाम द्वितीय उल्लासः ॥

सकृदुच्चारितस्य नानार्थाभिधानानुपपत्तेः, अन्यथा "गावो व पावनाना[32](सू श ६) मित्यादौ नेत्रादेर[न]भिमतस्याप्यभिधानप्रसङ्गः स्यात् । न चावृत्तिकल्पनं मानाभावात् । नापि लक्षणया, यथोक्तसामग्रीविरहात् । न च [न] प्रतीयते, प्रतीत्यपलापप्रसङ्गात् । नापि तात्पर्येण, पदमात्रगामित्वात् । नापि श्लेषमर्यादया, शक्तेर्नियमनात् । अतः पारिशेष्याद्ध्वननसिद्धिः । तदूचे '**अपि त्वञ्जन**'मित्यादि ।

एवं व्यञ्जनाव्यापारसिद्धौ प्रकृतमुपयोजयति—**तद्युक्त** इति । तच्छब्देनाञ्जनपरामर्शेऽञ्जक इत्युपसंहारो युक्तो न तु व्यञ्जक इत्यत आह—**तद्युक्तो व्यञ्जनयुक्त** इति तदर्थमेव व्यञ्जनमिति पर्यायोप(32b)-न्यासः । ननु शब्दमात्रस्य चेदयं ध्वननव्यापारः शब्दार्थयुगलं ध्वनिरिति कथं सङ्गच्छते? न च सामान्यासम्भवे विशेष इत्यत सूत्रं **यदि**ति । **स** इत्यनेकार्थः । **अर्थान्तरं** वाच्यरूपम् । **तथे**ति व्यञ्जकः । तेनायमर्थः—यद्यपि शब्दार्थयुगलव्यापारो ध्वननं तथापि क्वचित् कस्यचित् प्राधान्येन निरूप्यत इतरस्य तु सहकारिमात्रतया । तथाच शब्दशक्तिमूलादिव्यवहारः परस्पराऽसङ्कीर्ण उपपद्यत इति ।

इति महासान्धिविग्रहिकश्रीश्रीधरविरचिते काव्यप्रकाशविवेके द्वितीय उल्लासः ॥

---

32 'दत्तानन्दा' इत्यादौ सूर्यरश्मिवर्णनप्रस्तावेऽयमंशः । अत्र गोपदेन रश्मीनां सुरभीनाञ्चाभिधानम्, न तु नेत्राणामनभिमतानाम् । ध्वननसिद्धेरिति—सा च ध्वन्यालोकीय-(२।२२) वृत्तिदर्शितदिशा स्थिता । अत्रोपमाध्वनिरिति सिद्धान्तः । पक्षान्तराण्यन्यैरुत्थापितानि लोचनकृता पराहृतानि । युक्तिस्त्वित्थं "नन्वर्थभेदेन शब्दभेद" इति दर्शनादत्र शब्दद्वयमस्ति । तच्च साजात्यादैक्यभ्रमहेतु । किं वृत्त्यन्तरकल्पनेने'ति चेन्न ।.... अत्र हि शब्दद्वयकल्पने कथं प्रकृतार्थस्य प्रथमं प्रतीतिः, द्वयोरभिधेयत्वेन पूर्वपश्चाद्भावनैयत्यासम्भवात् । किञ्च द्वितीयार्थबोधने धर्मिकल्पनातो वरं धर्मकल्पनेति भिन्नशब्दकल्पनाद् भिन्नैव व्यञ्जनाख्या वृत्तिरङ्गीकर्तुमुचिते'ति विश्वनाथकृतकाव्यप्रकाशदर्पणे ।

तृतीय उल्लासः

अर्थाः प्रोक्ताः पुरा तेषाम्

अर्था वाच्यलक्ष्यव्यङ्ग्याः । तेषां च वाचकलाक्षणिकव्यञ्जकानाम् ।

अर्थव्यञ्जकतोच्यते ।

कीदृशीत्याह—

वक्तृबोद्धव्यकाकूनां वाक्यवाच्यान्यसन्निधेः ॥२१॥

प्रस्तावदेशकालादेर्वैशिष्ट्यात् प्रतिभाजुषाम् ।

योऽर्थस्यान्यार्थधीहेतुर्व्यापारो व्यक्तिरेव सा ॥२२॥

एव शब्दस्य व्यञ्जकत्व निर्णीय क्रमप्राप्तमर्थस्य व्यञ्जकत्व दर्शयितु तदुद्देश स्मारयति सूत्रकार —**अर्थाः प्रोक्ता** इति । 'शब्दार्थौ'वित्यत्रैकत्वेनार्थस्योपादानाद् गुणवचनासङ्गति माशङ्क्याह[1]—**अर्था** वाच्येति (**वाच्या इति**)। तच्छब्दो नार्थपरामर्शक, अन्यथाऽपि तत्प्रतीतेरिति व्याचष्टे **तेषाञ्च वाचके**ति । वाचकादिषु प्रतिपालितेषु तद्भावस्य वाच्यादि-प्रतिबन्धादर्थत्रयमुक्तप्रायमित्यर्थ । ननु "सर्वेषा प्रायश "(८ का) इत्यादिनाऽर्थस्य व्यञ्जकता प्रकाशितैवेति पृच्छति **कीदृशी**ति । यद्यपि व्यञ्जकत्वमुक्त तथाऽप्यर्थादर्थान्तर-प्रतीतिर्भवन्ती नानुमानादृते स्यादिति ध्वननाभा (33a)ववादिनो मतमपाकर्तुं वृत्ति भेदव्यवस्थापिका सहकारिसामग्री वक्त्र्येत्युल्लासारम्भ । अतएव शब्दस्य सा पूर्वमुक्ता साम्प्रतमर्थस्योच्यत इति मत्वा सूत्रेऽर्थशब्दो वैशिष्ट्यादिति प्रत्येकमन्वय । **प्रतिभा**त्वया (? **जुषा**)मित्यनेन ये नामानन्यपरायणास्तामेव भगवती प्रतिभामुपासत इत्युक्तम् । **वाक्य वाच्यान्यसन्निधि**रिति वाक्यवाच्यसहितोऽन्यसन्निधिरिति मध्यपदलोपी समास । वक्त्रादि-प्रतिसन्धानसमवहितनिस्तुषप्रतिभानवतोऽर्थादर्थान्तरप्रतीतिर्न वृत्तिभेदव्यवस्थापिका सहकारि-सामग्रीत्युल्लासारम्भोऽयमन्तरेणेति सूत्रतात्पर्यम् । व्यज्यते यया सा **व्यक्ति**-

---

1 अत्र गुणपदेनावृत्तिरभिधीयते । तथाच "गुणो मौर्व्यामप्रधाने ... । त्यागशौर्यादिसत्त्वादिसन्ध्याद्यावृत्तिरज्जुषु" ।। इति मेदिनीकर ।

बोद्धव्य. प्रतिपाद्यः। काकुर्ध्वनेर्विकार.। प्रस्तावः प्रकरणम्। अर्थस्य वाच्यलक्ष्यव्यङ्ग्यात्मनः। क्रमेणोदाहरणानि—

अइपिहुल जलकुम्भ घेत्तूण समागदह्मि सहि तुरिअ ।
समसेअसलिलणीसासणीसहा वीसमामि खण ॥१३॥

(गा स १ वे ६८६)

अत्र चौर्यरतगोपन गम्यते ।

ध्वननव्यापार । **एव**कारेण विधाऽन्तरविरहद्योतिना परमतनिराकरण सूचितम्। तथा चैतत् सद्य उपपादयिष्यत इति भाव । शब्दस्य बोद्धव्यो वाच्य एव, स चानन्तरमुपात्त इति पुनरुक्ति मन्यमान आह **बोद्धव्यः प्रतिपाद्य** इति। णिजर्थ धातुरिह वर्तते यथा 'नागरकवृत्त' वर्तेत'(का सू १।४।१) इति। तथा च शब्दप्रयोगस्य परार्थत्वाद् यद्यत्समवेता प्रतीति-स्तत्पाद्या स बोद्धव्य । **काकुरि**ति—तदुक्तं 'भिन्नकण्ठध्वनिर्धीरै काकुरित्यभिधीयत" (ना शा १७) इति। साऽनियतप्रतिबन्धाऽप्रतिबन्धा च। तत्राद्या वाक्यान्तरापेक्षिणी साकाङ्क्षा, वा-(33b)क्योत्तरभाविनी तु निराकाङ्क्षा। तयो प्रथमाऽऽक्षेपगर्भा प्रश्नगर्भा वितर्कगर्भा च। द्वितीयाऽपि विधिरूपोत्तररूपा निर्णयरूपा च। अनियतप्रतिबन्धा त्वेकद्वित्रिचतुर्गुणेत्यादिकं तरतमनिर्देशविधिबोद्धव्यम्(श्र प्र ७म प्रकाश)। इह तु ग्रन्थगौरवभयान्न प्रतन्यते। **प्रकरण**-मिति बुद्धिविशेष । **अइपिहुल**मित्यादि—'अतिपृथुल जलकुम्भ गृहीत्वा समागताऽस्मि सखि त्वरितम्। श्रमस्वेदसलिलनिश्वासनि सहा विश्राम्यामि क्षण'मिति। अद्येयमेकाकिन्येव गता श्रम पुनरय महानत कोऽत्र हेतुरित्यन्यथा शङ्कमानया प्रतिवेशिन्या सख्या श्रमातिशयकारणं पृष्टाया इयमुक्ति । तत्र पृथुलतया दुर्वहत्वम्। जलपूर्णं कुम्भो जलकुम्भ इति तत्रैव प्रकर्ष । गृहीत्वेति मयैवोत्थाप्य गृहीतो न त्वन्यया साहाय्यमाचरितमिति भूयानायास । समागता न त्वन्तरा विश्रामकथाऽपि[तु] त्वरया गृहव्यापारपरायणत्वम्। त्वरितत्वेन स्वेद-प्रकर्ष । सखीति नासमानहृदय परपीडा जानातीति। तदिहान्वयनिमित्तभूते सर्वस्मिन् व्यापारे सुस्थितेऽपि येयमन्वयाद्बहि कृतस्यार्थान्तरस्य प्रतीतिस्तत्र वक्तृथा वैशिष्ट्यमेव सहकारिता। नहि वृद्धाणां वक्तृयामर्थान्तरप्रतीति सम्भवति, तदानीं वाक्यार्थ एव विश्रान्त । अर्थान्तरप्रतीत्ये(त्यै) तु प्रसिद्धाभि (34a)धातात्पर्यातिरिक्तं व्यञ्जनमेव जागर्ति, शब्दव्यापारोपरमादेव चार्थस्य व्यञ्जकत्वे प्राधान्यम्। एवमुत्तरत्रापि सहकारिवैशिष्ट्या-

ओण्णिद्द दोब्बल्लं चिन्ता अलसत्तण सणीससिअं ।
मह मन्दभाइणीए केर सहि तुह वि अहह परिहवइ ।।१४।।
(गा स १ वे ६५६)

अत्र दूत्यास्तत्कामुकोपभोगो व्यज्यते ।

तथाभूतां दृष्ट्वा नृपसदसि पाञ्चालतनयां
वने व्याधैः सार्धं सुचिरमुषित वल्कलधरैः ।
विराटस्यावासे स्थितमनुचितारम्भनिभृत
गुरुः खेदं खिन्ने मयि भजति नाद्यापि कुरुषु ।।१५।। (वेणी स १।११)

अत्र मयि न योग्यः खेदः, कुरुषु तु योग्य इति काक्वा प्रकाश्यते। न च वाच्यसिद्ध्यङ्गमत्र काकुरिति गुणीभूतव्यङ्ग्यत्व शङ्क्य, प्रश्नमात्रेणापि काकोर्विश्रान्तेः ।

तइआ मह गण्डत्थलणिमिअ दिट्ठि ण णेसि अण्णत्तो ।
एण्हि सच्चेअ अहं ते अ कबोला ण सा दिट्ठी ।।१६।। (गा स वे ६३६)

दर्थस्य व्यञ्जकत्वमनुसर्तव्यम् । **ओण्णिद्द**मित्यादि—औन्निद्र्य दौर्बल्य चिन्ताऽलसत्व सनि-श्वसितम् । मम मन्दभागिन्या शङ्के (?)[2] सखि त्वामप्यहह परिभवति ॥ तुह इति "चतुर्थ्या षष्ठी चे"त्यनुवृत्ते "क्वचिद्द्वितीयादे"रित्यानुशासनाद्द्वितीयार्थे षष्ठी (सि हे ८।३।१३१, ८।३।१३)। अत्रापि यदि निसर्गसद्भावप्रवृत्ता प्रतिपाद्या स्यात्तदाऽर्थान्तरप्रतीतिर्न स्याद्। अत प्रतिपाद्याया वैशिष्ट्यस्य साचिव्यम् । **तथाभूता**मिति—अत्र **मयि भजति नाद्यापि कुरुष्विति** प्रशमोद्दीपनविचित्रतारूपा काकु । ननु काकुप्रतिपादितमर्थान्तर विना वाक्यस्यार्थसङ्गति

---

2 एवमपि कोशे पुटोपरि शोधित पाठ । तत्र 'कृते' इत्यस्येत पर न स्थान यथा रुचकक्रतसङ्केते । इय छाया तद्विवरण वेति नातिस्फुटम् । सङ्क(?)मिति रुचकसङ्केत उपलब्धपाठोऽपि तद्वत् । "सङ्गे कृते" इति भावलक्षणा सप्तमी स्यात् । चण्डीदासस्तु 'मह केर मदीय मिति विच्छिन्नमप्येकीकृत्य विवृणोति । श्रीविद्याचक्रवर्तिनोऽर्वाचीनाश्च बहवो 'मम कृते' इति परिवर्तयन्ति । तत्र केरमिति प्राकृतपद कृतमित्यव्ययपर्यायमिति साहसिक्यमिव प्रतिभाति । छन्दः-कारणकं शैथिल्यमित्यपि न साधु समर्थनम्, एतादृशस्य विरलप्रयोगत्वात् । मूलग्रन्थे तैलङ्गमातृकाया णिरिणद्द । मह मन्दभाइणीए कए सहि तुह वि (Weber page 504) इति पाठो लक्ष्यते ।

अत्र मत्सखी कपोलप्रतिबिम्बितां पश्यतस्ते दृष्टिरन्यैवाभूच्चलितायां तु तस्यामन्यैव जातेत्यहो प्रच्छन्नकामुकत्व त इति व्यज्यते ।

उद्देशोऽय सरसकदलीश्रेणिशोभाऽतिशायी
कुञ्जोत्कर्षाङ्कुरितरमणीविभ्रमो नर्मदायाः ।
किं चैतस्मिन् सुरतसुहृदस्तन्वि ते वान्ति वाता
येषामग्रे सरति कलिताकाण्डकोपो मनोभू· ॥१७॥

(व जी ६२ पृ)

अत्र रतार्थं प्रविशेति व्यङ्ग्यम् ।

णोल्लेइ अणोल्लमणा अत्ता म घरभरम्मि सअलम्मि ।
खणमेत्त जइ संझाइ होइ ण व होइ वीसामो ॥१८॥

(गा स वे ८७५)

स्यात्, ततस्तत्साधकतया गुणीभूतव्यङ्ग्यत्वान्नाय ध्वनेर्विषय इत्याशङ्क्य परिहरति— **प्रश्नमात्रेणापी**ति । कदाचिदेवमतिसम्भू-(म्भृ)तक्रोधे त्वयि स खिन्न , न खिद्यते गुरुरिति सहदेववचनमाकर्ण्योद्दीपितामर्षस्य भीमसेनस्येयमुक्ति । तत्र त्वामेव पृच्छामि किं मयि तव कोपो भवतीत्यादि प्रश्नमात्रम् । **तइआ** इत्यादि तदा मम गण्डस्थलनिमित्ता(तां) दृष्टि नानैषीरन्यत्र । इदानी सैवाह तावेव कपोलौ न सा दृष्टि ॥ निमित्तां(ता) निक्षिप्ताम् । (**ते अ** इति) सर्वत्र प्राकृते "द्वित्वे बहुत्व"मिति (सि हे ८।३।९०) स्मरणाद्बहुत्वम् । (34b) "ननु वाक्यस्य कथमेतदेवोदाहरणम्, अन्यत्रा[पि] वाक्यस्यैव सामर्थ्याद्, आकाङ्क्षा-योग्यतासन्निधानवशात् परस्परसमन्वाहारो वाक्यमिति चेत् सोऽपि सर्वत्र विद्यते [इति] तत् कोऽत्र विशेष ? उच्यते। वाक्यसमन्विते प्रयोजक पदमत्र वाक्यमुच्यते, यथाऽत्रैव 'तइआ एण्हि' इति । एवञ्च न सर्वत्रातिप्रसङ्ग " (रु स. १२ पृ)। **चलितायामि**ति-अन्यत्र गतायाम् । **उद्देशोऽय**मिति—उद्दिश्यत इति उद्देश , तेनान्यजनसञ्चरणायोग्यता । **सरसकदलीश्रेणीशोभाऽतिशायी**त्यादिनोद्दीपनप्रकर्ष । कुञ्जस्योत्कर्षाऽतिशयितलता-गहनत्वादि प्रतिमुहूर्तप्रवर्तितानुक (नेक)पुष्पामोदादिमुदितमधुकरनिकरत्वादिकञ्च, तेनाङ्कुरितो रमणीनां विभ्रमो यौवनस्वभावजश्चेष्टाविशेषो यत्रेति । नर्म ददातीति **नर्मदा**। **सुरत-सुहृद** इति रतश्रमनिमित्तघर्मशीकरापहरणादिरूपसुकृतकार्यकारित्वात् । प्रत्युपकारसापेक्ष-तया हितकरणप्रवृत्तौ मित्रम्, एतन्नैरपेक्ष्येणोपकारकरणशील· सुहृदिति । **तन्वी**ति— प्रकृतिरमणीयतापरेणामन्त्रणेन कृशतानिबन्धन सौकुमार्यमात्मविधेयत्वञ्च नायिकाया

अत्र सन्ध्या सङ्केतकाल इति तटस्थं प्रति कयाचिद्द्योत्यते ।

सुव्वइ समागमिस्सदि तुज्झ पिओ अज्ज पहरमेत्तेण ।
एमे अ किंत्ति चिट्ठसि ता सहि सज्जेसु करणिज्जं ॥१९॥

(गा स वे ६६२)

अत्रोपपतिं प्रत्यभिसर्तुं प्रस्तुता न युक्तमिति कयाचिन्निवार्यते ।

अन्यत्र यूयं कुसुमावचायं कुरुध्वमत्रास्मि करोमि सख्यः ।
नाहं हि दूरं भ्रमितुं समर्था प्रसीदतायं रचितोऽञ्जलिर्वः ॥२०॥

अत्र विविक्तोऽयं देश इति प्रच्छन्नकामुकस्त्वयाऽभिसार्यतामित्याश्वस्तां प्रति कयाचिन्निवेद्यते ।

गुरुअणपरवस पिअ किं भणामि तुइ मन्दभाइणी अहकं ।
अज्ज पवासं वच्चसि वच्च सअं जेव्व सुणसि करणिज्जं ॥२१॥

(गा स वे ८५१)

सूच्यते। **त** इति तद्रूपतया प्रसिद्धा। **वान्ती**ति वर्तमानप्रत्ययेन प्रारब्धा-परिसमाप्ते। **अग्र** इति—अग्रेसरत्वेन कामस्यानुचरत्वं वातानां तु प्रभुत्वम्। **मनोभूरि**ति त(35a)स्य सर्वज्ञताकलिताकस्मिकरोष इत्युज्जृम्भमाणता, ततस्तद्बाणप्रहारस्य दुःसहत्वम्। तदित्थमन्वयव्यतिरेकाभ्यां वाच्यस्य वैशिष्ट्यम्।

णोल्ले[इ] इत्यादि—प्रेरयत्यनार्द्रमना श्वश्रूर्मां गृहभरे सकले। क्षणमात्रं यथा सन्ध्यायां केवलं भवति न वा भवति विश्रामः॥ गृहभरे सकल इति [न] प्रयत्नशतेनाप्यवकाशः। मामिति काक्वाऽनुकम्प्यता। अनार्द्रमना श्वश्रूरित्यनेन सर्वथैवानिभृतसम्भोगसाहसाङ्गीकारपरिहारः, "यद्यपि सन्ध्यासमयेऽवकाशो भवत्येवेति विवक्षितं तथापि तदुच्यमानं परस्य लक्षणीयं भवतीति तथा नोक्तम्। अत्र चान्यस्तटस्थः परपुरुषः" (रु स १२पृ)। **सुव्वइ** इत्यादि—श्रूयते समागमिष्यति तव प्रियोऽद्य प्रहरमात्रेण। एवमेव किमिति तिष्ठसि तत् सखि सज्जय करणीयम्॥ सज्जय सज्जं कुरु। यद्यपि प्रोषितत्वेन प्रस्तुतप्रच्छन्नरहस्यप्रत्यूहहेतुतया वा यास्यतस्तस्याप्रियत्वमेव तथापि तव 'प्रिय' इत्यभिधानमन्यगोपनाभिप्रायेण सखीं प्रति सोल्लुण्ठमेव। तदिह वक्तृप्रतिपाद्यैकबुद्धिस्थि(स्थ)तालक्षणस्य प्रकरणस्य वैशिष्ट्यम्। **अन्यत्रे**त्यादि—अत्र सखीं लक्ष्यीकृत्य वाक्यार्थ(वाच्यार्थ) स्फुट एव, रहस्यवयस्यां प्रति तु व्यङ्ग्यम्। **अत्रे**ति सविशेष्य(कालस्य) साचिव्यम्।

गुरुअणेत्यादि—गुरुजनपरवश(35b)प्रिय किं भणामि त्वां मन्दभागिन्यहम्। अद्य प्रवासं व्रज स्वयमेव जानासि करणीयमिति। 'जन'पदेन बहुत्वपरेण धाराऽधिरूढाऽनुराग-

अत्राद्य मधुसमये यदि व्रजसि तदाऽहं तावन्न भवामि, तव तु न जानामि गतिमिति व्यज्यते।

आदिग्रहणाच्चेष्टाऽऽदेः। तत्र चेष्टाया यथा—

द्वारोपान्तनिरन्तरे मयि तया सौन्दर्यसारश्रिया
प्रोल्लास्योरुयुग परस्परसमासक्तं समासादितम्।
आनीतं पुरतः शिरोऽशुकमध· क्षिप्ते चले लोचने
वाचस्तत्र निवारित प्रसरण सङ्कोचिते दोर्लते ॥२२॥

अत्र चेष्टया प्रच्छन्नकान्तविषय आकूतविशेषो ध्वन्यते।

स्वरूपापरिचयाद् ग्राम्यत्वनीरसत्वादिक तेषा प्रकाश्यते। प्रियपदेन त्वदायत्ता मम प्राणा इति दर्शयति। किं भणामीत्युपालम्भमात्रस्याप्यविषयत्वम्। अथ(था)वचनीयस्यानर्थरूपस्य झटिति साक्षात्कार एव भावीति भाव। एतदेव बुद्धिस्थीकृत्याह मन्दभागिन्यहमिति प्रवास व्रजसि व्रजेति त्वदीयगाढतरमन्युरूपाभिप्रायावेदनेन विधिरय निषेधे पर्यवसायीति प्रतीयते। तदिह यस्य क्षणमात्रमपि विच्छेदोऽतिदु सहस्तस्य प्रवास, सोऽप्ययेति। यद्यपि जलधरसमयोऽप्येव तथापि तस्य सन्तापशान्तेरपि हेतुभूतत्वात्, ततोऽप्ययमतिदारुण समुपस्थितो वसन्तर्तुरित्युद्दीपनप्रकर्षधाराऽधिरूढस्य काल[स्य] वैशिष्ट्य व्यङ्ग्य' प्रति निमित्तम्। तव तु न जाना[मि गति]मिति गुरुजनाज्ञाभङ्गभीरुताऽङ्गीकृतप्रधानसाहस-प्रस्तावनाऽनुमितधैर्यावलम्बनेन पृथग्भावमिवाशङ्क्य। वस्तुतस्तु प्रस्तुतविरहदहनदह्यमान-मानसभासमानैकतयोरैकात्म्यात्। यौवने किल योषिता लीलाविलासविभ्रमविच्छित्ति (36a)किलकिञ्चितमोट्टायितकुट्टमितविब्बोकललितविकृताख्या दश स्वभावजाश्चेष्टा[3]।

---

3 स्वभावजाना चेष्टाना सामान्यत· सङ्क्षिप्तरूपेणोद्देशः। आसा विवेचन प्रकृतग्रन्था-वयवे 'तेषामन्यत्र विस्तर' इति महाजनानुगृहीतरीत्याऽप्रकृतमिति न कृतम्। टीकाकृता नासम्पूर्ण' नानपेक्षित च विवरीतुकामेनात्राकराद्वयोरेतयोर्विवृतौ कारिकाद्वयी इतरत्र च प्राचीनानुजीविना निबन्धकृता वचनान्यनुसृतानि। इदमीयं विभ्रमस्य विस्तृतलक्षण भोजराजग्रन्थानुसङ्कलयित्रा प्रकाशवर्षेण कृत स्यात्। 'स्त्रीणामाद्यप्रणयवचन विभ्रमो हि प्रियेष्वि'ति समर्थयितुकामेन कविगुरुणा कानिचि-द्विभ्रमलक्षणानि तत्रैव पद्ये लक्षितानि। लीलोदाहरणतयोद्धृता गाथा प्रतीक-स्मृता त्वित्थं पठ्यते – जं ज करेसि ज जं जप्पसि ज जं तुम णिरोच्छेसि। त तमणुसिक्खरीए दीहो दिअहो ण सपडइ ॥

निराकाङ्क्षप्रतिपत्तये प्राप्तावसरतया च पुनः पुनरुदाह्रियते। वक्त्रादीनां मिथःसयोगे द्विकादिभेदेन। अनेन क्रमेण लक्ष्यव्यङ्ग्ययोश्च व्यञ्जकत्व मुदाहार्यम्।

तत्रानुरागोद्रेकात् "प्रियकृताना वाग्वेषचेष्टाना श्रृङ्गारिणीना सङ्गराभि(-मङ्गनाभि)रनुकरण लीला" (द रु २।३७ वृः) यथा ज ज कुणेसि त त (ज ज) जप्पसि (गा स ४।७८) पतिविलोकनादिकालेऽङ्गे क्रियाया वचने च सातिशयविशेषोत्पत्तिलक्षणो विलास (द. रु २।३८)। तथा च मुनि —

स्थानासनगमनाना हस्त-(वक्त्र-) भ्रूनेत्रकर्मणाञ्चैव ।

उत्पद्यते विशेषो य श्लिष्ट स तु विलास स्यात् ॥ इति

(ना शा २२।१५ नि स)

यथा **द्वारे**त्यादि। **उपान्त**पदेनैकदेशवृत्तिता, **निरन्तर**पदेन प्राप्तप्रायसन्निधानत्व, **मयी**ति स्वरूपमात्रमुपयुक्त, न तु व्यापारान्तरादिकमतोऽत्रानुरागोद्रेकस्य प्रकर्ष श्रृङ्गाररससर्वस्वायमान-लज्जाऽनुभावेन शिरोऽशुकपुर समानयनेन बाहुमूलस्तनकलसादिव्यक्तीभावावेदको मनागुन्मिष-तीति जाति। एवं विभ्रमादिचेष्टानामपि व्यञ्जकत्वम्। तथा चोक्तम्—

अङ्गभङ्गविकारेण सकटाक्षनिरीक्षणै ।

केशसयमनव्याजाद्बाहुमूलप्रकाशनै ॥

मेखलाऽनुप्रकटनै स्तननाभिप्रकाशनै ।

अभिलाषप्रकटनं विभ्रम परिकीर्तित ॥ (रसार्णवालङ्कारे) इति।

असमाप्तमण्डनता विच्छित्ति। यदाह—माल्याच्छादनभूषणविलेपनानामनादरन्यास (36b) स्वल्पोऽपि परा शोभा जनयति य सा तु विच्छित्ति (ना शा २२।१६ नि सा) स्मितहसितरुदितश्रमरोषभयादीना साङ्कर्येण प्रकटन किलकिञ्चितम्। इष्ट-जनस्य "कथाऽऽदिषु प्रियानुरागेण भावितान्त करणत्व मोट्टायितम्" (द रू २।४० वृ) आलिङ्गनाधरखण्डनादि पीडा [-स्वन्तर्हर्ष] कुट्टमितम्। इष्टार्थप्राप्तावपि गर्वादनादरो विब्वोक। हस्तपादनेत्रभ्रूप्रभृतीनां सुकुमारविन्यासो ललितम्। "प्राप्तावसरस्यापि वाक्यस्य व्रीडया यदवचनं तद्विकृतम्" (द. रू २।४२ वृ)।

निराकाङ्क्षेति—तत्सहकारिविशेषसमवधानादबाधितानेकलक्ष्यसन्दर्शनेन शिष्याः सुशिक्षिता अक्षीणवैचक्षण्या प्रगल्भन्तो झटिति घटित[वि]प्रतिपत्तयो दुर्दुरूढा(श्च)

शब्दप्रमाणवेद्योऽर्थो व्यनक्त्यर्थान्तर यतः ।
अर्थस्य व्यञ्जकत्वे तच्छब्दस्य सहकारिता ॥२३॥

शब्देति न हि प्रमाणान्तरवेद्योऽर्थो व्यञ्जकः ।

इति श्रीकाव्यप्रकाशेऽर्थव्यञ्जकतानिर्णयो नाम तृतीय उल्लास ।

मुद्रिताननना सम्पद्यन्त इति पौनरुक्त्यभ्रम निरस्यति । एव तर्हि सर्वत्र निवेदन प्राप्नोतीत्यत आह—**प्राप्तावसरतये**ति । **मिथः संयोग** इति[4] तत्र वक्तृबोद्धव्ययोगे यथा–

अत्ता एत्थ णिमज्जइ एत्थ अह दिअसअ पलोएहि ।
मा पहिअ रत्तिअन्धअ सेज्जाए महण मज्जहिसि ॥ (गा स ७।६६)

श्वश्रूरत्र शेते अत्राह दिवसक विलोकय । मा पथिक रात्र्यन्ध शय्यायामावयो शयिष्ठा' ॥ 'महण' इति निपात आवयोरित्यर्थे । ममेति व्याख्यायमाने व्यङ्ग्यस्याभिधेयत्वमिव स्यात् । अत्र वक्तृप्रतिपाद्ययो प्रवृद्धमदनावेशत्वेन(37a) दैशिक्या पान्थोऽनेन निषेधद्वारेण तथा ऽभ्युपगत इति निषेधाभावोऽत्र विधि , न तु निमन्त्रणरूपोऽप्रवृत्तप्रवर्तनात्मा, सौभाग्याभिमानखण्डनापदेशात् । अतएव रात्र्यन्धेति समुचितसमयसम्भाव्यमानविकाराकुलत्व ध्वनितम् । अत्रैवाहमिति काक्वा (वाक्यात्) सौन्दर्यगर्वादिक व्यज्यत इति त्रिकादिभेदताऽपि । अतएवाहमित्यभिनयविशेषणात्मदशाऽऽवेदनाद्विधिरत्र शाब्द इति य[द]त्र भट्टनायकेनोक्त तदपि निरस्तम् । न ह्यहमिति शब्दस्य साक्षादयमर्थः, काक्वादिसहकारि तया तु ध्वननमेव व्यापार इति । एवमन्येऽपि द्विकभेदास्त्रिकादिभेदाश्च स्वयमुन्नेया ।

---

4 उल्लासस्यान्तिमेऽशे पाठोऽनवस्थितो विपर्यस्तप्रायश्च प्रतिभाति । पाश्चात्त्यैष्टीकाकृद्भि स्वीकृता 'शब्दप्रमाणवेद्योऽर्थ' इत्यादिका कारिका ग्रन्थकृद्रचनाशैल्या ऽनाघ्रातेवानुमीयमानाऽतिप्राचीनाभ्यां रुचकश्रीधराभ्या न पठितेति प्रतीयते । माणिक्यचन्द्रेणार्वाचीनैश्च कैश्चिद् गृहीता 'अत्ता एत्थे'ति गाथा नात्र मूलग्रन्थ स्यान्तर्भूतेति प्राचीनाना तदवतारयितॄणामपि निर्देशतोऽवगम्यते । नापि मूलग्रन्थकृता पञ्चमोल्लासीयवाक्यमेतद्गाथोपस्थापनपुच्छभूतमस्या अत्र पाठे कथमपि प्रमाणम् । गाथाया अस्या व्याख्याने श्रीधरो ध्वन्यालोकलोचनं रुचककृतसङ्केत श्चानुवदति ।

"तदेवं यद्यपि द्वितीयोल्लासे प्रयोजनस्य व्यङ्ग्यत्वसमर्थनेनाविवक्षितवाच्याख्ये द्विप्रभेदे ध्वनौ शब्दस्यादौ व्यञ्जकत्व प्रतिपादित तदनु विवक्षितान्यपरवाच्याख्यस्य तथापि ध्वनिभेदस्य सलक्ष्यक्रमव्यङ्ग्यप्रभेदेऽर्थस्य विभावादिरूपस्य व्यञ्जकत्वमग्रे वक्ष्यतीति नाव्याप्तिर्व्यञ्जकत्व-निर्णयस्येति[5]।" (रु सं १३ पृः) यदि वा 'व्यक्तिरेव से'त्यनन्तर 'चित्तवृत्ति-विशेषस्य रसादे प्रतिपित्सया। विभावादिभ्य एषाऽभिव्यक्तिरर्थसमाश्रये'ति कारिका पठनीया।" (रु स १३ पृ)

इति महासान्धिविग्रहिकश्रीश्रीधरविरचिते काव्यप्रकाशवि(36b)वेके
तृतीय उल्लास ॥

---

5 यस्तु रुचकस्य 'संलक्ष्यक्रमव्यङ्ग्यभेदेऽर्थस्य विभावादिरूपस्य व्यञ्जकत्वस्यानुक्त-त्वादव्याप्तिर्व्यञ्जकत्वनिर्णयस्येति चिन्त्यमेतदि'ति स्वमताविष्कारस्तत्र श्रीधरकृता ग्रन्थसमर्थनचेष्टा नातिक्लिष्टाऽपि न निर्बन्धवतीति नावश्यमनुमानम्। ग्रन्थकार वाग्देवताऽवतारं मन्यमानास्तदीय मानुष्यमपह्नुवाना इव मूलपाठमपौरुषेय-शब्दकल्प गृह्णन्तो नैतत् सहन्ते। न तावदत्र ग्रन्थपाठ उच्छिन्नो रुचकेन ग्रन्थ-कृदासन्नदेशकालवर्तिना स्वमुखेन घोषितो यस्य स्वकीयस्यालङ्कारसर्वस्वस्य पाठ-विषये तदनतिदूरवर्तिना जयरथेन यथाऽवधारितम्। अस्मिन्नर्थे रुचकभणिति-भङ्ग्येव प्रमाणम्।

अथ चतुर्थ उल्लास

यद्यपि शब्दार्थयोर्निर्णये कृते दोषगुणालङ्काराणां स्वरूपमभिधानीयम्, तथापि धर्मिणि प्रदर्शिते धर्माणां हेयोपादेयता ज्ञायत इति प्रथम काव्य-भेदानाह—

शब्दार्थौ तावन्निर्णीतार्थौ, इदानीन्तु दोषादय क्रमप्राप्तास्तद्गनस्थान(म)तिक्रम्य ध्वन्यादि-विवेचनमित्यत आह **यद्यपी**ति । "तददोषा"विति (१म उ) सामान्येन 'इदमुत्तम'-(१म उ) मित्यादिना च विशेषेण[1] यद्यपि धर्मी प्रदर्शित एव, तथापि यावदवान्तर-प्रभेदा न प्रदर्श्यन्ते तावत् स न सम्यक् प्रदर्शितो भवती" (रु सं १४)त्यभिप्रेत्याह— **धर्मिणि प्रदर्शित** इति । दोषगुणालङ्काराणा तत्त्व ध्वन्येक[नि]रूपणीयमेव । तथाहि काव्यात्मनि रसे ये हेयास्ते दोषा , समवायवृत्त्या ये तमुपादेयत्वेनावलम्बन्ते ते गुणा , ये-ऽङ्गद्वारेणोपकुर्वन्ति तेऽलङ्कारा इति यथायथ प्रतीयमानार्थव्यवस्थित एवाय मार्ग । तदिदमुक्त **हेयोपादेयता ज्ञायत** इात । न च वाच्यम्, अलक्ष्यक्रममात्र तर्हि विविच्यता-

---

1 एवमेव प्राचीना प्रामाणिकाश्च टीकाकृत एतत्सूत्रद्वयप्रसक्ति विभजन्ति । अलङ्कारनिबन्धकृतोऽप्येवमनुरुन्धाना स्वमतमाविष्कुर्वन्तीतीतरत्रास्माभि प्रप-ञ्चितम् । न हि स्वरूपमित्युक्ते स्वमितरव्यावर्तकमन्वयव्यतिरेकादितार्किकनय-सिद्धमेकान्ततस्तैरुद्दिष्टम् । 'तददोषावि'ति कारिकाया विवेचने साम्प्रदायिकै र्वैतण्डिकैर्मल्लयुद्धमाविष्कुर्वद्भिर्यदायासितमेतस्मिन् स्वीकृते तस्यावसान स्यात् । वस्तुतस्तु तत्त्वादप्रच्युतो धर्मी, स्वरूपमात्रो हि धर्म , धर्मिविक्रियैवैषा धर्मद्वारा प्रपञ्चयत इत्यादिदार्शनिकनयभित्तिमुरीकृत्यैव प्राचीनालङ्कारिकाणा धर्मिधर्मगतत्वेन काव्यलक्षणनिष्पत्ति । काव्यात्मस्थापने निबन्धस्तु नानादिकालीन । सिद्धेऽपि तस्मिन्निबन्धकृत प्राचीनमतनियन्त्रिता सरणिं न जहतीति प्रकटितश्च तद्विचक्षणै-र्विवरणकारै । एवमप्यस्मिन् विवेके परिणामपदार्थव्याकरणम् "अवस्थितस्य द्रव्यस्य पूर्वधर्मनिवृत्तौ धर्मान्तरोत्पत्ति परिणाम"इति साङ्ख्यसिद्धान्तमनुवदति । तार्किकमतोत्थपरिवृत्तिसहत्वासहत्वाभ्यामाश्रयाश्रयित्वपक्षस्योपमर्दस्तयोरेकत्रैव ग्रन्थे विभिन्नधा स्वीकरणञ्चालङ्कारनिबन्धकाराणा केषाञ्चिद्विचित्रा शैली प्राचीन-मतानुरोधनिमित्तका

अविवक्षितवाच्यो यस्तत्र वाच्य भवेद् ध्वनौ ।
अर्थान्तरे सक्रमितमत्यन्त वा तिरस्कृतम् ॥२४॥

लक्षणामूलगूढव्यङ्ग्यप्राधान्ये सत्यविवक्षित वाच्य यत्र स ध्वनावित्यनुवादाद् ध्वनिरिति ज्ञेयः। तत्र च वाच्य क्वचिदनुपयुज्यमानत्वादर्थान्तरे परिणमितं यथा—

त्वामस्मि वच्मि विदुषां समवायोऽत्र तिष्ठति ।
आत्मीयां मतिमास्थाय स्थितिमत्र विधेहि तत् ॥२३॥

(रु का अ ६।१५)

अत्र वचनाद्युपदेशादिरूपतया परिणमति। क्वचिदनुपपद्यमानतयाऽत्यन्त तिरस्कृत यथा—

मिति, यस्मादभिधाव्यतिरिक्ता शब्दस्य वृत्तिरेव नास्ति, कुत क्रम, कुतस्तरा तदुपलक्षण-मिति, अतोऽवश्य क्रमाक्रमौ विभावादिभङ्ग्या प्रतिपाद्य स्थापनीयाविति सर्वमवदातम्। काव्यपद तद्विशेषध्वन्यादिपरम्। भिद्यत इति **भेदः** प्रकारो, भिद्यतेऽनेनेति विशेष-लक्षणञ्च विवक्षितम्।

तत्रोद्देशक्रमेण ध्वने प्राग्विवेचनम्। स हि द्विविधोऽभिधामूलो लक्षणामूलश्च। यद्यप्यभिधा-(38a) मूल प्राग्विवेक्तु युक्तस्तथापि प्रागुक्तानुसारेण (१४ का) लक्षणामूला-माह-**अविवक्षितवाच्य** इति। व्यञ्जकमुखेनाय ध्वनेर्विवेक। तत्राद्ये शब्दस्य व्यञ्जकत्व-मर्थस्य तु सहकारिता, अज्ञातार्थस्य शब्दस्याव्यञ्जकत्वात्। एव विवक्षितान्यपरवाच्येऽर्थस्य व्यञ्जकत्व शब्दस्य तु सहकारितेति। अविवक्षितत्वन्तु क्वचिदनुपयुज्यमानत्वेनासामर्थ्याद्भवति, असामर्थ्येनैवान्वयबाधात्। पूर्वत्र **वाच्यमर्थान्तरे सक्रमित** परिणमितं **संक्रमित**-मिति सूत्रे णिचा निर्देश काकादिसहकारिप्रयोजकतामाविष्कर्तुम्। अत्र हि वाच्यस्यानु-पपत्त्यभावादनुवृत्ति (त्त) धर्मरूपतया लक्ष्यप्रतीतिवेलाया न परित्याग, किन्तु तत्सहितस्य लक्ष्यस्य प्रतीति, अतएवात्र परिणामोक्ति। तत्त्वादप्रच्युतस्य धर्मिणोऽवस्थाऽन्तरगमन हि परिणाम। उत्तरत्रानुपपद्यमानत्वाद्वाच्यस्यात्यन्त तिरस्कारः। यस्मिंश्चार्थान्तरे वाच्य परिणमितं तद्व्यङ्ग्यभेदेन व्यपदिश्यते। धर्मरूप (पे) लक्ष्य(क्ष्ये) व्यङ्ग्यस्य तदति-शयमात्रस्वभावत्वादित्युक्त **गूढ[व्यङ्ग्य]प्राधान्य** इति। "एतदर्थं 'तच्च गूढमगूढञ्चे'ति (१३का) पूर्व प्रयोजनस्य भेदेन निर्देश।" (रु स १४पृ) **ध्वनावित्यनुवादात्** (38b)

उपकृत बहु तत्र किमुच्यते सुजनता प्रथिता भवता परम् ।
विदधदीदृशमेव सदा सखे सुखितमास्स्व ततः शरदां शतम् ॥२४॥

एतदपकारिण प्रति विपरीतलक्षणया कश्चिद्वक्ति ।

विवक्षित चान्यपर वाच्य यत्रापरस्तु स ।

अन्यपर व्यङ्ग्यनिष्ठम् । एष च—

कोऽप्यलक्ष्यक्रमव्यङ्ग्यो लक्ष्यव्यङ्ग्यक्रमः परः ॥२५॥

अलक्ष्येति न खलु विभावानुभावव्यभिचारिण एव रस., अपि तु रसस्तै रित्यस्ति क्रमः, स तु लाघवान्न लक्ष्यते ।

स ध्वनिरिति ज्ञेय इति योजना । **तत्र चेति**—अविवक्षितवाच्ये ध्वनौ क्वचित् (क्वचिद्-) सकृदुपात्तमेव सामान्यपद विशेष लक्षयति । यथा—

एमेअ जणो तिस्सा देइ कवोलोपमाइ ससिबिम्ब ।
परमत्थविआरे उण चदो चदो विअ वराओ ॥ (ध्व आ, ३।१०)

इत्यादि । अत्र प्रथमचन्द्रपदस्य द्वितीयचन्द्रपदार्थेऽनुगमात् कलङ्कोपहतत्व-क्षयित्व-दिवा धूसरत्वादिविशिष्टलाभ (मे) प्रकृतपोषकत्वमिति । **अस्मी**त्यस्मदर्थानुवादो निपात । **समवाय.** सभा । "अत्र य प्रति वक्तुमारब्ध त प्रति वक्तव्यवस्त्वेव कथनीयमिति वचमीत्यपार्थत्वादनुपयुज्यमानम् । **उपदेशादिरूपतयेति**—उपदेशस्य लक्ष्यत्वेऽसविज्ञान-पदनिबन्धनावश्यग्राह्यत्वायतिरिक्तातिशयत्व व्यङ्ग्यत्वम् । एव**मुपकृतमि**त्यादावुपकार(कृत)-सौजन्य(सुजनता)-सुखितत्वादिभिर्यद्यपि वैपरीत्यादपकारदोर्जन्यदु.खितत्वादयो लक्ष्यन्ते तथापि तेषामेव सातिशयत्वप्रतिपादनाद्विशिष्टानामेव व्यङ्ग्यत्वव्यवहार. । वक्त्रादिवैशिष्ट्या दयश्चेह यथा मुख्यार्थबाधकास्तथा (२१-२२का) प्रागुपपादितम्" (रु. स १४ पृ) ।

अथाभिधामूलमाह—**विवक्षितञ्चे**ति । **स** इति—ध्वनिरनुषज्यते विवक्षितत्वेन बाधितत्वात् । **अन्यपरं** व्यङ्ग्यतातपर्येण विवक्षित न तु प्रत्यावृत्य गुणी-(391)भूत व्यङ्ग्यन्यायेन वाच्योन्मुखमित्यर्थ । एवञ्चेति (**एष चेति**) अभिधापृष्ठध्वननोट्टङ्कनेन क्रम-व्यवस्थायां यद्यपि लक्षणामूलेऽपि क्रमोऽस्ति, तथापि तस्य लक्ष्यैकरूपत्वान्न प्रकारचिन्ता । **अलक्ष्यक्रम व्यङ्ग्यं** यत्र समुदाये स तथा—एव **लक्ष्यक्रमोऽ**पि । बहुप्रपञ्चतया चालक्ष्यक्रमस्य प्रागुद्देश । ननु वाक्यश्रवणानन्तरं विभावानुभावव्यभिचारिण एव प्रतीयन्ते न त्वन्यत्, ते चाभिधेया इति क्व व्यङ्ग्य क्व चाक्रम इत्यत आह—**न खल्विति** ।

यस्माद्विभावाद्यन्यतमस्तत्समुदायो वा रस[2] इति ये मन्यन्ते ते भ्रान्ता , रसादीना विभावादि-रूपवाच्यसामर्थ्याक्षिप्तत्वात् । तदेतदाह– **अपि त्विति** । एवञ्च विभावादिप्रतीत्युत्तर-काल रसादिप्रतीतिरिति विभावादिप्रतीति (ते) कारणत्वेन रसादिप्रतीतेश्च कार्यत्वेन व्यवस्थापनात् क्रमोऽत्रावश्यम्भावीत्याह—**इत्यस्ति क्रम**[3] इति । न चानुपलम्भमात्रेण व्यतिरिक्तावधारण शक्यमित्यत आह—**स त्विति** । तीव्रसवेगितया विभावादिप्रतीतेर्झटिति रसप्रकाशाद्विद्यमानोऽपि क्रमो न गृह्यते पद्मपत्रव्यतिभेदवत् परचित्तवृत्त्यनुमानवत्त्वात् (मानवत् ?) ।

भावशान्त्यादिरिति । "रसस्य त्वेकध्वनि (घन) निरन्तरायप्रतीतिचर्वणीयत्वान्नि रतिशयस्य शान्त्याद्यतिशयाभाव । अतएव विरोधाङ्गाङ्गिभा-(39b)वौ रसस्यासम्भविनौ तत्स्थायिभावो(भाव)गतत्वेन कैश्चिद्व्यवस्थापितौ" (रु स १४) । मन्दावस्था भावा

---

2 उद्भटादिमतमुद्दिश्यमत्र । तथाच काव्यालङ्कारसारलघुवृत्तौ "यदुक्त भट्टोद्भटेन 'पञ्चरूपा रसा' इति । एतेषाञ्च स्वशब्दादीना पञ्चाना समस्तव्यस्ततयाऽऽस्पदत्वात् येन काव्येन स्फुटरूपतया शृङ्गारादिरसाविर्भावो दर्श्यत" इति (४६-५०) । एतन्मतध्वसो ध्वन्यालोके (२४-२६ पृ) । अग्रेऽपि 'पूर्वाचार्या' इति 'एव विभावादय एव रसा' इति, 'अन्यतमेनैव रसनिष्पत्तिरिति ये मन्यन्ते' इत्यादयोऽप्यनेन व्याख्याता (का अ सा स ४।४४) ।

3 एतच्च नासम्प्रदायसिद्ध सिद्धान्त । 'एववादिनि देवर्षा'विति कुमारपद्य आनन्दवर्धनेन स्वयमेव कण्ठतो लज्जाऽऽख्यव्यभिचारिभावलक्षणो ध्वनि 'न चायमलक्ष्यक्रमव्यङ्ग्यस्यैव ध्वनेविषय' इति सन्दर्भे स्वीकृत । यद्यपि तत्र ध्वन्यालोकग्रन्थे 'यत्र साक्षाच्छब्दनिवेदितेभ्यो विभावानुभावव्यभिचारिभ्यो रसादीना प्रतीति स एवासलक्ष्यक्रमस्य मार्ग' इति भेददृष्ट्या रसादिसामान्यव्यङ्ग्यादेव विधोदाहरणस्य स्थलमित्यापातत प्रतीयते, तथापि 'रसभावतदाभासतत्-प्रशान्त्यादिरक्रम' इति सामान्यत्वेनैव विधानाद् 'रसादिरर्थो हि सहेव वाच्येनावभासते' इति च कण्ठत उक्त्या, 'इवशब्देनामलक्ष्यता विद्यमानत्वेऽपि क्रमस्य व्याख्याते'त्यभिनवगुप्तसमर्थनेन प्राचीनाना ध्वनिवादिनामप्यत्र न वैमनस्यम् । लोचनकृता मतोद्धारद्वारा नवीनालङ्कारिकवर्येण पण्डितराजजगन्नाथेन च 'स्यादेतत् यद्ययं रसादि सलक्ष्यक्रमस्य विषय स्यादि'ति स्पष्टमेवोद्घोषितम् । 'न खलु धर्मिग्राहकमानसिद्ध रत्यादिध्वनेरलक्ष्यक्रमव्यङ्ग्यत्व'मिति हि तन्मतावतरणिकागर्भा युक्तिश्च ।

तत्र च

रसभावतदाभासभावशान्त्यादिरक्रमः।
भिन्नो रसाद्यलङ्कारादलङ्कार्यतया स्थित. ॥२६॥

आदिग्रहणाद्भावोदयभावसन्धिभावशबलत्वानि। प्रधानतया यत्र स्थितो रसादिस्तत्रालङ्कार्यो यथोदाहरिष्यते। अन्यत्र तु प्रधाने वाक्यार्थे यत्राङ्गभूतो रसादिस्तत्र गुणीभूतव्यङ्ग्ये रसवत्प्रेयऊर्जस्विसमाहितादयोऽलङ्काराः। ते च गुणीभूतव्यङ्ग्याभिधाने उदाहरिष्यन्ते। तत्र रसस्वरूपमाह—

कारणान्यथ कार्याणि सहकारीणि यानि च।
रत्यादे. स्थायिनो लोके तानि चेन्नाट्यकाव्ययो. ॥२७॥
विभावा अनुभावास्तत् कथ्यन्ते व्यभिचारिणः।
व्यक्तः स तैर्विभावाद्यै. स्थायी भावो रसः स्मृतः ॥२८॥

बहुलावस्था रसा इत्यादिना ग्रन्थकारोऽप्यग्रे वक्ष्यति (का ३५)। "**अक्रम** इति रसादिरूपोऽसलक्ष्यक्रमो(म)व्यङ्ग्योऽर्थो ध्वनिव्यवहारप्रयोजक। तथाच ध्वनिकृता "ध्वनिरङ्गा (रात्मा) ङ्गिभावेन भासमानो व्यवस्थित" (ध्व आ २।३) इत्युक्तम्। (रु स १४-१५)। ननु रसादिप्राधान्ये रसवदादयोऽलङ्कारा इति पूर्वाचार्या -(का अ सा स ४।४५) तत् कथमलक्ष्यक्रमो ध्वनिरित्यत आह **भिन्न** इति। अत्र हेतुमाह—**अलङ्कार्यतया स्थित** इति। तदेतद्विवृणोति वृत्तिकार **प्रधानतये**ति। रसवदादीना तर्हि को विषय इत्यत आह—**अन्यत्र त्विति** रसादेरेव वाच्यत्वे। यदाह ध्वनिकार—प्रधानेऽन्यत्र वाक्यार्थे यत्राङ्ग तु रसादय। काव्ये तस्मिन्नलङ्कारो रसादिरिति मे मति (ध्व आ. २।५) रिति। **गुणीभूतव्यङ्ग्याभिधाने** गुणीभूतव्यङ्ग्यप्रपञ्चनावसरे।

कारणानीत्यादि—स्थायी भावो रस इति वक्ष्यमाणेन सम्बन्ध। **स्मृत** इति ध्वनिकारसम्प्रदायसिद्धत्व ब्रूते। क पुनरय स्थायी? न हि चित्तवृत्तेराशुतरविनाशिन्या स्थैर्यसम्भव। हर्षादिस्वपि चातिप्रसङ्ग। वासनासन्दीपनश्च विषयातिशयात् पात्रप्रकृतिविशेषाच्च चित्तादिसाधारणमेवेति। सत्य, चित्तवृत्तिकदम्बक आस्वाद्यमाने बुद्बुदवदुन्मज्जनिमज्जमाना[4]स्वप्यन्यासु चित्तवृत्तिषु स्रक्सूत्रन्यायेन (40a) यद्वासनाऽऽस्वादपदवीमवगाहमानाऽनुवर्तते स स्थायी, तथाच भावाध्यायपरिसमाप्तौ मुनि—

---

4 एवमादर्शपुस्तके, पुन शानजत्र चिन्त्य। यदि पुनरुन्मजन्निमज्जत्प्रायास्विति पाठस्तदा सर्वं स्वस्थम्।

बहूना समवेताना रूप यस्य भवेद्बहु ।
स मन्तव्यो रस स्थायी शेषा सञ्चारिणो मता ॥
(ना शा ७।१२० नि. सा) इति ।

अत्र बहूना चित्तवृत्तिरूपाणा भावाना मध्ये यस्य बहुल रूपमुपलभ्यते स एव रसो रसीकरणयोग्य, शेषास्तु सञ्चारिण इति वक्ष्यते (व्याचक्षते)। न तु रसाना स्थायि-सञ्चारिभावेनाङ्गाङ्गिता युक्ता। अतएवान्यो(न्ये) रसस्थायीति षष्ठ्या सप्तम्या द्वितीयया वा श्रितादिषु [गमि]' गम्यादीना (पा २।१।२४ वा') मिति समासम् (ध्व आ लो १७४-७५ पृ) आम्नासिषु । एवञ्च स्थायितया पठितस्यापि रसान्तरे यद्व्यभिचारित्व दृश्यते यथा क्रोधस्य वीरे जुगुप्साया शान्तेर्व्यभिचारितया पठितस्यापि वा यत् स्थायित्व यथा निर्वेदस्य शान्ते तत् सर्वमुपपद्यते। तथाहि—

तत्रालेख्ये कौतूहलतरलतन्वीविरचिते विधायैका चक्र रचयति सुपर्णासुतमपि (मध) ।
अथ स्विद्यत्पाणिस्त्वरितमपमृज्य तदपरा करे पौष्प चाप मकरमुपरिष्टात्तु लिखति ॥
(स स क १७६ पृ)

अत्र विविधविकल्पगोचरचित्तवृत्तिभेदेऽपि रतिवासनाभिन्नाङ्कगेयधातुवदास्वाद्यते।

ननु— अग्घाइ चलणङ्गुट्ठ अ विलासपरिमद्दकुट्टिम घिट्ठद्ध ।
बहुसो सहीणिवेदिअसिढिलङ्गुलि गहि अ वीडिसठाण ॥[5] (शृ प्र)

---

5 आजिघ्रति चरणाङ्गुष्ठविलासपरिमर्दकुट्टिमघृष्टार्धम् । बहुश सखीनिवेदितशिथिलाङ्गुलिगृहीतवीटिसस्थानम् ॥ इति छाया। अत्र 'काव्यमाश्रयसम्पत्त्ये'ति प्राचीनालङ्कारिकनयेन भोजनिर्णीतस्याभिमानापरपर्यायस्य शृङ्गारतत्त्वस्य यल्लघूकरण न सा सूक्ष्मेक्षिका। "सर्वात्मसम्पदुदयातिशयैकहेतुर्जागर्ति यो हृदि मानमयो विकार" "रसोऽभिमानोऽहङ्कार शृङ्गार इति गीयते। योऽर्थस्तस्यान्वयात् काव्य कमनीयत्वमश्नुते ॥" इत्यादिना च यो राद्धान्त स तु रसतत्त्वस्य कूटस्थप्रतिष्ठा। तत्रारूढाना पक्षे "वीराद्भुतादिषु च येह रसप्रसिद्धि सिद्धा कुतोऽपि वटयक्षवदवे भाती"ति नोन्मत्तप्रलपितम्। पर भागदशा विश्लेषणमुखेनैषा भरतमुनिप्रवर्तितानामुपयोग । स च काव्यसौधारोहणे परमोपयोगिसोपानमिवाश्रयनीय । तस्य च निर्देश शृङ्गारप्रकाशाख्यमहाग्रन्थे रसावियोगप्रकाशे। व्यभिचारिसाधारण्ये रसव्यवहारसम्भावनापक्षो भोजेनानुमोदितो रुद्रटेन सूचितश्च (का अ १२।४)। लोचने च रस्यमानताया स्थायिव्यभिचारिणोर्न कोऽपि मौलिको विरोध इति प्राक्तनमतमुल्लिखितम् (ध्व आ लो १७४-७५ पृ)।

उक्त हि भरतेन "विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्ति'रिति। एतद्विवृण्वते। विभावैर्ललनोद्यानादिभिरालम्बनोद्दीपनकारणैः रत्यादिको भावो जनित, अनुभावैः कटाक्षभुजाक्षेपप्रभृतिभि कार्यैः प्रतीतियोग्य कृतः, व्यभिचारिभिर्निर्वेदादिभि सहकारिभिरुपचितो मुख्यया वृत्त्या रामादावनुकार्ये तद्रूपताऽनुसन्धानान्नर्तकेऽपि प्रतीयमानो रस इति भट्टलोल्लटप्रभृतयः।

इत्यादौ चिन्ताऽऽदयोऽपि तथा प्रकाश्यन्ते। (40b) तद्वरमभिमानापरनामा भवत्वेक एव शृङ्गारात्मको रस, तदुपाधिकश्चायमनियमेन व्यभिचारिसाधारण एव रसव्यवहार प्रती(ता)यतामिति। नैतत्, भावावबोधात्। न हि काव्यप्रतिसन्धानापेक्षया स्थायिनिरुक्तिरपि[तु] पात्रप्रकृत्यपेक्षया। तथाच निबद्ध महाकविना—

अद्वैत सुखदु खयोरनुगुणं सर्वास्ववस्थासु य-
द्विश्रामो हृदयस्य यत्र जरसा यस्मिन्नहार्यो रस।
कालेनावरणात्ययात् परिणते यत् स्नेहसारे स्थित
भद्र प्रेम सुमानुषस्य कथमप्येक हि तत् प्राप्यते॥

(उ वा च १।३९) इति

अतएव पात्रप्रकृत्यपेक्षया नी(सी)ताऽऽद्युपलक्षितोऽनुराग शब्दार्थगतत्वेन तु सहकाराद्युपलक्षित पाक प्राचीनैरुपदर्शित[6]। तिर्यगादिषु च बाधोदय यावदाभासमानो रत्याद्याभास इत्युच्यत इति तदेतदास्ता तावत्। यदि स्थायी रस पात्रे तर्हि प्रसक्त इत्यत उक्त **भाव** इति। 'भावना वासना व्याप्तिरित्यनर्थान्तरम्। तथाह्युच्यते—अनेन गन्धेन रसेन वा सर्वं भावित वासित'मिति (ना शा. ७ अ.)। वाक्यार्थतत्त्वपरिशीलनविशदीकृते सामाजिकमनोमुकुरे वर्णनीयतन्मयीभवनयुक्तया भविष्यद्रसास्वादोऽङ्कुरीभवन् स्ववासनाप्रतिफलनयोग्यतामापाद्यमान स्थायी भाव उच्यते। तदुक्त भावयतीति भाव,

---

6 प्राचीनाना नवधा पाककल्पन काव्यमीमासायामित्थ दर्शितम्। 'तत्रक पुनरय पाक ? परिणाम इति मङ्गल। क पुनरय परिणाम इत्याचार्या। 'सुपा तिङाञ्च श्रव। सैषा व्युत्पत्ति'रिति मङ्गल। एषैव सौशब्दयाह्वययोल्लिखिता षष्ठ उद्धरिष्यते। सहकारपाकस्योद्देशो 'गुणस्फुटत्वसाफल्ये काव्यपाकं प्रचक्षते। चूतस्य परिणामेन स चायमुपमीयते॥' (का अ सु वृ ३।२।१४) इति, ''आदौ मध्यसमस्ते स्वादुसहकारपाक"-(का मी २०।११ पृ.)मिति च।

भू इति करणार्थो धातुरवगन्तव्य (41a) इत्यादि[7]। कथमेवमित्यत आह **तैर्व्यक्तः**—यदि तैरित्येतदेवोच्येत [तदा] प्रधानभूतकारणादिधर्मपरामर्शेऽसङ्गति स्यात्। अतो **विभावाद्यै**रित्युक्तम्। के पुनरमी विभावादय इत्यत आह **कारणानीत्या**दि। सवासना चित्तवृत्तिरुत्पत्तिधर्मिणी कारणमन्तरेण कथमात्मानमासादयेत्, तच्च [ततश्च] स्वरूपहेतुरालम्बनभावमापद्यमान आलम्बनमित्युच्यते यथा जानकीरामभद्रौ। मिथश्चित्तवृत्तिं प्रति वासनाविशेषकारणञ्च तामुद्दीपयदुद्दीपनमित्युच्यते। अनयोरन्तरवस्थाऽपि यथाक्रममालम्बनमुद्दीपनमिति वा-(चा)भिधीयते। परचित्तवृत्तिश्च नाध्यक्षा कथ लिङ्गादृते प्रतीयत इति कार्यभूता नयनत्रिभागावलोकनादयो लिङ्गभूयमापद्य ता गमयन्ति। न च प्रतिबन्धावधारणेऽनवस्था स्यादिति वाच्य, स्वात्मनि प्रत्यक्षेण कार्यकारणभावावधारणसम्भवात्। कथमेकैव चित्तवृत्तिस्तत्र विचित्रस्मितरुदितादिकरी स्यादित्यत आह—**तानि चेदि**ति। चेच्छब्दस्य च 'तत् कथ्यन्त' इति तच्छब्देन योजना। **तदिति** तदेत्यर्थ। **नाट्यकाव्ययोरि**ति विषयसप्तम्या अ[ना]न्यत्वेति भाव। न च कारणादयो विभावादयश्चेत्येक तत्वम्, इतरथा हि मुनि कारणकार्यसहकारिसयोगाद्रसनिष्पत्तिरित्येव ब्रूयात्। अतएव

---

7 अत्र मुद्रितनाट्यशास्त्रपुस्तकपाठो नानेन सवादी। टीकाकृता स्वकीयस्मृतिबलाद्-ग्रन्थोद्धार कृतः स्यात्, मुद्रितपाठो वा मातृकादोषतो विपरीत स्यात्। एवमभिनवगुप्तग्रन्थयोरत्र टीकाकृदुद्धृतयो क्वचित् क्वचिन्नान्तरिक सवाद। 'भू इति करणार्थ' इत्येतत्स्थले मुद्रितमुनिग्रन्थे पाठ 'भू इतीतकार (भू इतीतिकार) उच्चारणार्थ। णिचा सबन्धेनेति इति इकारप्रत्यये सति भूधातु करोत्यर्थे वर्तत' इति(अभिनवभारत्याम्)। भोजमते द्विविधो धात्वर्थोऽस्त्यर्थो भवत्यर्थ करोत्यर्थश्च। तत्र निर्वचनीयभावपदे करोत्यर्थस्यैव ग्रहणमिति सम्प्रदायविद। न च तावन्मुनिकृतात् सूत्रात्तद्वृत्तौ दृष्टान्ताच्च लोल्लटादीनामुत्पत्तिवादिना पक्ष समर्थित स्यादिति मन्तव्यमिति 'व्यक्त स तै'रिति मम्मटकारिकाया निर्देश। तैरिति सहार्थेनाप्रधाने तृतीया यथैव व्याख्यातमग्रेऽभिनवकृतरससूत्रव्याख्याने 'तेषा स्थायिना सह पानकरसन्यायेन विभावादिप्रतीतिसाहित्येनेत्यादिना। वैयाकरणन्याय इवात्रापि प्राधान्यमभिव्यक्तिक्रिययोपाहित यदाह टीकाकृत् 'प्रधानभूतकारणादिधर्मिपरामर्श' इत्यनेन। न पुनरेते पृथगनुभूतस्थितय परन्तु समूहालम्बनरूपाः। अतएव पानकरसन्यायेनेति दृष्टान्तस्थापनमापाततोऽर्थविप्रतिपत्तिकरस्य मुनिविवरणीयषाडवादिरसपदस्य स्थाने। तेनैव चालौकिकत्व रसपदार्थस्येत्यपि द्योतना।

च रसभावादीना-(41b)मनुमेयत्व न सम्भावनीय विभावादीना भिन्नलक्षणत्वात्। तथाहि ये लोके रामादिगतचित्तवृत्तिविशेषहेतव सीताऽऽद्या केचित्त एवाभिनयविशेषैरुपदृश्यमाना सन्दर्भविशेषैर्वा समर्थ्यमाना सन्तो विभाव्यन्ते भावा एभिरिति कृत्वा **विभावा** इत्युन्यन्ते। तदिह विभावो विज्ञानार्थ। विभावित विज्ञातमित्यनर्थान्तर, यदाहाचार्य (ना शा १।४) बहवोऽर्था विभाव्यन्ते वागङ्गाभिनयाश्रया। अनेन यस्मात्तेनाय विभाव इति सज्ञित इति। ये च तेषा कार्यभूता कटाक्षादयोऽर्थास्त एव काव्यादावुपदृश्यमानाः सन्तोऽनुभावयन्ति तास्तान् भावानिति कृत्वा**ऽनुभावा** इत्युच्यन्ते। यदाह (ना शा ७।५ वृ)—'यदयमनुभावयति वागङ्गसत्त्वकृतानभिनयास्तस्मादनुभाव इति'। तच्चित्तवृत्ति(त्ते)स्तन्मयी भवनमेव ह्यनुभवनम्। ये च तेषामन्तराऽन्तराऽनवस्थायिनोऽवस्थाविशेषास्तदवान्तरहेतुजनिता उत्पद्यन्ते त एव स्वै स्वैविभावादिभिरभिव्यज्यमाना सन्तो विशेषादाभिमुख्येन चरन्ति वर्तन्ते तेषु तेषु भावेष्विति **व्यभिचारिण** इत्युच्यन्ते। यदाह—'विशेषादाभिमुख्येन चरन्तो व्यभिचारिण। स्थायिन्युन्मग्ननिर्मग्ना कल्लोला इव वारिधौ॥' (द रू ४-७) अतएव प्राधान्यान्नानाभावोपगतास्वपि स्थायिन एव भावा रसत्वमाप्नुवन्ति। यदाह (ना शा ७।८)—'यथा नराणा नृपति शिष्याणाञ्च यथा गुरु। (42a)एव हि सर्वभावाना भाव स्थायी महानिह॥ स्थायिनामेव भावानामुपकाराय सर्वदा। वर्तन्ते सात्त्विका भावा भावाश्च व्यभिचारिण'॥' इति॥ तदित्थमेभिर्विभावादिभिरभिव्यक्त स्थायी भावत्व-(रसत्व) मापद्यमानो रसीभवतीति। तदुक्तम्—'योऽर्थो हृदयसंवादी तस्य भावो रसावह (रसोद्भव)। शरीर व्याप्यते तेन शुष्क काष्ठमिवाग्निना॥' (ना शा ७।७) इति। एतच्च तत्रभवता भरतमुनिना सूत्रितम्—**विभावेत्या**दि। तत्र भट्टलोल्लटादीना मते कार्यकारणभावेन [ज्ञाप्यज्ञापकभावेन] पोष्यपोषकभावेन यथाक्रम विभावादिभिस्त्रिप्रकार सम्बन्ध सयोग। अतएव निष्पत्तिरपि त्रिधैवात्र पक्षे व्याख्येया। ततश्चानुकार्ये सम्भवन् स्थायिभाव पुष्टतया स्थितो मुख्यतया रस। अपरिपुष्टस्तु स्थायी। नर्तके तूपचारेण रसस्थितिरिति।

श्रीशङ्कुकमते तु कारणकार्यसहकारिणो लोके गमकत्वेन प्रसिद्धा नाट्ये कृत्रिमत्वेन चमत्कारहेतुत्वादलौकिकविभावादिव्यपदेशभाज सूत्रे निर्दिष्टा। तैरवस्तुतो(तैर्वस्तुतो)-ऽसम्भाविनोऽपि स्थायिनो गम्यगमकभावलक्षण सम्बन्ध सयोग। ततो रसस्य निष्पत्ति प्रत्येयतयैव स्थिति। सा चानुकर्तृविषया सामाजिकसम्बन्धिनी च। उभयतो दत्तपादा हि रससंवित्। तत्रानुकर्ता रामत्वेन प्रतीतो रामसंविद्विषयः। रामदेवेन (त्वेन) च

राम एवायम्, अयमेव राम इति, न रामोऽयम् इत्यौत्तरकालिके बाधे रामोऽयमिति, राम॰ स्याद्वा न वाऽयमिति रामसदृशोऽयमिति च सम्यङ्मिथ्यासंशयसादृश्यप्रतीतिभ्यो विलक्षणतया चित्रतुरगादिन्यायेन रामोऽयमिति प्रतिपत्त्या ग्राह्ये नटे

'सेय ममाङ्गेषु सुधारसच्छटा सुपूरकर्पूरशलाकिकादृशोः।

मनोरथश्रीर्मनस॰ शरीरिणी प्राणेश्वरी लोचनगोचर गता॥२५॥ (शङ्कुक[8] ?)

दैवादहमद्य तया चपलायतनेत्रया वियुक्तश्च।

अविरलविलोलजलद॰ काल समुपागतश्चायम्॥२६॥ (रु का अ ७।२६)

इत्यादि काव्यानुसन्धानबलाच्छिक्षाऽभ्यासनिर्वर्तितस्वकार्यप्रकटनेन च नटेनैव प्रकाशितै॰ कारणकार्यसहकारिभि कृत्रिमैरपि तथाऽनभिमन्यमानैर्विभावादिशब्दव्यपदेश्यै 'संयोगाद् गम्यगमकभावरूपादनुमीयमानोऽपि वस्तुसौन्दर्यबलाद्रसनीयत्वेनान्यानुमीयमानविलक्षण॰ स्थायित्वेन सभाव्यमानो रत्यादिर्भावस्तत्रासन्नपि सामाजिकानां वासनया चर्व्यमाणो रस इति श्रीशङ्कुक॰।

न ताटस्थ्येन नात्मगतत्वेन रसः प्रतीयते, नोत्पद्यते, नाभिव्यज्यते, अपि

प्रतीति॰ क्वचि(42b)त् सम्यक्, साऽपि द्विधा। राम एवायमित्यन्यरूपत्वव्यावृत्त्यामेका, अयमेव राम इत्यप्रत्यक्षत्वव्यावृत्त्या द्वितीया। द्विधाऽपि सा नेह स्थिता, अवधारणगर्भ-त्त्वीण[त्वेन] प्रतीतेः। क्वचित् पुनर्मिथ्या यत्र रामोऽयमिति प्रतीतावौत्त[र] कालिको न रामोऽयमिति बाधकप्रत्ययोद्भव। साऽपि प्रकृते न स्थिता, बाधकप्रत्ययासवेदनात्। क्वचित्तु दोलायमानोभयकोटिसस्पर्शेन संशयप्रतिपत्तिस्वभावा। संशयोऽपि द्विविधो रामोऽन्यो वेति विशेषसंशय एक, राम स्यान्नवेति सत्ताऽऽश्रित संशयो द्वितीय। तत्राद्योऽतिस्थूलत्वेनासम्भाव्यत्वान्न शङ्कित, द्वितीयस्तु सम्भाव्यत इति—अतएव स्वभावैराशङ्क्यनिराकृता (सम्भावितोऽप्यसवेद्यत्वान्निराकृत)। क्वचित्तु सादृश्यप्रतीतिर्यथा रामसदृशोऽयमिति। सा सदृशवस्तुद्वयप्रतीतिपूर्विका भवन्ती तदभावादिह नास्ति। एव सम्यङ्मिथ्यासंशयसादृश्यप्रतीत्यभावेऽपि रामोऽयमित्यवच्छेदपरिहारेण प्रतीतिचतुष्टया[भावेऽपि] चित्रतुरगे तुरगोऽयमितिवद्व्यवस्थिता प्रतीतिर्[न] पल्लवनीयत्वाल्लोकोत्तरतामेव प्रकाशयति। अतश्च सामान्य-

---

8 अभिनवभारतीसग्रहेऽनुपलभ्यमानोऽप्ययं सर्वं श्रीशङ्कुकग्रन्थ एव, हेमचन्द्रकृते काव्यानुशासनविवेकेऽस्यावस्थानादित्यनुमीयते।

तु काव्ये नाटेय चाभिधातो द्वितीयेन विभावादिसाधारणीकरणात्मना भावकत्वव्यापारेण भाव्यमानः स्थायी सत्त्वोद्रेकप्रकाशानन्दमयसंविद्विश्रान्तिसतत्त्वेन भोगेन भुज्यते इति भट्टनायक.।

रूपतया रामत्वेन प्रतिपन्नेऽनुकर्तरि प्रतीतेविभावादिव्यपदेश्यै कारणादिभि कृत्रिमैरपि कृत्रिमत्वेनाप्रतीतैरविद्यमानोऽपि सामाजिकैरुपायबलाद्विद्यमानत्वेन सम्भाव्यमान स्थायी चर्व्यते। स चानुमीयमान (43a) स्थायी सिद्धरूपव्यङ्ग्यादिवैलक्षण्येन साध्यतयाऽनुमीयते, अतएव रसस्य रसनीयत्वासम्भावनैकप्रमाणत्वात्तथा व्यपदेश इति।

भट्टनायकदर्शने तु रसस्योत्पत्तिप्रतीत्यभिव्यक्तिपक्षान् दूषयित्वा भोगपक्ष प्रतिष्ठापित। तत्रोत्पत्तिवादिना लोल्लटेन विभावैरेवोत्पत्तिरङ्गीकृता, अनुभावव्यभिचारिणो प्रत्यायकत्वेन पोषकत्वेन चाभ्युपपन्नत्वात्। प्रतीतिस्त्वनुमानरूपा श्रीशङ्कुकेनाङ्गीकृता। अभिव्यक्ति पुनर्विद्यमानस्यैव स्थायिनो ध्वनिवादिभि[र]भ्युपगता। तत्र त्रयाणामपि पक्षाणा साधारणमिद दूषणम्। स्वगतत्वेन तथाभावे न रसस्य रसनीयत्वम्, परगतत्वेन ताटस्थ्याद्रसनीयत्वाभाव एव। अभिव्यक्तिपक्षे विषयार्जनतारतम्यादपि रसनीयत्वाभावः। तस्मात् पक्षत्रय त्यक्त्वा भोगपक्षोऽङ्गीकार्य। भोगश्च चर्वणात्मा निर्वृतिपर्यवसायी जननादिविलक्षण, तेषा देशकालाकारनियमेन प्रवृत्तेरुक्तदूषणा(दोषनि-) करानतिक्रान्तत्वात्, अस्य च तद्विलक्षणत्वेनालौकिकत्वादुक्तदोषातिक्रमात्। तथाहि काव्यात्मन शब्दस्य त्र्यशो व्यापार —अभिधा-भावकत्व-भोगकृत्त्वाख्य। तत्रापि (तत्राऽभिधा) निरन्तर-सान्तरार्थनिष्ठत्वेन मुख्यामुख्यभेदेन द्विविध शब्दव्यापार। स शास्त्रेतिहासयोरपि यथाक्रमं शब्दार्थप्राधान्येन प्रभुमित्रसम्मितयो साधारण। अ[न्य]दशद्वयन्तु काव्यनाट्ययोरेव, उभयत्रापि व्यापारप्राधान्याज्जायासम्मितत्वेन व्यवस्थिते। तत्र भावकत्व सीताप्रभृतिविभावादीना, यत्राप्यसम्भवस्तत्रापि भवद्भावन (?) साधारण्यापादनार्थम्। तच्च काव्ये गुणालङ्कारयोगदोषपरिहाराच्च[9] सम्भवति, नाटेय चतु प्रकाराभिनययोगात् सामग्रीवैचित्र्याद्धि शदार्थाना वैचित्र्यलाभ। तद्यथा रजनिकरमयूखसन्निकर्षेण चन्द्रकान्तोपलस्य द्रवत्वोत्पाद, एव काव्यनाट्ययो. सामग्रीवैशिष्ट्येन साधारणीकरण नाम भावकत्व व्यापार।

---

9 बन्धनीगर्भोऽय नातिस्वल्प सन्दर्भो लिपिकरप्रमादवशाद् गलितष्टीकाकृदुपजीव्याद्रुचककृतसङ्केतात् परिपूरित। गलितत्वे युक्तिरसलग्नत्व व्याख्यानस्य विकलप्रायत्वञ्च।

लोके प्रमदाऽऽदिभिः स्थाय्यनुमानेऽभ्यासपाटववतां काव्ये नाट्ये च तैरेव कारणत्वादिपरिहारेण विभावनाऽऽदिव्यापारवत्त्वादलौकिकविभावादि-शब्दव्यवहार्यैर्ममैवैते शत्रोरेवैते तटस्थस्यैवैते न ममैवैते न शत्रोरेवैते न तटस्थस्यैवैते इति सम्बन्धविशेषस्वीकारपरिहारनियमानध्यवसायात् साधारण्येन प्रतीतैरभिव्यक्तः सामाजिकानां वासनाऽऽत्मतया स्थितः स्थायी रत्यादिको नियतप्रमातृगतत्वेन स्थितोऽपि [10]साधाराण्योपाय-बलात् तत्कालविगलितपरिमितप्रमातृभाववशोन्मिषितवेद्यान्तरसंपर्कशून्या-परिमितभावेन प्रमात्रा सकलसहृदयसंवादभाजा साधारण्येन स्वाकार इवाभिन्नोऽपि गोचरीकृतश्चर्व्यमाणतैकप्राणो विभावादिजीवितावधिः, पान-करसन्यायेन चर्व्यमाणः पुर इव परिस्फुरन् हृदयमिव प्रविशन् सर्वाङ्गीणमिवा लिङ्गन्नन्यत् सर्वमिव तिरोदधद् ब्रह्मास्वादमिवानुभावयन्नलौकिकचमत्कार-कारी शृङ्गारादिको रसः। स च न कार्यः, विभावादिविनाशेऽपि तस्य सम्भवप्रसङ्गात्। नापि ज्ञाप्य, सिद्धस्य तस्यासम्भवात्। अपि तु

साधारणीकृतेषु च विभावादिषु साधारण्येनैव विषयीकृतस्य स्थायिन सहृदय(ये)विषय-चर्वणकारित्व नाम भोगकृत्त्व पार्यवसानिक व्यापार। (43b) तत एव सहृदय-रञ्जनाज्जायासम्मितत्वम्। भोगश्च परानन्दास्वादात्मा योगिगतो ब्रह्मास्वादसन्निकृष्ट इत्यास्ता-मेतत्।

ध्वनिदर्शनानुसारेणाचार्य**श्रीमदभिनवगुप्तस्य** मते व्यङ्ग्यो रस, विभावाद्यो व्यञ्जका, व्यङ्ग्यव्यञ्जकभावलक्षणश्च सम्बन्धस्तेषा स्थायिना मिह(सह)। स्थाय्येव योग्यतयाऽत्र रसीभवतीत्युच्यते। स च सम्बन्ध सूत्रे सयोगशब्देनोक्तः। ततो रसस्य निष्पत्तिरभिव्यक्ति रित्यर्थ। स च रस सामाजिकाना, नानुकार्ये, नानुकर्तरि, सामाजिकाना निश्चमत्कारत्व-प्रसङ्गात्। तेषामेव चास्ति लोकोत्तरश्चमत्कारो नानुकार्यस्य, लौकिकपरिमितसान्तराय-चित्तवृत्त्याक्रान्तत्वात्। नानुकर्तुस्तस्य तथाविधचित्तवृत्तिशून्यस्य निष्प्रयोजनत्वाच्चमत्कार-पारिमित्यापाताच्च। तत्र कारणादीनामेव लोकोत्तरसाधारणीकरणव्यापारवत्त्वाल्लोकोत्तर-विभावादिव्यपदेश। तत्साधारण्ये च स्थायिरूपस्य प्रमेयस्य साधारण्यात् प्रमातुरपि साधारण्यम्। अतश्च न विभावादि(वा)साधारण्यहेतुकसमुद्रोल्लङ्घनकृतादिदोषापत्ति,

---

10 एष श्रीधरधृत पाठ। साधारणोपायबलादिति तु प्रायिक पाठ।

विभावादिभिर्व्यञ्जितश्चर्वणीयः। कारकज्ञापकाभ्यामन्यत् क्व दृष्टमिति चेत्, न क्वचिद् दृष्टमित्यलौकिकसिद्धेर्भूषणमेतन्न दूषणम्। चर्वणानिष्पत्त्या तस्य निष्पत्तिरुपचरितेति कार्योऽप्युच्यताम्। लौकिकप्रत्यक्षादिप्रमाणताटस्थ्यावबोधशालिमितयोगिज्ञानवेद्यान्तरसंस्पर्शरहितस्वात्ममात्रपर्यवसितपरिमितेतरयोगिसंवेदनविलक्षणलोकोत्तरस्वसंवेदनगोचर इति प्रत्येयोऽप्यभिधीयताम्। तद्ग्राहकं च न निर्विकल्पकं, विभावादिपरामर्शप्रधानत्वात्। नापि सविकल्पकं, चर्व्यमाणस्यालौकिकानन्दमयस्य स्वसंवेदनसिद्धत्वात्। उभयाभावरूपस्य चोभयात्मकत्वमपि पूर्ववल्लोकोत्तरतामेव गमयति न तु विरोधमिति श्रीमदाचार्याभिनवगुप्तपादाः॥

प्रमातृ पारिमित्याभावात्। यस्य समुद्रोल्लङ्घनादि सम्भवति, तदभेदेन स्वात्मन प्रतीते प्रमेयसाधारण्येन। प्रमातृसाधारण्ये त्वय दोष एव। तच्च(44a)नाङ्गीक्रियत इति निस्तुष व्यञ्जनदर्शनम्। तथाहि निर्वासनस्य रसचर्वणा नास्ति। श्रोत्रियजरन्मीमांसकादयो हि नाट्यमण्डपान्त प्रविष्टा अपि चमत्काराभावात् कीलकप्राया एव। प्रशान्तब्रह्मचारिप्रभृतयश्च शृङ्गाररसास्वादे बहिरङ्गा। गाढरागाणाञ्च शान्तरसचर्वणाऽनभिज्ञत्वम्। अननुभूतशोकस्पर्शानाञ्च करुणास्वादावसरे पाषाणप्रख्यत्वम्। तदेव वासनाऽवभास एव रसचर्वयितृत्वम्। सा चानादिकालीना वासना स्थायिभूतैव विभावादिवशाद्रसत्वमापद्यते, न च व्यभिचारिभूता, तान्त्रिकत्वाद्रसशब्दस्य। विभावादिभिर्व्यञ्जनादेव[च] स्थायिनो रसत्वम्। व्यङ्ग्यव्यञ्जकभावो हि तेषा सम्बन्ध। तथाहि द्विविधमिह संक्षेपेण व्यञ्जनम्—एक तावत् कारणे सूक्ष्मतयाऽवस्थितस्य स्थूलरूपत्व यथा क्षीरावस्थाया शुक्लावस्थस्योत्तर दधिरूपत्वम्। एतच्च प्रतीत्यनपेक्षमपि केवलवस्तुसमवेतमेव व्यञ्जनम्। द्वितीयन्तूपायप्रतीतिसापेक्षोपेयप्रतीतिरूप यथा प्रदीपघटादौ। प्रदीपप्रतीतिसाहित्येनैव घटप्रतीते, प्रदीपस्य व्यञ्जकत्वात्। तदुक्तम्—स्वज्ञानेनान्यधीहेतु सिद्धेऽर्थे व्यञ्जको मतः। यथा दीपोऽन्यथाभावे को विशेषोऽस्य कारणा(का)त्॥[11] (प्र वा का २६५) तदेव रसस्य विभावादीनाञ्च द्वितीयो व्यङ्ग्यव्यञ्जकभावप्रकार आश्रीयते, पानकरसादिन्यायेन विभावादिप्रतीतिसाहित्येन रसप्रतीते। अतएव ध्वनिकृता रसाद्याश्रयेण-

---

11 अयमेवाऽऽलङ्कारिकसम्मत पाठ। मुद्रितपुस्तके (४६३ पृ) यथा दीपोऽन्यथा वाऽपीति पाठो दृश्यते।

सलक्ष्यक्रमव्यङ्ग्यत्वमुक्तम् (२।२) प्रदीपघटदृष्टान्तश्च (44b) व्यञ्जने (३।१३, १६५ पृ) प्रदर्शित। सलक्ष्यक्रमव्यङ्ग्यादौ कथ व्यञ्जकत्वमिति चेत्, तत्रापि व्यञ्जकप्रतीतिपुर-सरत्वेन व्यङ्ग्यप्रतीते क्रमवत्त्वेऽपि व्यङ्ग्यप्रतीतिकाले तावद्व्यञ्जकप्रतीतेरस्ति सहभाव इति प्रदीपघटन्यायेन स्थित एव व्यङ्ग्यव्यञ्जकभाव। तत्र हि पूर्वं केवल व्यञ्जकप्रतीति, पश्चात्तु व्यञ्जकसहितव्यङ्ग्यप्रतीतिरितीयानेव पूर्वकल्पाद्विशेष। वस्तुतस्तु क्रम उभयत्राप्यस्ति केवल पूर्वत्रोत्पलदलशतव्यतिभेदन्यायेन [न] सलक्ष्यते, उत्तरत्र तु सलक्ष्यत एव। सलक्षणेऽपि व्यङ्ग्यप्रतीतिकाले तावद्व्यङ्ग्यव्यञ्जकप्रतीतिरस्तीत्येतावता प्रदीपघटदृष्टान्तो-ऽत्रापि न सगच्छते। तदुक्त ध्वनिकृतैव, "न हि व्यङ्ग्ये प्रतीयमाने वाच्यबुद्धिर्दूरीभवती"ति (१६० पृ)। एवमेव चैतद् व्यङ्ग्यप्रतीतौ हि व्यञ्जकप्रतीतिरुपयुक्ता, न व्यञ्जकप्रतीतौ व्यङ्ग्य-प्रतीति, घटप्रदीपवदेव प्रदीपप्रतीते केवलाया अपि भावात्, तदेतत् प्रसक्तानुप्रसक्तमास्ताम्। प्रकृते तु विभावादिभिर्व्यज्यते रस इति सुव्यवस्थितमेव। एवञ्च व्यवस्थिते रसस्य कार्यत्व ज्ञाप्यत्व भोग्यत्वञ्च पराकृत भवति। तथाहि—कार्यस्तावद्रसो न भवति, कारणाभावेऽपि भावप्रसङ्गाद्, घटवत्। यत्काल मर्दन तत्काल मर्दनसुखमिति न्यायेन कार्यकालेऽपि कारणस्य भाव इति चेत्, नैतत्, मर्दनस्य स्पर्शरूपत्वात्, स्पर्शसंवेदनसमयेऽन्त स्प्रष्टव्यस्यापि सवेदनात्। अन्त स्प्रष्टव्यविशेषस्वभावत्वाच्च सुखस्य, बहि: सुख नान्यत् किञ्चिद्दश्यते अन्त स्प्रष्टव्य-विशेषात्। ततो मर्दन स्पर्श', तत्सहभावी चान्त स्प्रष्टव्यविशेष, तदेव च सुखमिति (45a) नास्ति पौर्वापर्यम्। इह तु कार्यत्वादेवौत्तरकालिकत्व रसस्येति विभावै सहभावो न स्यात्। अस्ति च, तस्मान्न कार्यो रस। किञ्च कार्य न नियमेन कारणज्ञानमपेक्षते, इह तु नियमेन विभावादिज्ञानापेक्षेति कार्यत्व तावन्निरस्तम्। प्रत्येयत्व तर्हि स्यात्? नैतत्, सिद्धस्य तद्भवतीति। न रस पूर्वसिद्ध प्रतीत्यारूढस्यैव रसत्वात्। अतश्च न रस प्रतीयते, अपि तु 'प्रतीयमान एव रस। प्रतीयते रस इत्योदन पचतीति-वद्व्यवहार'। (ध्व आ लो २।४ आति ६६ पृ) अतएव सिद्धत्वाभावात् सा रसस्य प्रतीतिश्चर्वणास्वादनादिशब्दवाच्या। चर्वणा चात्राभिव्यञ्जनमेव। नतु ज्ञापनं प्रमाण(ण)-व्यापारवत्, नाप्युपादानं हेतुव्यापारवत्। अतो न विभावादीनामत्र ज्ञापकत्व, न च कारकत्वमपि तु चर्वणोपयोगितेत्याह। **अपित्विति**—एव तर्हि चर्वणीयत्वाद्भोग्यत्वं स्यात्। एतदपि नास्ति, भोग्यत्वं हि भोगविषयत्वम्, भोगश्च कि वस्तुवृत्तमेव किञ्चित् उत स्वित् प्रतिपत्तृवृत्तम्? न तावद्वस्तुवृत्तम्, प्रतीत्यनपेक्षस्य नीलादिन्यायेन वस्तुस्वभावतयैव तस्याभावात्। प्रतिपत्तृवृत्त चेत् प्रतिपत्तुरपि किमिच्छाद्वेषादिन्यायेन कश्चिदतिशयो भोग आहोस्वित् प्रतीत्यात्मा? न तावदिच्छाऽऽदिन्यायेन, तेषामप्रतीत्यात्मत्वे जडताऽऽपत्त्या

वस्तुवृत्तविशेषात्। प्रतीत्यात्मा चेत् प्रतीतिविषयस्तर्हि भोग। स प्रत्येयनिष्ठ प्रत्येयश्च रत्यादि, स च नियमेन विभावादिप्रतीतिसापेक्ष प्रतीयते। एवञ्च यावत् प्रतीतिविषया एव विभावादयो रत्यादिप्रतीतिहेत (45b)वस्तावत् 'स्वज्ञानेनान्यधीहेतु'रित्यादि हठेनायात व्यञ्जकत्वलक्षणम्। ततश्च व्यङ्ग्यो रस, व्यञ्जका विभावादय इति सुव्यवस्थितम्। केवल व्यङ्ग्यव्यञ्जकयोर्देशकालसम्बन्धव्यवच्छेदकाभावाद् हृदयसवादपर्यवसायिसाधारण्येन यल्लोकोत्तरत्व तद्भूषण न दूषणम्—इति तावद्रसस्वरूप सिद्धान्तितम्।

इदानी ग्रन्थो विव्रियते—**सम्यङ्मिथ्ये**ति, तथाचोक्तम्—प्रतिभाति न सन्देहो न तत्त्व न विपर्यय। धीरसावयमित्यस्ति नासावेवायमित्यपि ॥ विरुद्धबुद्धयसम्भेदाद विवेचितविप्लव। युक्तया पर्यनुयुज्येत स्फुरन्ननुभव कया ॥ (श्र भा २७३ पृ धर्मकीर्त्ति ?) इह "**सेय ममाङ्गे**'ष्वित्यादि श्लोकद्वयं क्रमेणालम्बनोद्दीपनविभावद्वयोदाहरणार्थम्। तस्य काव्यवशादेव प्रतीतिः"। (रु. सं २० पृ) मनोरथस्तावन्मन[स] एव भवतीति [पुन]मन शब्दप्रयोगोऽन्ययोगव्यवच्छेदार्थं। काल एव कृतान्त। [**शिक्षेति**]—शिक्षाऽभ्यासान्तर्तकेनाश्रुपाताद्यनुभावप्रकाशनम्। **अभ्यासप्रवर्तिते**ति—अभ्यासेन प्रवर्तित यद्व्यभिचारिणामेव स्वकार्यमनुभावलक्षण तत्प्रकाशनेन चित्तवृत्तिविशेषाणा व्यभिचारिणामेव प्रकाशनम्। **भाव्यमानः** सम्भाव्यमान। **सत्त्वोद्रेकेति**—सत्त्वाख्यगुणोद्रेकेण रजस्तमसोरस्तमनात् प्रकाशानन्दमयी या सवित्तत्व विश्रान्ति सविदन्तरोन्मुख्या-(49a)भाव। सत्त्वादयो गुणा अन्योन्याभिभावाश्रयादिव्यापारा इत्येषामन्यतमेनार्थोदुद्भूतेनान्यदभिभूयते। तदिह साख्यैर्हि सत्त्वस्य प्रीतिशब्दवाच्यानन्दभूयस्त्वं प्रकाशप्रयोजनश्चोक्तम् "प्रीत्यप्रीतिविषादात्मका गुणा प्रकाशप्रवृत्तिनियमार्था (सा. का १२) इति ग्रन्थेन" (रु. स २० पृ॰) प्रीतिरानन्दस्तदात्मक सत्त्व गुण। अप्रीतिर्दुःख तदात्मक रजो गुण। विषादो मोहस्तदात्मक तमो गुण। एषा यथासंख्य प्रकाश प्रकर्ष। **अभ्यासपाटववतामि**ति अभ्यास' पौन पुन्येनानुशीलन, पाटव प्रज्ञाप्रकर्ष। **ममैवैत** इति—एत इति विभावचेष्टाऽऽदय। **नियतप्रमातृगतत्वेनेति** ज्ञानविशेष। **साधारण्योपायेति**-साधारण्य उपाया. साधारण्येन प्रतीता विभावादय [तेषा बलात्।] **अपरिमितभावेन प्रमात्रे**ति-स्वगतत्वेन रतिप्रतीतौ कामित्व परगतत्वेन सत्पुरुषाणा लज्जेतरेषाञ्चासूया वा तटस्थभावो वा रागापहारेच्छाऽऽदि। घटादिवत् सर्वसाधारणप्रतीतौ ताटस्थ्यमेव, न रसनीयत्वम्। रसनीयत्वे वा सुखवन्नियन्तृनिष्ठत्वे कामित्वं, तस्मात् सर्वप्रमातृणा यो रसनीय स सर्वप्रमातृताऽवलम्बनेनैव रस्यते। अतएव नाटक[स्य]मण्डपान्त प्रविष्टा'

[न] सर्वे हृदयसवादभाजो भवन्तीत्युच्यते। **सकल[स]हृदयसवाद**भाजेति साधारण्ये-नेत्यस्य विशेषणम्। **स्वाकार इवे**ति सामाजिकप्रमातृस्वरूपम्। **अभिन्नोऽपी**ति संवित्ता-दात्म्यात्। **गोचरीकृत** इति रत्यादिभिः परस्परवैलक्षण्येनोट्टङ्कनस्य दा(भा)नात्। **विभावादिजीवितेति** व्यञ्जकपरित्यागेन व्यङ्ग्यस्याप्रति (46b) भासनात्। **अन्यत् क्वेति** अन्यदिति तद्विलक्षणं व्यञ्जकरूपम्।" (रु स. २० पृ) [च]र्वणानिष्पत्त्येति ज्ञान-विशेषस्यैव ज्ञातास्वादप्रधानस्य चर्वणात्मकत्वम्। **कार्योऽप्युच्यता**मिति प्रौढत्वेन पूर्वप्रतिष्ठापितमार्गयोजना। **लौकिके**ति—लौकिकानि प्रत्यक्षादीनि प्रमाणान्यस्फुटत्व-योगीनि सविदन्तरौन्मुख्यादविश्रान्तिभाञ्जि च। रससवेदनस्य स्फुटत्वेन विश्रान्त्या च तद्वैलक्षण्यम्। **परिमितयोगि**ना भिन्नसज्ञानाना ज्ञानानि ताटस्थ्येन वस्त्ववगमयन्ति। तटस्थस्य विषयानावेशेन प्रवृत्ति, अपरिमित-(परिमितेतर) योगिना शान्तब्रह्म-साक्षात्कारिणा सवेदनानि शान्तत्वाद्वेद्योपरागशून्यत्वेन स्वात्ममात्रपर्यवसितानि। इदन्तु रसस्वभाववेद्यु(सु)क्तमेव। अतएव सर्वविलक्षणत्वाल्लोकोत्तर रसस्य सवेदनम्। **तद्ग्राहकञ्चेति** ज्ञान हि द्विविध निर्विकल्पकं सविकल्पकञ्च। तत्र स्वरूपमात्रग्राहि निर्विकल्पक, नामजात्यादियोजनात्मकन्तु सविकल्पकम्। अत्र तयोर्नायमित्याह **विभावा-दी**ति। **परामर्शनं** पर्यालोचन विषयीभाव इति यावत्। नापि द्वितीयमिति। अत **आह स्वसवेदनेति**—'स्वात्मन्यविकल्पका विकल्पका' इति न्यायात्[12]। यदाहु सौगता —

12 रुचकोद्धृतमिम न्याय नैज श्रीधरमत मन्यमानस्य चण्डीदासस्य (११७-११८ पृ) 'एतच्चोभयमङ्गीकुर्वतामुपनीय वाससि बद्धो ग्रन्थि'रित्युपहासपूर्वक आक्षेपः। वस्तुतस्तु ज्ञानस्य स्वप्रकाशत्वसमर्थन एव टीकाकृतस्तात्पर्य, तत्र च सौगतैस्तत् सुसिद्धमिति सौगतमते निर्भर उभयोरपि प्राचीनटीकाकृतों। रुचकस्य काश्मीरीय-शैवदर्शनानुगामिनो नात्र विचिकित्सा सम्भविनी, श्रीधरस्य पक्षे पुनरत्र च बलाबल-मीमासा प्रकृतानुपयोगिनी, उभयोरपि यथाश्रुतस्योपपत्तेरिति द्वितीयोल्लासनिदर्शिते निर्णय आस्था इति नय। यत्त्वत्र खण्डनखण्डग्रन्थमाश्रित्योभयो सौगत-ब्रह्मवादिनोर्भेदप्रकटने निर्बन्धवत्त्व तद्रसतत्त्वविवेचनेऽप्रासङ्गिकमेव। अतएव योऽत्र नैरात्म्यपक्षोद्देशो यथाऽग्रे लङ्कावतारोद्धते 'कल्पित ' इत्यादिपद्योत्तरार्धे 'बुद्धया विविच्यमानानां स्वभावो नावधार्यत' इत्यादौ खण्डनखण्डोद्धृते च तत्र न कोलाहल कार्य। कौतुकावहमिद यत् खण्डनटीकाकृद्विद्यासागरग्रन्थ इवात्राप्यादर्शपुस्तके 'अलङ्कारावतार' इति लिपिकृत प्रमादकृतो विसदृश पाठ। कर्तृकर्मभाव-चर्चाऽपि खण्डनतो द्रष्टव्या सूक्ष्मतर विचार' पारयद्भिरित्यास्ताम्।

सर्वे (सर्व-) चित्तचैत्तानामात्मसंवेदनम् (न्या वि १।६)। चित्त वस्तुमात्रग्राहकं ज्ञान, चित्ते भवाश्चैत्ता वस्तुनो विशेषरुपग्राहका सुखदु खोपेक्षालक्षणास्तेषा चित्तचैत्तानामात्मा सवेद्यते येन (47a) स्वरूपेण तत्स्वरूपमात्मरूपसाक्षात्कारित्वात् स्वसंवेदनं प्रत्यक्षं 'प्रत्यक्ष कल्पनाऽपोढमभ्रान्तश्चोच्यत' (न्या वि १।१ -१२ चौ स) इति। अत्र केचिदाहु 'न हि चित्तचैत्ताना स्वसवेदनत्व घटते स्वात्मनि कृया (क्रिया-)विरोधात। न हि सुशिक्षितोऽपि नटवत (वटु) स्व स्कन्धमारोढु शक्नोति (श्र प्र १म ४१ पृ)। न हि तीक्ष्णाऽप्यसिधाराऽऽत्मान छिनत्ति, नहि प्रज्वलितोऽपि वह्निस्कन्ध आत्मान दहति। तथा चित्तचैत्तमपि कथमात्मान प्रत्येतु। वेद्यवेदकभावो हि कर्मकर्तृभाव। कर्मकर्तृत्वञ्च लोके भेदेनैव प्रसिद्ध वृक्षसूत्रधारयोरिव। अत्रोच्यते—न कर्मकर्तृभावेन वेद्यवेदकत्व ज्ञाने वर्ण्यते, कि तर्हि ? व्यवस्थाप्यव्यवस्थापकभावेन। यथा प्रदीप आत्मानं प्रकाशयति तथा ज्ञानमपि जडपदार्थविलक्षण स्वहेतोरेव प्रकाशस्वभाव उप-(स्वभावादुप-) जायमान स्वसवेदन व्यवस्थाप्यते। तथाचोक्तम्—विज्ञान जडरूपेभ्यो व्यावृत्तमुपजायते। इयमेवात्मसवित्तिरस्पर्शा जडरूपता॥ (लङ्कावतार सू) अलङ्कारावतारे [णा] पुक्तम् (लङ्कावतारेऽप्युक्तम्)—कल्पित कर्मकर्त्रादि परमार्थो न विद्यते। आत्मानमात्मने चात्मा निहन्तीति निरुच्यते॥ (ल अ) न च चित्तचैत्तानां ज्ञानान्तरेण प्रकाश्यत्वं युज्यते। तथाहि न तावत् समानकालतां विना ज्ञानान्तरेण चित्त चैत्त वा प्रकाश्यत (47b) इति घटते, उपकार्योपकारकत्वाभावात् सव्येतरगोविषाणयोरिव। नापि भिन्नकालभावि, लाक्षणिकत्वात्, प्रकाशयितव्यस्यैवाभावात्। अपि च यदि ज्ञान स्वसवेदनं न स्यात् तदा ज्ञातोऽन्य इति दुर्घट स्यात्, नागृहीतविशेषणन्यायात्। तथा स्वार्थो (तथाह्यर्थो) विशेष्यो ज्ञात इति विशेषणम्। ज्ञातो ज्ञानेन विशेषितः। ज्ञानञ्च स्वबोधस्वरूपेण न प्रतीत तत् (चेत्) कथं ज्ञानेन विशेषितोऽर्थ प्रतीयताम् ? तथाहि दण्डाग्रहणे ग्रहण दण्डिनो न युक्तिसङ्गतम्। ननु सर्वज्ञानानां स्वसवेदनप्रत्यक्षत्वे घटोऽयमित्यादिसविकल्पज्ञानस्य निर्विकल्पकत्व पीतशङ्खादिज्ञानस्याभ्रान्तत्व [च] स्यात्। उच्यते—विकल्पज्ञानमपि स्वात्मनि निर्विकल्पकमेव। घटोऽयमित्यनेन बाह्यसत्त्व विकल्पयति न त्वात्मानम्। तदुक्तम्—शब्दार्थग्राहि यद्यत्र ज्ञान तत्तत्र कल्पना। स्वरूपञ्च न शब्दार्थस्तत्राध्यक्षमतोऽखिलम्। भ्रान्तमप्यात्मनाऽभ्रान्तं स्वरूपेणैव भासनात्॥ असद्विषयत्वाच्च भ्रान्तिरुच्यते। यदुक्तम्—'स्वरूपे सर्वमभ्रान्त पररूपे विपर्यय'। तस्मादन्यथाप्रकाशकत्वात् सिद्धम्। यद्यमी प्रकाशन्ते तदा स्वहेतोरेव प्रकाशस्वभावा उपपन्ना॰ सन्त प्रकाशन्त इति (48a) स्वीकर्तव्यमेव। अत स्वसंवेदनसिद्धत्वाद्विकल्पज्ञानमपि रसस्य ग्राहकमिति स्थितम्। एवञ्च लोकप्रसिद्धकार्यत्वादिरूपविरहत्वेनाप्रमाणो

व्याघ्रादयो विभावा भयानकस्येव वीराद्भुतरौद्राणाम्, अश्रुपातादयोऽनुभावाः शृङ्गारस्येव करुणभयानकयोः, चिन्ताऽऽदयो व्यभिचारिण. शृङ्गारस्येव वीरकरुणभयानकानामिति पृथगनैकान्तिकत्वात् सूत्रे मिलिता निर्दिष्टाः।

वियद्‌लिमलिनाम्बुगर्भमेघ मधुकरकोकिलकूजितैर्दिशां श्रीः।
धरणिरभिनवाङ्कुराङ्कटङ्का प्रणतिपरे दयिते प्रसीद मुग्धे ॥२७॥

इत्यादौ

रस स्यादितीयमपि दुर्दुरूढशङ्कापिशाचिका निरवकाशैव। प्राभाकरा अपि हि (?) पूर्वानुभवसापेक्षत्वाद्विषये स्मरणस्याप्रामाण्य स्वाङ्गे (?) तु ज्ञानात्मन्यनुभवत्वमेवाहु। उभयात्मकत्व स्वसवेदनसारविमल-(विमर्श) मयत्वेन। **श्रीमद्**िति—काव्यार्थतत्त्वज्ञानसम्पदत्र श्री। **आचार्य**पदेन सम्प्रदायप्रवर्तकत्व, **पादा** इति गुरुगौरवात्तत्रैव प्रकर्ष। अभिनव गुप्त गूढमर्थ सपादयन्ती**त्यभिनवगुप्तपादाः**[13]। एव विभावादय एव रसा इति प्रवादस्तावद्दूरपरास्त एव।

इदानी विभावानुभावव्यभिचारिणामन्यतमेनत्र रसनिष्पत्तिरिति ये मन्यन्ते तेऽपि भ्रान्ता इति प्रदर्शयितु सूत्रकर्तुरभिप्राय व्याचष्टे **व्याघ्रादय** इति—यथैते स्त्रीनीचाना भयहेतवस्तथा वीरादीना वासाहानि (-मुत्साहादि) हेतव। **अश्रुपातादय** इति—एतेनाश्रुस्तम्भस्वेदरोमाञ्चस्वरभेदवेपथुवैवर्ण्यप्रलयात्मानोऽष्टौ सात्त्विका भावा सूचिता.। एव व्यभिचारिणोऽपीत्याह—**चिन्ताऽऽदय** इति। अतोऽमी पृथगेकैकशो नैकस्मिन्नन्ते (48b) पक्षे व्यवस्थिता केवलाना व्यभिचारदर्शनात्, ततो मुनिना स्वसूत्रे मिलिता इति द्वन्द्वेन निर्दिष्टा। नन्वत्राप्यनैकान्तिकत्वम्, केवलानामेव विभावादीनां निर्देशे रसस्य प्रतीते। सत्य, किन्तु यत्रापि प्रयोगे केवलाना निर्देशस्तत्राप्यसाधारण्येन नान्यतमद्वयापेक्षा, त्रयाणा व्यञ्जकत्वम्। तत्रैवोदाहरणत्रय दत्त यथा **विय**द्वित्यादि। **मधुकरकोकिलकूजितै**रित्युपलक्षणे तृतीया। **प्रणतिपर** इति विषयसप्तमी। अत्र **मुग्ध** इत्यालम्बन-

---

13 एतच्च टीकाकृतो नामनिर्वचन स्वनामोद्घोषणे 'आनन्दवर्धन इति प्रथिताभिधान' 'आनन्दो मनसि लभतां प्रतिष्ठा'मित्यानन्दवर्धनाचार्यप्रदर्शितरीत्या नव्यालङ्कारसिद्धान्तप्रवर्तकानामन्वर्थसङ्केततामभिधातु, न त्वर्वाचीनसुधासागरादिकृत्कृततत्स्वरूपतद्ग्रन्थादीनामज्ञतामूलकमिवेत्यवधेयम्।

परिमृदितमृणालीम्लानमङ्गं प्रवृत्तिः कथमपि परिवारप्रार्थनाभिः क्रियासु ।
कलयति च हिमांशोर्निष्कलङ्कस्य लक्ष्मीमभिनवकरिदन्तच्छेदकान्तः कपोलः ॥२८॥
(मा मा. १।२२)

इत्यादौ

दूरादुत्सुकमागते विवलितं संभाषिणि स्फारित
सश्लिष्यत्यरुण गृहीतवसने किञ्चाञ्चितभ्रूलतम् ।
मानिन्याश्चरणानतिव्यतिकरे बाष्पाम्बुपूर्णेक्षण
चक्षुर्जातमहो प्रपञ्चचतुरं जातागसि प्रेयसि ॥२९॥ (अ श)

इत्यादौ च यद्यपि विभावानामनुभावानामौत्सुक्यव्रीडाहर्षकोपासूया-प्रसादानां च व्यभिचारिणां केवलानामत्र स्थितिस्तथाऽप्येतेषामसाधारणत्वमित्यन्यतमद्वयाक्षेपकत्वे सति नानैकान्तिकत्वमिति ।

शृङ्गारहास्यकरुणरौद्रवीरभयानका ।
बीभत्साद्भुतसंज्ञौ चेत्यष्टौ नाट्ये रसाः स्मृता ॥२९॥

तत्र शृङ्गारस्य द्वौ भेदौ सम्भोगो विप्रलम्भश्च । तत्राद्यः परस्परावलोकना-

---

विभावस्तथाभूता आकाशादय उद्दीपनविभावा । **परीत्यादि**—परिमलन (मर्दन) मङ्ग-प्रत्यङ्गलुलन तज्जनितया ग्लान्या निद्राच्छेदादि । **प्रवृत्तिः कथमपी**त्यादिना विषय-निवृत्तिः । **कलयत्य**नुकुरुते । **लक्ष्मीः** कान्ति । **अभिनवे**ति च्छेदविशेषणम्, तथा-भूतेन कपोलपाण्डुत्वेन कोऽपि कामाभिषङ्ग सूच्यते । **दूरादि**ति—औत्सुक्य स्वशब्देनोक्तम् । अस्य च यथा न दुष्टत्वं तदग्रे (७म उ) वक्ष्यते । औत्सुक्यार[म्भ] चा(श्चा) नुरक्त-कत्वावैपरीत्याचरणलक्षणेन । विवलनेन (**विवलितेन**) लज्जा व्यज्यते । प्रसृतनेत्रपुटत्व-रूपेण स्फारणेन हर्षः । आरुणेन कोप । **अञ्चितभ्रूलत**त्वेनासूया । **व्यतिकर**पदेन ससर्गपरेण चरणपातस्य सुतरां (49a) मानपरिपन्थित्वं द्योत्यते । ईक्षणव्यापारेऽक्षेक्षण-शब्द । **प्रपञ्चचतुर**मित्येकस्यैव वस्तुनो भूयान् भेद [प्रपञ्चः] । **जातागसि** न तु कृतागसि, अतएवाह **प्रेयसीति** ।

शृङ्गारेत्यादि—नट अवस्कन्दन इति नटः । किञ्चिच्चलनार्थत्वात् सात्त्विकबहुलं देवर्षिमनुष्यादीनां हर्षविस्मयादिजननं यत् पुरावृत्ताख्यान तदनुकारचतुर्विधाभिनय-(ये)न तादात्म्यापत्तिर्**नाट्यं**, तदाश्रिता रसा **नाट्यरसाः** । **ते चाष्टावि**ति भरतमतानुसारेण, नवमस्य शान्तरसस्याग्रे स्थापयिष्यमाणत्वात् । तत्र शृङ्गारो नाम परस्परजीवितसर्व-

लिङ्गनाधरपानपरिचुम्बनाद्यनन्तत्वादपरिच्छेद्य एक एव गण्यते। यथा—

शून्यं वासगृह विलोक्य शयनादुत्थाय किञ्चिच्छनै
निद्राव्याजमुपागतस्य सुचिर निर्वर्ण्य पत्युर्मुखम्।
विस्रब्ध परिचुम्ब्य जातपुलकामालोक्य गण्डस्थली
लज्जानम्रमुखी प्रियेण हसता बाला चिर चुम्बिता ॥३०॥ (अ श)

स्वाभिमानात्मकरतिस्थायिभावप्रभाव स्त्रीपुसहेतुक उत्तमयुवप्रकृतिरुज्ज्वलवेशात्मक आलस्यौ-ग्र्यजुगुप्सारूपव्यभिचारिव्यञ्जित। अयञ्च श्यामवर्णो विष्णुदैवत। एतदुपयोगश्च मसीपरिग्रहादौ। एवमुत्तरत्रापि द्रष्टव्यम्। अस्य च द्वे अधिष्ठाने **सम्भोगो विप्रलम्भश्च**। तत्र सम्भोगस्यानन्त्य दर्शयति **परस्परावलोकने**ति। एतेन सम्भोगस्य क्रमेणादिमध्यान्तावस्था निदर्शिता। अभिनयैरुपदर्श्यमानश्चाय न तथा स्वदते यथा सन्दर्भविशेषे समर्प्यमाण[14]। यदाहु (हृ द)—कविवागभिनेयश्च तदुपायो द्विधेष्यते। वस्तुशक्ति-(49b) महिम्ना तु प्रथमोऽत्र विशिष्यते॥ इति। अतो यद्यपि भरतपाठानुसारेण **नाट्यरसा** इत्युक्त तथापि काव्यस्य प्राधान्यात् परिचुम्बनाद्यात्मन सम्भोगस्य नाट्यविषयतया साक्षात् प्रयोक्तु मुनिनैव निषिद्धत्वामुनिनेय (त्तमुन्नेय) काव्यविषयतयाऽऽख्यायमानमुदाहरति। **शून्य-मि**त्यादि। "**लज्जानम्रे**त्यन्तर्भूतणिजर्थत्वेन नामने बालाया कर्तृत्वम्।" (रु स २१) रतेरुभयाधिष्ठानत्वात् सम्भोगस्योभयाधिष्ठानाच्चापि नायिकाप्रयुक्तसम्भोगस्येदमुदारण, **त्वं मुग्धाक्षी**त्यादिषु नायकप्रयुक्तस्य। उभयत्रापि च परस्परानुरागस्य पारप्राप्तस्य वर्णनम्। तदिह "**बाले**ति निर्दिष्टाया नायिकाया **प्रियेणे**ति निर्दिष्टमालम्बन विभावत्वेन, अनुभावा विलोकनादीनि परिचुम्बनपर्यन्तानि, **जातपुलकत्वलज्जानम्रत्वे** तु व्यभिचारिभावभूताया लज्जाया विभावना। नायकगतत्वेन च व्याजनिद्राऽऽश्रयण पुलकोद्गम सात्त्विक,

---

14 अत्र 'काव्येषु दशरूपक श्रेय' इति वामनाद्यै स्वीकृतस्य नाट्यस्य न न्यक्करण, परन्तु श्रव्यकाव्यस्य 'तस्य कर्म स्मृत काव्य'मिति कविव्यापारभूतवक्रत्वाद्युपादान-भारातिशयेनैव श्लाघन यदाह 'वस्तुशक्तिमहिम्ने'ति। स च व्यापारो वर्णनासहकृत एव वरोवर्ति, 'परिनिष्ठितार्थविषयोन्मेषा च वैपश्चिती दृष्टिरि'तिविशेषिताया 'नोदिता कविता लोके यावज्जाता न वर्णने'त्युद्दिष्टायाश्च प्रबन्धनिष्पत्तिरभिनेयार्थ-निर्वर्तनमिति श्लाघितायास्तेनैव सम्भवात्। एवमेवातिप्राचीनै पाश्चात्त्य-विमर्शकैरिदानीन्तनैश्चोपकरणसामग्री श्रव्यकाव्यस्य प्रशस्यते।

तथा

त्वं मुग्धाक्षि विनैव कञ्चुलिकया धत्से मनोहारिणी
लक्ष्मीमित्यभिधायिनि प्रियतमे तद्वीटिकासंस्पृशि ।
शय्योपान्तनिविष्टसस्मितसखीनेत्रोत्सवानन्दितो
निर्यातः शनकैरलीकवचनोपन्यासमालीजनः ॥३१॥ (अ श)

अपरन्तु, अभिलाषविरहेर्ष्याप्रवासशापहेतुक इति पञ्चविधः। क्रमेणोदाहरणम्—

प्रेमार्द्राः प्रणयस्पृशः परिचयादुद्गाढरागोदया-
स्तास्ता मुग्धदृशो निसर्गमधुराश्चेष्टा भवेयुर्मयि ।
यास्वन्तःकरणस्य बाह्यकरणव्यापाररोधी क्षणा
दाशंसापरिकल्पितास्वपि भवत्यानन्दसान्द्रो लयः ॥३२॥ (मा मा. ५।७)

परिचुम्बनश्चानुभाव । यद्यपि निद्रा व्यभिचारिभावस्तथाऽपि तस्याश्चित्तवृत्तिविशेषत्वेन व्यभिचारिभावत्वात्तस्य चात्र व्याजात्म-(त्त) तया वस्तुवृत्तत्वाभावान्न वास्तव व्यभिचारित्व मिति व्याजेन तदाश्रयणस्य नानुभावत्वमुक्तम् । व्यभिचारिभावश्च विलोकनेन शङ्कोत्थानेन चपलता, तस्य (50a) शनैर्भावेन त्रास, **सुचिरं** निर्वर्णनेन किमयं सुप्तो नवेति सन्देह-प्रभवो वितर्को, निर्वर्णनेन हर्ष, परिचुम्बनेनौत्सुक्यमवलोकनेन [च] लज्जाऽऽख्यो निर्दिष्टः । नायकश(ग)तत्वेन तु व्याजनिद्राऽऽश्रयणेन धृतिराकारगोपनरूपमवहित्थ च चिरपरिचुम्बने-नौत्सुक्य हर्षश्च व्यभिचारिभावा प्रतिपादिता" (रु स २३ पृ)। तदियमभिलाषप्रसर-निरोधपरम्परामसहमाना तं परिचुम्बितवती, तेनापि च सा परि**चुम्बितेति** स्वयमनुभूत परत्रानुमित स्थायी रतिरूपो विभावादिभिरभिव्यज्यमानः स्रक्सूत्रन्यायेन विगलितवेद्यान्तरै सामाजिकैश्चर्व्यमाण परब्रह्मसाक्षात्कारक्षणमिव (इव) प्रत्यक्षतामुपनयन्नयमपारचमत्कार-सारतायां विश्राम्यतीति परस्परजीवितसर्वस्वाभिमानरूपाया रतेः केनचिदध(द्ध)न्येन लब्धा-वगाहनायाः पारप्राप्ते परिचुम्बनलक्षणः सम्भोगशृङ्गार परिपूर्ण ।

त्वं मुग्धाक्षीत्यादौ(दि)—**प्रियतम** इति प्रियत्वमात्रनिरासपरेण तमपा कोऽप्यनु-रागप्रकर्षः । वीटिकाग्रथननिविष्टस्मितविशेषवतीयं **सखी** नायिका सैव **नेत्रोत्सव-**स्तेना**नन्दित** इति । अत्र "मुग्धाक्षी प्रियतमश्चालम्बनविभावौ, उद्दीपनविभावस्तु शय्यातदाक्षिप्तं वा-(50b)सगृह, स एवातीव(ली-) जननिर्गमनेन पारं प्रापितः, अनुभावो वीटिकास्पर्शो व्यभिचारिभावस्तु मुग्धाक्षीति चाटुकाररूप स्तुत्याख्यो रतिभाव कथित । एवंविधस्य रतिभावस्य स्थायित्वाभावात् पारिशेष्यतो व्यभिचारित्वं तथा [तस्याः]

अन्यत्र व्रजतीति का खलु कथा नाप्यस्य तादृक् सुहृद्
यो मां नेच्छति नागतश्च हहहा कोऽय विधेः प्रक्रमः।
इत्यल्पेतरकल्पनाकवलितस्वान्ता निशान्तान्तरे
बाला वृत्तविवर्तनव्यतिकरा नाप्नोति निद्रां निशि ॥३३॥

एषा विरहोत्कण्ठिता।

वीटिकास्पर्शनौत्सुक्यचपलताऽऽवेगाना स्वीकार, स्मित नायिकागतत्वेन लज्जाऽनुभाव। अपसारितकञ्चुका च नायिकाऽऽलम्बनविभाववद्भाव्युद्दीपनविभावोऽपि। एवं पूर्ववद् विभावादिसामग्रीवशाद्रसाभिव्यक्ति" (रु स २३ पृ)।

अपरस्त्विति—विप्रलम्भ। अयश्च "प्रथमानुरागमानप्रवासकरुणात्मकत्वेन" (रु का अ १४।१) यद्यप्यन्यैश्चतुर्विध उक्तस्तथाऽपि शापहेतुक भेदमाश्रित्याह[15] **पञ्चधेति**। त(य)त्रालोकनादिमात्रात् प्रकर्षधाराऽधिरूढानुरागयोर्नायकयोः कुतश्चिन्निमित्तादसप्राप्तयोश्चेष्टा स प्रथम। अत्र चाभिलाषचिन्तास्मृतिगुणकीर्तनोद्वेगप्रलापोन्मादव्याधिजडतामरणरूपा दशावस्था जायन्ते। तत्राभि**लाष**हेतुको विप्रलम्भो यत्रानिर्व्यूढसमागमे मनोरथादि-

---

15 अन्यैरिति रुद्रटेन तदनुसारिणा भोजेन तदनुजीविना चान्येन। रुद्रटकृते विप्रलम्भभेदप्रवासविप्रलम्भलक्षणे 'यत्रस्त्वेवस्थोऽन्यथा चे'ति ग्रहण' दशरूपके च (४।६४) तत्सदृश लक्षणमेतदेव कक्षीकुरुते। भोजकृते शृङ्गारप्रकाशे प्रवासविप्रलम्भस्य विशेषभेदेषु दैवकृतविभेदस्य शाप' प्रथम प्रकार। वस्तुतस्तस्य पृथक्तया स्वीकारोऽनैकान्तिक एव। शापविप्रलम्भोदाहरणविवरणेऽग्रेऽवतारिते टीकाकृतां विप्रतिपत्तिरेरवात्र लिङ्गम्। रुचकेन तत्र शापविप्रलम्भत्वेन ग्रन्थकृत्सङ्गितस्यैव निर्देश कृत। श्रीधरोद्धृतानां काश्मीरकानां रुचकतो व्यतिरिक्तानां मते मानविप्रलम्भस्यैवोदाहरणमिदम्। वाचस्पतिमिश्रास्त्वत्र प्रवासविप्रलम्भ इति मन्यन्ते। श्रीधरः पुनर्मानस्येत्याद्यग्रिमग्रन्थेन शापविप्रलम्भ' सङ्गमयति। सैषा व्याख्याभिदा 'व्याख्यानतो विशेषप्रतिपत्तिर्न सन्देहो ह्यलक्षण'मिति तन्त्रान्तरप्रसिद्धदर्शनमेवोपजीवति। उभावेव काव्यप्रकाशदीपिकाकृतौ चण्डीदासो जयन्तश्च तत्र रसध्वनित्वपक्षमेव न साधु मन्यमानौ कयाऽपि गमनिकया ग्रन्थसङ्गतिं कुरुतः।

सा पत्यु प्रथमापराधसमये सख्योपदेश विना
नो जानाति सविभ्रमाङ्गवलनावक्रोक्तिससूचनम् ।
स्वच्छैरच्छकपोलमूलगलितैः पर्यस्तनेत्रोत्पला
बाला केवलमेव रोदिति लुठल्लोलोदकैरश्रुभिः ॥३॥ (अ श)

विषयोऽभिलाष । विरहोत्कण्ठितया सह विप्रलम्भो **विरहविप्रलम्भ** । **ईर्ष्याविप्रलम्भो** नायिकाऽन्तरव्यग्रनायकविषय । परदेश नायके यास्यति याति याते वा प्रवास-(51a)हेतुक **प्रवासविप्रलम्भः** । शापवशाद्यत्र नायकयोरन्यत्र विघटन स **शापविप्रलम्भ** । ननु शापहेतुको भरते (ना शा १म ३६८ पृ) करुणरस उक्त, तत्र कथ तद्धेतुको विप्रलम्भ स्यात् ? सत्यं सापेक्षनिरपेक्षभावकृतोऽनयोर्विशेष । शापहेतुकोऽपि सापेक्षभावो यथा कालिदासस्य विक्रमोर्वश्या मेघदूते च । करुणस्तु निरपेक्षभावो यथेन्दुमतीविषयेषु प्रलापेषु । **प्रेमार्द्रा** इत्यादि—**प्रणयः** प्रेमपूर्वको वशीकार । 'प्रेमार्द्रा इत्याद्यनुवादेन परिचयादुद्**गाढरागोदया** भवेयुरिति विधेयम्' । (रु स. २१ पृ) तास्ता इति या स्वसवेद्याव्यपदेश्यानन्तरूपा । **निसर्ग**पदेनाधेयगुणविरह । **अन्तःकरणम्** मनो बहि -(बाह्य) करण चक्षुरादि, तद्व्यापारपरिपन्थी हर्षमयो **लय**स्तन्मयत्वम् । अत्रानन्यसामान्यपरस्परानुरागसन्तप्यमानरणरणकोत्कलिकाकदर्थ्यमानमानसत्वेऽपि गुरुजनपारतन्त्र्यादनिर्व्यूढ समागम इति । 'अत्राभिलाषविप्रलम्भे प्रबन्धविषये मालती माधवस्यालम्बनविभावो, वसन्तोद्यानादि प्रबन्धगत उद्दीपनविभाव , को क्वादिर्वाचिकोऽनुभाव । एतन्मुद्रिताश्चिन्तास्मृतिप्रभृतयो व्यभिचारिण —एभिरत्राभिलाषविप्रल (51b)म्भो व्यज्यते' (रु. स २४पृ)। **अन्यत्र**ेति । **मां नेच्छती**ति दयितसमागमाधीनमात्मजीवितत्वं **हहहे**ति कष्टे, **प्रक्रम** आरम्भ । **अल्पेतर** बहु । **स्वान्त** मन । **निशान्त**मन्त पुरम् । स्त्रियश्चतुर्धा, यदाहु —

दिव्या च कुलपाली च कुलस्त्री गणिका तथा । एतास्तु नायिका ज्ञेयाश्चतस्र काव्यहेतव ॥

इति । एता एवावस्थाभेदादष्टधा—तद् यथा—स्वाधीनपतिका विरहोत्कण्ठिता वासकसज्जा कलहान्तरिता खण्डिता विप्रलब्धा प्रोषितभर्तृकाऽभिसारिका चेति । अनौचित्यप्राप्ता(प्राप्त आ)गमनसमयेऽपि प्रियतमस्यानागमनाच्चिन्ताविधुरा **विरहोत्कण्ठिता** । तदिह विरहोत्कण्ठिताया अनागतो नायक आलम्बनविभावोऽन्त पुरादिकमुद्दीपनं **विवर्तनाद्या**ङ्गिकोऽनुभाव', एतत्प्रकाशिताश्च चिन्ताऽऽदयो व्यभिचारिण । 'एभिरत्र विरहविप्रलम्भो व्यज्यते' (रु. सं २१ पृ)। अत्रापि पूर्ववदुप (52a) चरित एव विप्रलम्भशब्द । **सा पत्यु**रित्यादि—सख्युर्भाव **सख्यं**, तेनोप**देश** इति । **सविभ्रमाङ्गवलना**दिभि-

प्रस्थान वलयैः कृत प्रियसखैरस्रैरजस्रं गत
धृत्या न क्षणमासित व्यवसित चित्तेन गन्तु पुरः।
यातु निश्चितचेतसि प्रियतमे सर्वे सम प्रस्थिता
गन्तव्ये सति जीवित ! प्रियसुहृत्सार्थः किमु त्यज्यते ॥३५॥

(अ श)

त्वामालिख्य प्रणयकुपितां धातुरागैः शिलाया-
मात्मानं ते चरणपतित यावदिच्छामि कर्तुम् ।
अस्रैस्तावन्मुहुरुपचितैर्दृष्टिरालुप्यते मे
क्रूरस्तस्मिन्नपि न सहते सङ्गम नौ कृतान्त ॥३६॥ (मे दू उ ४४)

रपराधोद्भावनं दयितसमावर्जनाय विधेयमिति तद्विदा रहस्यम् । **[गलित]**स्खलद्गति-पतन, **लोठन**मश्रुण उदकात्मकत्वेऽपि प्रवाहरूपताऽभिव्यञ्जक **लोलोदकै**रिति विशेषणम् । 'अत्र नायिकाया **पत्यु**रिति निदिष्टमालम्बनम्, एतत्प्रकाशिताश्चासूयाऽमर्षादयो व्यभि-चारिण । एतैरत्रेर्ष्याविप्रलम्भ प्रकाश्यते' (रु स २४ पृ)। अत्र च मुख्य एव विप्रलम्भशब्दो वञ्चनार्थत्वात् । **प्रस्थानमि**त्यादि । वलयादीनामपसरणादिषु स्वातन्त्र्येण यस्य प्रवासशङ्कामात्रमपि जीवितसशयमापादयति तस्मिन् प्राणेश्वरेऽङ्गीकृतप्रवाससाहसे सत्याकस्मिकतद्विच्छेदाविर्भवत्सकलकरणक्षोभायास्तात्कालिकी काऽपि तनुताऽऽव्यवस्था द्योत्यते । '**जीवित प्रिय**'इत्यामन्त्रणे पदद्वयम् । **प्रियेति तु** सुहृद्विशेषणत्वे प्रियसखै-रित्यश्रुविशेषण न वाच्यम् । 'अत्र प्रियतम इति निर्दिष्टमालम्बन, प्रियागमनौन्मुख्य-मुद्दीपन, कार्श्यमश्रु चानुभावौ, विषादश्चित्तस्य पुरोगमनादावेगो मरणञ्च सूच्यमानं व्यभिचारि-भाव । एभिरत्र प्रवासविप्रलम्भो दीप्यते' (रु स २४ पृ)। **त्वामालि**-(52b) **ख्ये**त्यादि । **धातुरागैरिति** बहुवचन**मालिख्ये**ति समन्तादर्थमाङित्युपपद पुष्णाति, तेन हि करचरणपल्लव(कपोल)चक्षुरादिरूपनिष्पादका भिन्नभिन्नवर्णा मन शिलाऽऽदयो गम्यन्ते । **प्रणय**पदेन सत्य(?)क्रोधजनकोऽपराधस्तव कदापि न मया कृत इति व्यज्यते । **शिला**पदेन लिखनयोग्यता, लिखतोऽपि ममाश्रूणि निर्गतान्येव, तानि च दृष्टिविघातमिव कृतवन्ति किन्तु मुद्गर(मुकुर) प्रोञ्छनेनापोह्यन्त इति कथ कथमपि लिखननिर्वाह । इदानीन्तु प्रणामकालोद्यममात्रे स्मृतत्वच्चेष्टाविह्वलान्त करणस्य मम वार वार प्रवाहरूपतामापन्नै-रश्रुभि समन्ताद्दृष्टिरालुप्यत इति **वाचस्पतिमिश्राः**। जानास्येव यथा प्रणयरोषेर्ष्याव्यवहितेषु विलासेषु मम वाष्पतरलितं चक्षुर्भवतीति मयि कामय (काम्य)-जीवितत्वम् 'आत्मानन्ते'

हास्यादीनां क्रमेणोदाहरणम्—

आकुञ्च्य पाणिमशुचि मम मूर्ध्नि वेश्या मन्त्राम्भसां प्रतिपद पृषतैः पवित्रे ।
तारस्वर प्रहितथूत्कमदात् प्रहार हा हा हतोऽहमिति रोदिति विष्णुशर्मा ॥३०॥

इति पदशङ्कया व्यज्यते। अन्यथाऽऽत्**मानमिच्छामी**त्युपक्रमणे **नौ** इत्युपसहारे च प्राप्तत्वाद्व्यर्थताऽऽपत्तिरिति काश्मीरका[16]। वयन्तु ब्रूम, यावदेवैतत् सर्व कर्तुमिच्छामि तावत् सङ्कल्पविषय एव प्रलापसमयानुभूतकृतककोपप्रसादसम्भेदात्मकस्मृतत्वच्चेष्टाविह्वलस्य ममाविर्भूतैरश्रुभिर्दृष्टिरालुप्यते, तच्चित्रलिखिताया अपि तावदास्ता दर्शन-(53a) विनोदनादिकं, यावत्तल्लिखनोचितरेखोपरेखाऽऽदिरूपमपि सङ्गम न सहत इत्यत एव **कृतान्तस्या**पि पुन **क्रूर** इति विशेषणम्। दैवमपि(भि) शापमन्तरेण नैतन्मिथुनविघटने पटीय इति यथाऽत्र रतिरतितरामुद्दीप्ता तथाऽऽलेख्यादिरूपस्यापि समागमस्य विप्रयोग इति विप्रलम्भोऽपि परं पारमाश्रयते। मानसस्यापि च प्रवासस्य सर्वथैवाननुप्रवेशादयमबुद्धिपूर्वक । '**अत्र गुह्यकस्य त्वामि**ति निर्दिष्ट आलम्बनविभाव, मेघोदयाद्युद्दीपनविभाव, चित्रलेखनं बाष्पश्चानुभाव, स्मृतिर्व्यभिचारिभाव, एतै शापविप्रलम्भो व्यज्यते' (रु मं २४ पृ)। विप्रलम्भस्तु करुणवदि'ति (ना शा) वचनात् करुणे ये भावा निर्वेदादयस्तेऽत्रापि द्रष्टव्या । तदित्थ वितत्य विभावादियोजना कृत्वा विभावादिभिरभिव्यक्त श्रृङ्गाररस उभयप्रकार प्रकाशित ।

इदानीन्तु तथैव **हास्यादयो** विविच्यन्ते। तत्र हास्य सित प्रमथदैवत । **आकुञ्च्ये**त्यात्र हास स्थायिभाव । अयञ्च हासो 'रतिवद्भयाधिष्ठानत्वाभावेन हासकनिष्ठ एव। स चात्रानुपनिबद्धोऽपि हासो विभावमाहात्म्यात् प्रतीयते। विभावस्तत्रालम्बनरूपो **विष्णुशर्मा**, उद्दीपनविभा(53b)-वरूपस्तु **प्रहारदाना**दि, अनुभावव्यभिचारिणावनुक्तावपि साक्षात् प्रतीयेते, तत्रानुभावा कपोलस्पर्शनदृष्टिसकोचादय, व्यभिचारिण पुनरवहित्थाऽऽदय । एभिः सहृदयस्य हास्यरसाभिव्यक्तिर्भवति। यत्र तु हासक उपनिबध्यते तत्रानुभावव्यभिचारिणावपि यथायोगमुपनिबद्धौ ज्ञेयौ'। (रु स २५पृ) अथ शोकस्थायि-

---

16 रुचककृतसङ्केतेऽस्यानुपलम्भात् के एते इति निर्णेतु न शक्यते। यदि तावत् काव्यप्रकाशटीकाकृतामेवात्रोद्देशस्तदा वाचस्पतिमिश्रादर्वाक् श्रीधरात् प्राक् च कोऽप्यन्यो काश्मीरकटीकाकृदासीदिति सम्भावना जागर्ति ।

हा मातस्त्वरिताऽसि कुत्र किमिदं हा देवताः क्वाशिषो
धिक् प्राणान् पतितोऽशनिर्हुतवहस्तेऽङ्गेषु दग्धे दृशौ ।
इत्थं घर्घरमध्यरुद्धकरुणाः पौराङ्गनानां गिर-
श्चित्रस्थानपि रोदयन्ति शतधा कुर्वन्ति भित्तीरपि ॥३८॥
कृतमनुमतं दृष्टं वा यैरिदं गुरुपातकं
मनुजपशुभिर्निर्मर्यादैर्भवद्भिरुदायुधैः ।
नरकरिपुणा सार्धं तेषां सभीमकिरीटिना-
मयमहमसृङ्मेदोमांसैः करोमि दिशां बलिम् ॥३९॥ (वे स ३।)

भाव करुण । अथ कपोतवर्णो यमश्चास्याधिदेवता । **हा मात**रित्यत्र करुणोदाहरणे मातृशब्दवाच्या शोचनीयोत्तमस्त्री आलम्बनविभाव, **अङ्गेषु हुतवह** उद्दीपनविभाव, रोदनपरिदेविते अनुभाव, तदाक्षिप्तास्तु व्यभिचारिणो निर्वेदग्लानिचिन्तादैन्यादय । एभिरत्रेष्टनाशप्रभव शोकस्थायिभावो व्यज्यमान सामाजिकाना तन्मयीभवनयुक्त्या समास्वाद्यता प्रतिपन्न करुणो नाम रस । ननु करुणात्मककाव्यश्रवणाद् खाविर्भावोऽश्रुपातादयश्च रसिकानामपि प्रवर्तन्ते, तत् कथमस्य रसत्वमिति चेत् ? उच्यते—यथा षाडवादौ[17] शर्करादिमाधुर्यस्य मरिचादिना यथा वा रतहर्षसम्भवे स्त्रीणा केशाधरग्रहणात्मना कुट्टमितेन तथाऽत्रापीति वृत्तवर्णनाकर्णनोपचरितदु खानुवेधेनानन्दस्यैव प्रकर्ष, विप्रलम्भवदस्य निरतिशयानन्दा-(54a) त्मकत्वात् । अतएव चात्रोत्तरोत्तर रसिकाना[18] प्रवृत्तय (द रू ४।४४-४५ वृः)यदि च लौकिककरुणवद् खात्मकत्वमस्य स्यात् तदा न केऽप्यत्र सचेतस प्रवर्तेरन्, एवञ्च करुणरसप्रधानो नाम (प्रधानानाम)-भिनेयानभिनेयकाव्यानामुच्छेदः प्रसज्यत इत्यादिकमवसेयम् । अथ क्रोधस्थायिभावो रक्तवर्णो रुद्राधिदैवत सग्रामादिहेतुको रौद्र । **कृतमि**त्यादि । **नरकरिपुणा** विष्णुना सहेति । "अत्राश्वत्थामगतक्रोध स्थायिभाव,

---

17 भरतनाट्यशास्त्रीयोऽय दृष्टान्त, अनेन पश्चात्तनेषु मतेषु पानकरसस्यैव निर्देश । सङ्गीतशास्त्रे षाडवशब्दो यथा षट्स्वरसश्लिष्टस्तथाऽत्रापि षट्संख्यकैर्मरिचाद्युपादानै सवलित स्यात् । तात्पर्यं तूभयत्राखण्डास्वादसतत्त्वे । देवताऽदिकल्पनमपि रसाना सङ्गीते रागरागिणीनामिव ध्यानवेद्यत्वेन व्यवस्थेयम् । उभयत्रापि न यदृच्छा पर तूपलब्धिसिद्धता ज्यायसी वशीकरणहेतुभूता च ।

18 एतच्च "शृङ्गारे विप्रलम्भाख्ये करुणे च प्रकर्षवद्"इत्यानन्दवर्धनमतमुपजीव्योक्तम् । लोचने करुणे चेति शब्दकममाहेति विवरणं तदभिप्रायकमेव ।

क्षुद्राः सन्त्रासमेते विजहत हरयः क्षुण्णशक्रेभकुम्भा
युष्मद्देहेषु लज्जां दधति परममी सायका निष्पतन्तः।
सौमित्रे तिष्ठ पात्र त्वमसि न हि रुषां नन्वहं मेघनादः
किञ्चिद्भ्रूभङ्गलीलानियमितजलधिं राममन्वेषयामि ॥४०॥ (ह ना)
ग्रीवाभङ्गाभिरामं मुहुरनुपतति स्यन्दने बद्धदृष्टिः
पश्चार्धेन प्रविष्टः शरपतनभयाद्भूयसा पूर्वकायम्।
दर्भैरर्धावलीढैः श्रमविवृतमुखभ्रंशिभिः कीर्णवर्त्मा
पश्योदग्रप्लुतत्वाद्वियति बहुतरं स्तोकमुर्व्यां प्रयाति ॥४१॥

(अभि श १।७)

तत्र **गुरुपातक**मालम्बनविभाव, **उदायुधत्व**मुद्दीपनविभाव, तेन हि गुरोरस्त्रत्याग आक्षिप्यते, अनुभावो**ऽसृङ्मेदोमांसैर्दिग्बलि**करणम्, प्रतिज्ञाभ्रुकुटिदन्तौष्ठसंदंशनादयश्च सामर्थ्यादवसेया, व्यभिचारिणश्चैतदनुभावगम्या आवेगामर्षचपलतौग्र्यादय। एतै रौद्र-रसोऽभिव्यज्यते" (रु स २५) रक्तास्यनेत्रता चात्र जायते, इतरथा वीर इति। अथोत्साहस्थायिभावो गौरवर्णो महेन्द्राधिदैवतो वीर। अयञ्च दयादानधर्मयुद्धभेदा-च्चतुर्धा। तत्र दयावीरादीना शान्तप्रभेदत्व[19]मिति मन्यमानो युद्धवीरमुदाहरति, अभिमान मयत्वेनास्य व्यवस्थापनात्। **क्षुद्रा** इति। सुमित्रातनयत्वेन व्यपदेशो वीरत्वनिरासाय, **नन्वि**त्यभिमुखीकरण निश्चयाय, **अहं मेघनाद** इति (54b) प्रसिद्धवीरगुणत्वं तदिहाहमेवं-विध इत्येवप्रमाण कोऽप्युत्साहः स्थायिभाव, तत्र रामभद्र आलम्बनविभाव, **जलनिधि नियमन**मुद्दीपनविभाव, वानरलक्ष्मणपरित्यागेन रामान्वेषणमनुभाव, तदाक्षिप्ता धृति-गर्वौत्सुक्यादयो व्यभिचारिण। एभिरत्र वीररसाभिव्यक्ति' (रु स २५)। अथ कृष्णवर्णं कालाधिदैवतो भयस्थायिभावो भयानक। **ग्रीवे**त्यादि "अत्र मृगगतभय स्थायिभाव

---

19 अशतो रुद्रटमनुसृत्येदं, दयावीरस्यैव केवलस्य तत्र (१५।१) वीरेऽन्तर्भाव-प्रतिषेधात्। दयावीरस्य शान्तप्रभेदस्वीकार आनन्दवर्धनाचार्यवचनमेव प्रमाणम् "यथा शान्तशृङ्गारौ नागानन्दे निवेशिता"विति। टीकायामत्र एतदर्थे मुनिवचनोद्धृति। अत्रापि मूलग्रन्थे सप्तमोल्लासे 'यथा नागानन्दे शान्तस्ये'ति। सा च वृत्तौ मम्मटोक्तिरवितथाऽप्यापाततोऽनवधानमूलेति प्रतीयते। 'अष्टौ नाट्ये रसा स्मृता' इति नाट्ये शान्तस्य स्वमुखेनैव तेन निषिद्धत्वात्। सूत्रकृद्वृत्तिकृतोर्भेदो नानेन समर्थनीय इति त्वन्यत्रोक्तमस्माभि।

उत्कृत्योत्कृत्य कृत्तिं प्रथममथ पृथूत्सेधभूयांसि मांसा-
न्यंसस्फिक्पृष्ठपिण्ड्याद्यवयवसुलभान्युग्रपूतीनि जग्ध्वा ।
आर्तः पर्यस्तनेत्रः प्रकटितदशनः प्रेतरङ्कः करङ्का-
दङ्कस्थादस्थिसंस्थं स्थपुटगतमपि क्रव्यमव्यग्रमत्ति ॥४२॥

(मा मा ५।१६)

चित्रं महानेष बतावतारः क्व कान्तिरेषाऽभिनवैव भङ्गिः ।
लोकोत्तरं धैर्यमहो प्रभावः काऽप्याकृतिर्नूतन एष सर्गः ॥४३॥

दुष्यन्ताधिष्ठितस्यन्दन आलम्बनविभाव, तदीयमनुपतन शरपतनोन्मुखत्वञ्चोद्दीपनविभाव, ग्रीवाभङ्गादृष्टिपातादयश्चेष्टाविशेषा समग्रश्लोकव्यापिनोऽनुभावा, तदाक्षिप्ताश्च व्यभिचारिण शङ्कात्रासश्रमादय । एषामत्र भयानकरसाभिव्यञ्जकत्वम्" (रु स २५ पृ) अथ नीलवर्णो महाकालाधिदैवतो जुगुप्सास्थायिभावो **बीभत्सः** । **उत्कृत्येत्यादि** । **कृत्तिश्चर्म, पिण्डी** जङ्घाया ऊर्ध्वभाग, **आदिपदात्** कक्षामूल मासलस्थानम्, **उग्रपूती**-न्युत्कटसटित(?) गन्धानि, **स्थपुटं** निम्नोन्नतम् । "अत्र जुगुप्सा स्थायिभाव । सा च जुगुप्समानाधिष्ठाना । तद्गता हि जुगुप्सा भित्तित्वेनालम्ब्य सहृदया साधारण्येन चर्वयन्ति । स च जुगुप्समानोऽत्रानिर्दिष्टो(55a)ऽपि हास्यरसन्यायेन विभावादिसामर्थ्यादाक्षिप्यते । तत्र प्रकरणे प्राधान्येन वर्ण्यमानं श्मशानमालम्बनविभाव, प्रेतकर्तृक शवनिष्ठ कृत्युत्कर्तनादिसमस्तश्लोकगतमुद्दीपनविभाव, तदाक्षिप्ताश्चानुभावा, अथ-(मुख) विकूणननिष्ठीवनादय, व्यभिचारिणश्च ग्लानिमोहव्याधिप्रभृतय । एभिरत्र बीभत्सरस प्रकाश्यते" (रु सं २५ पृ) । अथ पीतवर्णो ब्रह्माधिदैवतो विस्मयस्थायिभावोऽद्भुत । **चित्र**-मित्यादि । **बतेति** श्लाघायाम् । "अत्र विस्मय स्थायिभाव । स च विस्मयमानाधिष्ठानः । विस्मयमानश्चात्र वक्तैव क्वचिद्वर्ण्यमानोऽपि भवति । एव रसान्तरेऽपि बोद्धव्यम् । अतएव चर्व्यमाणो (अत्र वर्ण्यमानो) लोकोत्तर पुरुष आलम्बनम्, तदीयं निर्विकारत्वाद्युद्दीपनविभाव, स्तुतिरनुभाव, एव नयनविस्तारानिमेषप्रेक्षणरोमाञ्चादयोऽपि सामर्थ्यादवसीयन्ते, व्यभिचारिणो हर्षौत्सुक्यादयस्तुल्यानुगुण्येन प्रतीयन्ते" (रु सं २५-२६) तदित्थमेषामद्भुतरसव्यञ्जकत्वम् । विभावानुभावौ लोकप्रसिद्धावेवेति तयोर्लक्षण मुनिनाऽपि न कृतम् । यत् स एवाह—(ना शा ७।६) लोकस्वभावससिद्धा लोकयात्राऽनुगामिन । अनुभावा विभावाश्च ज्ञेयास्त्वभिनये बुधै ॥ इति । अत्र प्रतिनियता

एषां स्थायिभावानाह—

रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं तथा ।
जुगुप्सा विस्मयश्चेति स्थायिभावाः प्रकीर्तिताः ॥३०॥

स्पष्टम् ।

व्यभिचारिणो ब्रूते—

निर्वेदग्लानिशङ्काऽऽख्यास्तथाऽसूयामदश्रमाः ।
आलस्यं चैव दैन्यञ्च चिन्ता मोहः स्मृतिर्धृतिः ॥३१॥

एव रसे तिष्ठन्तीति कृत्वा । यथाक्रमं स्थायिभावानाह—**रति**रित्यादि । (55b) रतिः परस्परा स्थायित्वादित्युक्तमेव । एवं वाग्वेषादिवैकृतकृतश्चेतोविकाशो **हासः** । इष्टनाशादिप्रभवं चित्तस्य वैक्लव्यं **शोकः** । प्रतिकूलेषु तैक्ष्ण्यस्य प्रबोधः **क्रोधः** । कार्यारम्भेषु संरम्भस्थेयानुत्तमप्रकृति**रुत्साहः** । रौद्रशक्त्यादिजनितं स्त्रीनीचप्रकृतिकस्य वैक्लव्यं **भयम्** । दोषदर्शनादिभिः पदार्थानां गर्हणा **जुगुप्सा** । पदार्थानां लोकसीमाऽतिक्रमास्पदतया चित्तस्य विस्फारो **विस्मयः** । एतच्च सर्वलोकानुभवसिद्धमित्यत आह **स्पष्ट**मिति । अथ व्यभिचारिभावान् कथयति—**निर्वेद** इत्यादि । तत्र तत्त्वज्ञानापदीर्ष्याऽऽदिभिः स्वावमानना **निर्वेदः** । अत्र चिन्ता ग्लानि-दैन्यादयो व्यभिचारिणो निःश्वासोच्छ्वासवैवर्ण्यादयोऽनुभावाः । यदाह—(ना शा ७।४७) बाष्पाम्बुपूर्णनयनः पुनः पुनः श्वासदीनमुखनेत्रः । योगीव ध्यानरतो भवति निर्वेदतः पुरुषः ॥ इति । निधुवनकलाऽभ्यासश्रमादिजनिता निःप्राणता **ग्लानिः** । अस्या वैवर्ण्यकम्पानुत्साहादयोऽनुभावाः । यदाह—कार्श्येन साऽभिनेया मन्दक्रमगमनेन कम्पेन । गदितैः क्षामक्षामैर्नयनविकारैश्च मन्दसञ्चारैः ॥ श्लथभावेनाङ्गानां मुहुर्मुहुर्निर्दिशेद् ग्लानिम् ॥ (ना शा ७।४९-५०) इति । परक्रौर्यपर्यालोचनयाऽऽत्मदुर्नयादिना स्पृष्टा (सृष्टा) निष्टाभ्यागमनोत्प्रेक्षा (56a) **शङ्का** । अत्र कम्पास्यशोषस्वरान्यभाववैवर्ण्यपार्श्वविलोकनादयोऽनुभावाः । गर्हादौर्जन्यमन्युभूः परसौभाग्यैश्वर्यविद्याविलाससमुच्चयदर्शनासहिष्णुत्व**मसूया** । अत्रावज्ञादोषोद्घोषभ्रूकुटीक्रोधेङ्गितादयोऽनुभावाः । मदिरापानादिकृतसम्मोहानन्दसम्भेदो **मदः** । अत्र स्खलद्गतित्वनिद्रारुदितहसितादयोऽनुभावाः । अयञ्च तरुणमध्यनिकृष्टभेदात् त्रिधा । तत्र च हसनगानपरुषवचनशयनरोदनानि पञ्च । यदाह—(ना शा ७।६२) उत्तमसत्त्वः [स्वपिति] प्रहसति गायति च मध्यमप्रकृतिः । परुषवचनाभिधायी शेते रोदित्यधमसत्त्वः ॥ इत्यादि । रताध्वगतत्वव्यायामादिना मनःशरीरयोः खेदः **श्रमः** । अत्र स्वेदाङ्गभङ्गमर्दनादयो-

ऽनुभावा । स्त्रीनीचविषय कृत्यवैरस्य**मालस्यम्**। अत्र जृम्भाऽऽसितादयोऽनुभावा । यदाह (ना शा ७।७२) आलस्य त्वभिनेय खेदसमुत्थ स्वभावज वापि। आहारवर्जना-दारब्धानामप्यनारम्भात् ॥ इति। दारिद्रचन्यक्कारकारणादनोजस्कता चेतसो **दैन्यम्**। अत्र वैवर्ण्यमलिनवसनादय । ऐश्वर्येष्टद्रव्यापहारादिजनिता बहुप्रकारौत्सुक्यहेतु**श्चिन्ता**। अत्रोच्छ्वासनि श्वसितसन्तापशून्यहृदयतानृजा(मृजा) विहीनत्वारत्यादयोऽनुभावा । व्यसना-भिघातभयपूर्ववैरस्मरणानुचिन्तनेन विचित्तता **मोह**। अत्राज्ञानभ्रम (56b)-पतनघूर्णनादर्शनादय । समानज्ञानचिन्ताऽऽदिना सस्कारोद्बोध **स्मृतिः**। अत्र भ्रूसमुन्नति-नखवाद्यादय । ज्ञानशक्त्यादिभि सन्तोष समस्तभोगहेतु**धृतिः**। अत्र भयशोक-विषादादिशून्यतया रोमाञ्चादय । यदाह—(ना शा ७।८५-८६)—विज्ञानशौचवैभव-कृतशान्तिसमुद्भवा धृति सद्भि । भयशोकविषादादौ रहिता तु सदा प्रयोक्तव्या॥ प्राप्तानामुप-भोग शब्दस्पर्शरूपरसगन्धानाम्। अप्राप्तौ हि न शोको यस्या हि भवेद्धति सा तु ॥ इति अनुरूपाचारादिघटितो धार्ष्ट्याभावो **व्रीडा**। अत्राङ्गविवलनाधोमुखत्वभूविलिखन-वस्त्राङ्गुरीयकादिस्पर्शनादय । मात्सर्यरागद्वेषादिभिरविमृश्यकारित्व **चपलता**। अत्र भर्त्सनपारुष्यस्वच्छन्दाचरणादयः। इष्टलाभस्तवादिजनितश्चित्तप्रसादो **हर्षः**। यदाह (ना शा ७।६३) प्राप्ये वाऽप्राप्ये वा लब्धेऽर्थे प्रियसमागमे वापि। हृदयमनोरथलाभे हर्ष सञ्जायते नृणाम् ॥ अत्र नयनवदनप्रसादप्रियवादाश्रुपुलकहास्यस्वेदगद्गदादय । उत्पातवातवर्षाग्निकुञ्जरोद्भ्रमणप्रियाप्रियश्रवणव्यसनादिभि. सम्भ्रम **आवेगः**। अत्रोत्पातो विद्युदुल्कानिर्घातादि । तत्र सर्वाङ्गस्रस्ततामुखवैवर्ण्यविषादादयोऽनुभावा । वातकृतेऽव-गुण्ठनाक्षिमर्दनवस्त्रसमूहनत्वरितगमनादय । वर्षाकृते सर्वाङ्गसपिण्डनप्र[धा]वल(न)-च्छत्राश्रयणादय । अग्निकृते धूमाकुलनेत्रताऽङ्ग-(57a) सवेगादय । कुञ्जरोद्भ्रमणकृते त्वरितापसर्पणचपलगमनभयस्तम्भवेपथुपश्चादवलोकनादय । प्रियश्रवणकृतेऽभ्युत्थानालिङ्गन-वस्त्राभरणादिप्रदानाश्रुपुलकादय । अप्रियश्रवणकृते भूमिपतनपरिदेवितपरिवर्तनपरिधावित-विलापाक्रन्दादयः। व्यसनाभिघातकृते तु सहसाऽपसर्पणगजतुरगारोहणादय इति। इष्टानिष्टश्रवणदर्शनव्याध्यादिभि सर्वकार्याप्रतिपत्ति**र्जडता**। अत्र निमिषनिरीक्षण-विस्मित(?)श्वासाधिक्यकार्श्यपरवशत्वादय । कुललावण्यधनैश्वर्यादिपर्यासो मदो **गर्वः**। अत्रान्यधर्षणसविलासाङ्गनिरीक्षणादय । आरब्धकार्यवैधुर्यादिना सत्त्वभ्र शो **विषादः**। अत्र नि श्वासोच्छ्वाससन्तापसहायान्वेषणादय । रम्येच्छा(क्षा) रतसम्भ्रमादिना समय-क्षेपासहत्व**मौत्सुक्यम्**। अत्रोच्छ्वासत्वराऽभ्यासहृत्तापस्वेदविभ्रमादय । चिन्ताऽऽलस्य-श्रमादिभिर्मन समीलन **निद्रा**। अत्र जृम्भणाङ्गभङ्गाक्षिनिमीलनादय । अहदु खादि-

व्रीडा चपलता हर्ष आवेगो जडता तथा ।
गर्वो विषाद औत्सुक्य निद्राऽपस्मार एव च ॥३२॥
सुप्त प्रबोधोऽमर्षश्चाप्यवहित्थमथोग्रता ।
मतिर्व्याधिस्तथोन्मादस्तथा मरणमेव च ॥३३॥
त्रासश्चैव वितर्कश्च विज्ञेया व्यभिचारिणः ।
त्रयस्त्रिंशदमी भावाः समाख्यातास्तु नामतः ॥३४॥

वैशसाद**पस्मारो** व्याधिविविशेष । अत्र भूपातकम्पस्वेदलालाफेनोद्गमादय । निद्राजनितमिन्द्रियाणामस्तमयन **सुप्तम्** । अत्र श्वासोच्छ्वासावेव । यदाह-(ना शा ७।१७) नि श्वासै सोच्छ्वासैर्मन्दाक्षिनिमीलननि (नै) र्निश्चेष्ट । सर्वेन्द्रियसमोह सुप्त स्वप्नायिते[20] व्यङ्ग्यम् ॥ (57b) निद्राविद्रवहेतुभ्यश्चैतन्यावगमो विरोध (**विबोधः**)। अत्र जृम्भाऽक्षिनिमीलनादय । अधिक्षेपापमानादेरभिनिवेशो**ऽमर्षः** । अत्र स्वेदशिरःकम्पनतर्जनताडनादय । लज्जावशाद्धर्षप्रकर्षादिजनिताङ्गवैकृतगोपन**मवहित्थम्** । अत्र व्यापारान्तरासङ्गनम्राननत्वाद्य । चौर्याभिग्रहणायोग्यनृणामपराधाच्चण्डत्व**मुग्रता** । अत्र स्वेदशिर कम्पतर्जनताडनादय । शास्त्रादिपर्यालोचनया भ्रान्तिच्छेदात्तत्त्वनिर्धारणं **मतिः** । अत्र हर्षधृतिगर्वादय । विरहादिवैशसाच्छरीरातङ्कद सन्निपातादिरूपो **व्याधिः** । अत्राज्ञानस्वेदकम्पादयो यथास्वमनुभावा । उत्कण्ठाऽतिशयहर्षशोकादिभि सन्निपातग्रहादिकृतैरप्रेक्षाकारित्व**मुन्माद**ः । अत्रास्थानरुदितगीतहसितादय । इतरत्[21]

---

20 अत्रादर्शपुस्तके पाठो न सम्यगिति प्रतिभाति, निश्चेष्टपदस्य कर्तृस्थस्य व्यङ्ग्यमित्युत्तरार्धे कर्मप्रयोगेण सम्बन्धस्य दु साधत्वात् । वरोदामुद्रितपुस्तकपाठास्तु 'सर्वेन्द्रियसमोहात् सुप्त स्वप्नैश्च युञ्जीत' । 'स्वप्ने प्रयुञ्जीत' इति चान्त्येऽशे तत्र पाठान्तरम् । उद्धृतासु मुनिकारिकासु टीकाकृद्गृहीता पाठा मुद्रितपुस्तकपाठेभ्यो भिन्ना (यथाऽग्रे डिमलक्षणे च) भूम्ना प्रशस्यतराश्च ।

21 अत्र मरणव्यभिचारिभावस्य विषये रूपककृता बहुलसिद्धात् समयादादृतो य सिद्धान्तस्तस्यैव दृश्यश्रव्यसाधारण्येन सर्वत्र ग्रहणम् । अमङ्गल्यस्यैत**स्येतरदिति** पदेन निर्देशो 'दशासु शेषा खलु तद्दशा या तया नभ पुष्पतु कोरकेण' इति विदग्धकविभणितिवदुपभोग्य । व्याध्युन्मादलक्षणेभ्यो व्यतिरिक्तं व्याध्युन्मादजमपि मरणमिति वा टीकाग्रन्थसङ्गति । हन्मर्मेत्यादि महावीरचरितपद्ये चतुर्थपादे मुद्रितपुस्तकाना पाठोऽपीतो भिन्न । उद्वेगस्य च क्वचित् बीभत्सव्यभिचारिषु नाट्यशास्त्रे पाठ ।

निर्वेदस्यामङ्गलप्रायस्य प्रथममनुपादेयत्वेऽप्युपादान व्यभिचारित्वेऽपि स्थायिताऽभिधानार्थम्। तेन

निर्वेदस्थायिभावोऽस्ति शान्तोऽपि नवमो रसः।

सुप्रसिद्धम्। वृत्तानुवादे तच्छन्दस्मुत्पाद्ये प्रायशो नहि। एकस्मिंस्तु मृतेऽप्यन्यो जीवेद् यदि कथञ्चन। कार्श्येन गणना तत्र म्रियते चेन्न सम्मति (सङ्गति ?)॥ (शृ ति २।१८,१६) अदीर्घप्रत्यापत्तिरिति केचित्, मृङ् प्राणत्याग इति धात्व(र्थो)भि(ति)चारात् (?)। यथा नागानन्दे पञ्चमेऽङ्के करुणरसे नायकस्य मृतस्य देवीप्रसादात्तत्क्षण जीवितप्रत्यापत्ति। तद्वद् यदि विप्रलम्भे स्यात्तदा न विरोध। यथा वा **कादम्बरीपरिणयाख्ये** नाटके दीर्घकालप्रत्यापत्तौ तु तस्यान्तरा (58a) प्रवाहविच्छेद एवेत्येवंविधेतिवृत्तोपनिबन्धनं रससमवहितचेतसा कविना परिहर्तव्यमेव। विषभक्षणपाशकरणादीनीत्यन्ये अतएव (ध्व आ वृ लोचन १६५ पृ, अभि भार १म ३५७ पृ, २य. ४२७ पृ) शृङ्गारे मरणे व्यवसायमात्र विषभक्षणादिरूपमुपनिबध्नन्ति, नतु तदेव। अन्यत्र कामचारो[22] यथा-(म वी च ११३६) पश्यन्तु भवन्तस्ताडकाम्। हृन्मर्मभेदिपतदुत्कटकङ्कपत्रसवेगतत्क्षणकृतस्फुरदङ्गभङ्गा। नासाकुटीरकुहरद्वयतुल्यरूपनिर्यद्वद्वद्रलदसृक्प्रसरा मृतैव॥" (द. रू ४।२० वृः) आकस्मिकगर्जितादिजनितो मन क्षोभ**त्रासः**। अत्र सम्भ्रमोत्कम्पितादय। सन्देह-प्रभवो विचारस्तर्क (विचारो **वितर्कः**)। अत्र भ्रूलताशिरोऽंसविवर्त्तनादयो नामत प्रसिद्धा। उद्वेगस्य तु बीभत्सव्यभिचारित्वमन्यैरुक्तम्। एतस्योक्तेष्वेवान्तर्भावो द्रष्टव्य.।

ननु जुगुप्सा विस्मयश्चे'त्येतत्' (३० का) तन्त्रतयाऽष्टानामेव स्थायिनां व्यवस्थापनात् स्थायिव्यभिचारिसात्त्विकभेदादेवमूना(न) पञ्चाशद्भावा इति भावाध्याये (७।१६२) मुने परिगणनात्, डिमलक्षणे च 'षड्रससंयुक्तो डिमस्तत्र च रौद्र स्थायी'त्युक्त्यनन्तर 'शृङ्गारहास्यवर्ज'इति मुनेश्च (ना शा. १८।८५) निश्चयाद्विभावादीना कथञ्चिदपि शान्तेऽनुपलम्भात् सामाजिकजनान्त करणहरणमुद्रादारिद्रयाच्चाष्टावेव चेष्टा शृङ्गारादय (अ. भा ६अ), तत् ग(कु)तो ऽयमभिनवो नवम शान्तो नाम रस इत्याशङ्क्याह **निर्वेदस्य व्यभिचारित्वेऽपी**ति व्यभिचारित्वाद्-(58b) प्राधान्येऽपि पूर्वनिर्देशात् प्राधान्यप्रतिपादनेन स्थायित्वसूचनादुभयात्मकत्वम्। तेन निर्वेदस्तावदस्ति स्थायी। भावानामून(न)-पञ्चाशद्भेदताऽप्येतावतैवोपपद्यते। डिमलक्षणे

---

22 भावाध्याये मरणाख्यव्यभिचारिभावविवरणेऽभिनवगुप्तपादैरेवमुदितमित्यनुमीयते। आचार्यहेमचन्द्रकृते काव्यानुशासनविवेकेऽस्य मन्तव्यस्योत्तरार्धं लभ्यते।

शृङ्गारहास्यरसावपास्यौ, अन्यश्च कश्चिदभिमत एको निरसनीयो न पुनस्तत्र नियम इत्यखण्डितषड्रसो डिम । तदिह तत्त्वज्ञानरूपो निर्वेद स्थायी । तत्तु (यत्तु) 'सर्वचित्त-वृत्तिप्रशम एवास्य स्थायी'त्युक्तम्, तदसद्, 'अभावस्य प्रसज्यप्रतिषेधरूपत्वे चेतोवृत्तित्वाभावेन भावत्वायोगात्, पर्युदासत्वेऽस्मत्पक्ष एव' (ध्व आ लो १७७ पृ)। एवंविधश्च निर्वेदो वीतरागस्यैव भवतीति [स एव] तदधिष्ठान । तत्रानित्यत्वादिना सकलवस्तुनि सारत्वं परमार्थस्वरूपश्चानुभूयमानमालम्बनविभाव , तपोवनाद्युद्दीपनविभाव , सर्वभूतसमत्वपरार्थ-करित्वादयोऽनुभावा , धृतिमतिस्मृतिहर्षप्रभृतयो व्यभिचारिण । एभिर्विभावानुभाव व्यभिचारिभि शान्तरसाभिव्यक्तिर्भवति। निरतिशयानन्दसन्दोहहेतुत्वश्चास्य सहृदयाना श्लाघनीय[त्व]मेव । यदाहु —यच्च कामसुख' लोके यच्च दिव्यं महत् सुखम् । तृष्णाक्षयसुखस्यैते नार्हतः षोडशी' कलाम् ॥ (महा १२।१७१।५१ इति)।[23] न च प्रतीतोऽप्यय सर्वस्य श्लाघापद न भवतीति रसत्वाच्चयवतामिति वाच्यम्, एव सत्यन्येऽपि रसाना(रसा ना-) स्तोकलोकश्लाघनीया इति तेषा-(59a) मपि रसत्व न स्यात् । तथाहि शृङ्गार सर्वप्राणिषु कामभावनिष्ठाना कुचेलपामराधमाना नैव विषय , भीरूणा च(न) धी(वी)र इत्यादि। तथाच मुनि (ना शा ११०६, ११०) 'तुष्यन्ति तरुणा कामे मोक्षे

---

23 टीकाकृता निर्वेदस्थायिभावत्वपक्षे युक्तिरुट्टङ्किता। शमस्थायिभाव शान्तमङ्गी-कुर्वाणा आनन्दवर्धनाद्या अभियुक्तास्तन्यथा मन्यन्ते। ते तु तृष्णाक्षयापर-पर्यायस्य वैराग्येतिनाम्नो निर्वेदस्य तुल्यकक्षत्वमुपनिबध्नन्त पक्षयोरेतयो समन्वय साधयन्ति। केचित्तु शमस्यैव मुख्यत्व घोषयन्ति। मम्मटाचार्या मुनिकृते भावोप-संख्याने शमस्यानुल्लेखान्निर्वेदस्य च व्यभिचारमुख्यत्वेन निर्देशात् स्थाय्यन्तर्गमन पक्ष निश्चित्यैव निरणैषु । टीकाकारविवरणे मम्मटपक्षसमर्थनपरेऽपि यच्छमस्यैव पर्यायत्वेन तत्त्वज्ञानविभावमयेन निर्वेदो गृहीतस्तत्तस्य प्रामाण्यसाधकलोचनग्रन्थो-द्धारतोऽपि प्रतीयते। लोचनेऽभिनवभारत्याश्च शमस्थायिभावपक्ष एवोपस्थापितः। मननतरितीर्णविद्याऽर्णवेन वादिमूर्धन्येनापि रसगङ्गाधरकृता निर्वेदस्थायिभावपक्ष-मनुगृह्णता मुनिवचनयन्त्रिते भावलक्षणोपसख्यानजीविते सिद्धान्त आस्था स्थापिता। शान्तरसस्य साम्राज्यं महाभारतेऽपि शास्त्रकाव्यरूपच्छायाऽन्वयिनि 'महामुनिना शान्तो रसो मुख्यतया विवक्षित' इत्यानन्दवर्धनस्याघोषणम्। 'मातापितृसहस्राणि' 'ऊर्ध्वबाहुर्विरौम्येष' 'न जातु काम' इत्यादिभ्यो भारत-सावित्र्यां प्रकीर्तितेभ्य श्लोकेभ्य· स एष सुप्रतिपदविधान ।

यथा

अहौ वा हारे वा कुसुमशयने वा दृषदि वा
मणौ वा लोष्टे वा बलवति रिपौ वा सुहृदि वा।
तृणे वा स्त्रैणे वा मम समदृशो यान्ति दिवसाः
क्वचित् पुण्यारण्ये शिव शिव शिवेति प्रलपतः ॥४४॥

(उत्पलदेवस्य)

चापि विरागिण', 'धर्मो धर्मप्रवृत्ताना काम कामोपसेविनाम्'। 'उत्साह शूरमानिना' 'विनीताना दमक्रिये'त्यादि। विषयजुगुप्सारूपत्वाद्बीभत्सेऽस्यान्तर्भाव इति चेन्न, जुगुप्साया अत्र व्यभिचारित्वेनास्थायित्वात्, पर्यन्तनिर्वाहे मूलत एव तस्या विच्छेदात्। तथाहि यत्र बीभत्समानो विरज्यते तत्र बीभत्स एव। यथा 'लाला वक्त्रासव वेत्ति मासपिण्डौ पयोधरौ। मासास्थिपिण्ड जघन जन कामग्रहातुर' (द रू ४।७३ वृ) इति। वीरस्तु त्रिलोकीस्वीकार-सन्तुष्टतेज प्रसरज्वलदुत्साहस्थायित्वादभिमानमयत्वेन व्यवस्थानादस्माद्भिद्यत एव। एवञ्च यत्रेदमह करोमीत्यहङ्कार, एतेन कृतेनेद मम फलमिति स दयावीर। यत्र पुन फलानभि-सन्धानेन कर्तव्यमेतदिति शास्त्रविहितकर्माचरणात् सर्वप्रकारमहङ्काररहितत्व स शान्त। ग्रन्थ-कर्तुस्तु दयावीर इति शान्तस्येवेद नामान्तरकरणमिति भाव। यदुदाहरिष्यते 'यथा नागा-नन्दे शान्तस्येत्यादि' (७ उ)। एतच्च 'युद्धवीर दानवीर धर्मवीर तथैव च। रस वीरमिति प्राह ब्रह्मा त्रिविधमेव हि ॥' (ध्व आ लो १७८पृ) (59b) इति वीरस्य त्रैविध्यमभिदधता मुनिनाऽपि प्रदर्शितम्। अत्रापि यत्र दानधर्मवीरयो सर्वाकारमहङ्कारादिशैथिल्य प्रतीयते तत्र तयोरपि शान्तप्रभेदत्वमवगन्तव्यम्। तस्माद्बीभत्सादिभ्य पृथग्भूतस्तत्त्वज्ञानसमुत्थ-निर्वेदस्थायिभावप्रभव उत्तमप्रकृतिरहङ्कारशैथिल्यात्मकोऽस्ति शान्तो नाम रस इति व्यव-स्थितम्। अयञ्च मोक्षफलत्वेन पर[म] पुरुषार्थनिष्ठत्वात् सर्वरसेभ्य प्रधानतमः। महाभारते चास्यैव साम्राज्यम्। तथाहि तत्रानुक्रमण्या शान्ताङ्गभूतस्य धर्मादे पुरुषार्थस्य य उपनिबन्ध स सासारिकव्यवहारस्य शान्तप्रतिपक्षीभूतस्यानादेयतामाविष्कर्तुम्। एतच्च 'स हि सत्यमृतञ्चैव पवित्र पुण्यमेव च। शाश्वत परम ब्रह्म ध्रुव ज्योति सनातनम्॥ (महा १ अनुक्र १९३-९४) इत्यादिभि श्लोकै परमेश्वरातिरिक्ताना सर्वेषामेव मिथ्याप्रपञ्चत्वमिति व्यञ्जयता महर्षिणैव प्रकाशितम्। **अहौ वे**त्यादि। **स्त्रैण** स्त्रीसमूह। **कदा यान्ती**ति "विभाषा कदाकर्ह्यो"-(पाः ३।३।५) रिति भविष्यति वर्तमाने(न) प्रत्यय, कदा यास्यन्तीत्यर्थ। तदिह "**शिव शिव शिवे**ति परमार्थस्वरूपमालम्बनविभाव, **पुण्येऽरण्य** इत्युद्दीपनविभाव,

रतिर्देवादिविषया व्यभिचारी तथाऽञ्जितः ॥३५॥

भावः प्रोक्तः—

आदिशब्दान्मुनिगुरुनृपपुत्रादिविषया। कान्ताविषया तु व्यक्ता शृङ्गारः। उदाहरणम्—

कण्ठकोणविनिविष्टमीश ते कालकूटमपि मे महामृतम्।
अप्युपात्तममृत भवद्वपुर्भेदवृत्ति यदि मे न रोचते ॥४५॥

(उत्पल स्तो)

हरत्यघ सम्प्रति हेतुरेष्यतः शुभस्य पूर्वाचरितै. कृत शुभैः।
शरीरभाजां भवदीयदर्शनं व्यनक्ति कालत्रितयेऽपि योग्यताम् ॥४६॥

(शिशु व १।२६)

एवमन्यदप्युदाहार्यम्। अञ्जितव्यभिचारी यथा—

समदृष्टिरनुभाव, प्रार्थनारूपा चिन्ता व्यभिचारिभाव. एव धृत्यादयोऽ(60a)प्याक्षिप्यन्ते। एषामत्र शान्तरसप्रकाशत्वम्। अयञ्च विभावादियोजना [या] सोऽनुन्मीलितपूर्वो मार्ग' शिष्यशिक्षाप्रदानार्थमनूद्यत इति सहृदयैरत्रावधेयम्"। (र सं २६)

एवमसलक्ष्यक्रम रसस्वरूप निर्णीयाधुना यथाक्रम तथाभूतान् भावादीन् दर्शयति **रति-**रिति। देवादिविषयतया भक्तिस्तुत्यादिरूपस्य रतिभावस्य स्थायित्वाभावाद्विशेषतो व्यभिचारित्वम्, अतो विभावादिभिरभिव्यज्यमानत्वेऽपि न रसत्वम्। रतिग्रहणमुपलक्षणत्वेन व्याख्येयम्, 'धिक् सानुज कुरुपति धिगजातशत्रु'-(वेणी ३।१३)मित्यादौ जुगुप्साऽऽदीनामपि भावत्वोपलम्भात्। न हि निन्दाऽऽत्मिका जुगुप्सा बीभत्सता भजते, श्मशानाद्यधिष्ठानायास्तस्यास्तथाभावात्। तान्त्रिको हि रसशब्द इत्युक्त प्राक्। एव व्यभिचारी निर्वेदादिरपि विभावादिभिरभिव्यक्तोऽलक्ष्यक्रमव्यङ्ग्यो **भावः प्रोक्त** इति सूत्रप्रतीकेन सम्बन्धः स्थायिव्यभिचार्यादिप्रकारेणोक्त.। **देवादी**त्यादिपद व्याचष्टे **मुनी**त्यादि। क्व तर्हि रते शृङ्गारत्वमित्यत आह **कान्ते**ति। तत्र दैवतविषया रतिर्यथा **कण्ठे**ति। **कालकूटं** जगदन्तको विषविशेषः। **भवद्वपुर्भेदवृत्ति** भवच्छरीरात् पृथग्भूतम्। अत्र भगवद्विषयिणी रतिरलक्ष्यक्रमा भक्तिरूपत्वाद्भाव एव। मुनिविषया यथा **हरत्यघ**मित्यादि (60b) **कृत सफलितम्**। शरीरिणां तव दर्शनं भूतभवद्भविष्यत्कालेऽप्यभीष्टार्थभाजनत्वं प्रकाशयति। 'योगोऽभीष्टार्थसमप्राप्तिध्यानसङ्गतियुक्तिष्वि'ति विश्व। अत्र चाटुकाररूपा रति प्रतीयमाना भावः। पुत्रविषया यथा—एह्येहि वत्स रघुनन्दन पूर्णचन्द्र चुम्बामि मूर्धनि चिर' च परिष्वजे

जाने कोपपराङ्मुखी प्रियतमा स्वप्नेऽद्य दृष्टा मया
मा मां संस्पृश पाणिनेति रुदती गन्तु प्रवृत्ता पुरः।
नो यावत् परिरभ्य चाटुशतकैराश्वासयामि प्रियां
भ्रातस्तावदहं शठेन विधिना निद्रादरिद्रीकृतः॥४७॥

अत्र विधि प्रत्यसूया।

तदाभासा अनौचित्यप्रवर्तिताः।

तदाभासा रसाभासा भावाभासाश्च। तत्र रसाभासो यथा—

स्तुमः क वामाक्षि क्षणमपि विना य न रमसे
विलेभे कः प्राणान् रणमखमुखे य मृगयसे।
सुलग्ने को जातः शशिमुखि यमालिङ्गसि बला-
त्तपःश्री· कस्यैषा मदननगरि ध्यायसि तु यम्॥४८॥

अत्रानेककामुकविषयमभिलाष तस्याः 'स्तुम' इत्याद्यनुगत बहुव्यापारोपादानं व्यनक्ति।

त्वाम्। आरोप्य वा हृदि दिवानिशमुद्वहामि वन्देऽथवा चरणपुष्करकद्वय ते॥ (म वी च १।५५) इति वात्सल्यरूपा रतिः।

व्यभिचारिणया व्यङ्ग्यत्वेऽलक्ष्यक्रमव्यङ्ग्यभावो यथा—**जाने कोपपराङ्मुखी**ति। जाने कोपेत्यादि निश्चयगर्भमहं जाने इति वाक्यार्थस्य च कर्मत्वम्। अत्र यद्यपि रतिस्थायिभावेन स्वप्नदर्शनोद्दीपितेन विप्रलम्भ सुन्दरीभूत प्रतिभातीति रसध्वनिर्व्यवस्थित एव तथापि मन्युजा विधिविषयिणयसूयैव काव्यसर्वस्वम्। **तदाभासा** इति तच्छब्देन रसभावयो परामर्श इति व्याचष्टे **रसाभासा** इति। आभासत्वस(म)विषयप्रवृत्त्याऽनौचित्यम्। **स्तुमः कमि**त्यादि—अत्र "बहुव्यापारोपादानस्यैकविषयत्वेऽप्यविरोधादयुक्तमेतदुदाहरण मिति केचिदाहु। तदसारम्, नह्यत्र बहुव्यापारोपादानमात्र किन्त्वेकरूपानेककर्मनिष्ठं[तत्]। यदि त्वेतदेकविषय स्यात् तदा सकृदेव कर्मनिर्देश कुर्यात्। य मृगयसे आलिङ्ग(61a)सि ध्यायसि चेति पृथङ्निर्देशात्तु कामुकभेदप्रतीति। किञ्च "स्तुम" इत्यादौ स्तुत्यादे शाब्देन वृत्तेन सत्यपि प्राधान्ये वस्तुनो 'विना य न रमसे' इत्यादि प्रति गुणत्वमेव, कामिनीव्यापारस्यैव वर्णयितुमिष्टत्वात्। एवन्तु यद्गुणभूतं स्तुतिपरत्वेन स्थित तत सकृदेव केनचित् प्रकारेणो-पादाय बहुव्यापारोपादानं वक्तव्य स्यात्। पृथगुपादानाच्च स्तोतव्यभेद प्रतीयत इति रसाभासस्योदाहरणमिदं युक्तमेव" (र सं २२ पृ·)। अतएव हि नगरीवत् सर्वजनसञ्चरण-

भावाभासो यथा—

राकासुधाकरमुखी तरलायताक्षी सा स्मेरयौवनतरङ्गितविभ्रमाङ्गी ।
तत् किं करोमि विदधे कथमत्र मैत्रीं तत्स्वीकृतिव्यतिकरे क इवाभ्युपायः ॥४९॥

अत्र चिन्ताऽनौचित्यप्रवर्तिता । एवमन्येऽप्युदाहार्याः ।

तस्य प्रशान्तिरुदयः सन्धिः शबलता तथा ॥३६॥

योग्यताप्रकटनार्थं **मदननगरी**ति पर्यन्त आमन्त्रणम् । तदिह येय रतिश्चर्वणामारोहति नासौ तात्त्विकी परस्परसंबन्धाभावात् । ततश्च तत् (ततश्चासत्)-प्रभवत्वान्नाय वास्तवश्रृङ्गार 'उत्तमप्रकृतिरुज्वलवेषात्मक श्रृङ्गार' (ना शा ६।३०२पृ) इत्यभिधानात्[24], आभासो ह्यसौ शुक्तिकाया रजतवत्, अतएवोत्तरकाल तत्त्वप्रकाशे हास्यरसप्रादुर्भावात् । 'श्रृङ्गाराद्धि भवेद्धास'-(ना शा ६) मिति मुनिर्मन्यते । महाकविरप्याह[25]—'अराणहिअअे उरा हि अअ ज दिज्जइ त जणो हसइ' (गा स १।४१) । **राकेत्यादि**—अत्र तदीयनितान्त-वैमुख्यान्मिथश्चित्तानुस्यूतिविरहमाकलयतोऽपि येय चिन्ता सा भावाभास । तथ्य मृषा-

---

24 पुनरुक्तवदाभासविरोधाभासप्रभृतवुद्भटादिपरिगृहीतसज्ञाविशेषेभ्यो दार्शनिकै विशेषतश्च नैयायिकैराभासशब्दतदर्थयोर्बहुलोपयोगात्तदुत्तरकालप्रयुक्तेयमौचित्य-चिन्तेति प्रतीयते, तन्मूला चेय सज्ञा । रसभावगताभासचर्चाऽतिप्राचीनाना भरता-दीना ग्रन्थे नोपलभ्यते । विनेयोन्मुखीकारस्यानन्दवर्धनादिभि काव्यार्थभूततया स्वीकृतस्यातिदेशकल्पे विरक्तपरनीचतिर्यगादिगतश्रृङ्गारभेदा इव रसान्तरविकारा आलङ्कारिकै रुद्रटात् प्रागेव स्वीकृता । रुद्रटकृतश्रृङ्गाराभासलक्षणमनाडम्बर-कृतस्थापनमेवोत्तरकाले तच्चिन्ताया उपयोगित्वे लिङ्गम् । अत्रानौचित्य मूलतो मुनिलक्षणबहिर्भूतत्वम्, कार्यतस्तस्य त्रिधा व्यवस्थितिर्यथा दर्शिता टीकाकृत्कृत-विवरणे ।

25 महाकविरपीत्यानन्दवर्धनाचार्यनयेन 'वाच्याना वाचकानाञ्च'त्याद्युक्तेन (३।३२) ३।७ वृ सिद्धेन मुक्तककाव्यस्य स्तुतिपरत्वेन व्याख्येयम् । इयञ्च गाथा हालकृतेति कोषकाराणा निर्देश । पद्यस्य पूर्वार्धन्त्वित्थम्—सब्भावणेहभरिएरत्ते रज्जिज्जइत्ति जुत्तमिरा' । समग्रायाश्छाया चैवरूपा—सद्भावस्नेहभरिते रक्ते रज्यत इति युक्तमिदम् । अन्यहृदये पुनर्हृदय यद्दीयते तज्जनो हसति ॥ श्रृङ्गारप्रधान-

क्रमेणोदाहरणम्—

तस्याः सान्द्रविलेपनस्तनतटप्रश्लेषमुद्राऽङ्कित
किं वक्षश्चरणानतिव्यतिकरव्याजेन गोपाय्यते।
इत्युक्ते क्व तदित्युदीर्य सहसा तत् सम्प्रमार्ष्टुं मया
साऽऽश्लिष्टा रभसेन तत्सुखवशात्तन्व्या च तद्विस्मृतम्॥५०॥ (अ श)

अत्र कोपस्य।

एकस्मिञ्छयने विपक्षरमणीनामग्रहे मुग्धया
सद्यो मानपरिग्रहग्लपितया चाटूनि कुर्वन्नपि।

साधारणीभूतरसादिप्रकाशमात्रजीवितञ्च काव्य[त्व] भूतगतिमपेक्षते। हंसमृगादीनान्तु शृङ्गार(61b)रसवर्णने रसाभास स्फुट एव, यथा कुमारसम्भवादौ (३ स)। तदेवमेकतरनिष्ठाभिलाषिके शृङ्गारशब्देन तत्र तत्र व्यवहारस्तदाभासतया मन्तव्य। एवमन्येऽपि वीरादयो रसा अन्येऽपि व्यभिचारिणो रसाभासाङ्गभूता आभासत्वेनोदाहर्तव्या इति। **तत् (तस्य) प्रशान्तिरि**ति तच्छब्दो[26] भावपदोपस्थापित व्यभिचारिभावं परामृशति। यद्यपि चाखण्डबुद्धिनिर्ग्राह्य' सर्व एव काव्यार्थो रसचर्वणाविश्रान्तस्तथाऽपि पानकादावुद्रिक्तः कर्पूरांश इव सहृदयैरपोद्धृत्यास्वाद्यमानो भावप्रशमादिश्चमत्कारविशेषमर्पयति। तत्र क्वचिद्विरुद्धसामग्रीयोगेन प्रशाम्यद्दशाको भावस्तथा सम्पद्यते यथा '**तस्याः सान्द्रे**'ति। **तन्व्या च तद्विस्मृत**मिति—तया तद्विस्मृतमिति नोक्तमस्यास्तन्व्यप्रतिप्रतिपादनार्थम्। अत्रेर्ष्यारोषप्रकर्षात्मिकायाश्चित्तवृत्ते परिरम्भजसुखाम्भोधिमज्जनजनित प्रशम एव काव्यसर्वस्वम्। अत्र **कोपस्य** शान्तिरिति शेष।

क्वचित्तिरस्कारेऽपि पुन कारणवशादुदीयमानावस्थो भावश्चमत्कारमावहति यथा **एकस्मिन्नित्या**दि। **[मानपरिग्रहा]** च **ग्लपिता** चेति कर्मधारय। चाटुकारादिषु परिक्षीणेषु

प्राकृतसंस्कृतोभयमेदभाषानिबद्धकाव्यानुभूतिप्रकारविश्लेषणमभिनयाश्रयाणामन्येषा निबन्धश्च भोजशारदातनयादिकृतग्रन्थेष्वेतत्प्रसङ्गस्य प्रपञ्चने पारिपाट्यमनुबध्नाति।

26 अन्ये तु भावस्य शान्तिरित्यादि पठन्ति। श्रीधरधृतपाठस्तु कारिकावृत्तिकृतोरभेदं सूचयति। एवमप्यग्रे।

आवेगादवधीरितः प्रियतमस्तूष्णीं स्थितस्तत्क्षणं
मा भूत् सुप्त इवेत्यमन्दवलितग्रीव पुनर्वीक्षितः ॥५१॥

(अ श)

अत्रौत्सुक्यस्य।

उत्सिक्तस्य तपःपराक्रमनिधेरभ्यागमादेकत·
सत्सङ्गप्रियता च वीररभसोत्फालश्च मां कर्षतः।
वैदेहीपरिरम्भ एष च मुहुश्चैतन्यमामीलय-
न्नानन्दी हरिचन्दनेन्दुशिशिरस्निग्धो रुणद्ध्यन्यत ॥५२॥

(म वी च २।१६)

अत्रावेगहर्षयोः।

क्वाकार्यं शशलक्ष्मणः क्व च कुल भूयोऽपि दृश्येत सा
दोषाणां प्रशमाय न श्रुतमहो कोपेऽपि कान्तं मुखम्।
किं वक्ष्यन्त्यपकल्मषाः कृतधियः स्वप्नेऽपि सा दुर्लभा
चेतः स्वास्थ्यमुपैहि कः खलु युवा धन्योऽधरं धास्यति॥५३॥

(वि उ ४)

अत्र वितर्कौत्सुक्यमतिस्मरणशङ्कादैन्यधृतिचिन्तानां शवलता।

तूष्णीमवस्थिति प्रसादनोपाय एव। तथाहीर्ष्याकृतरोष स्त्रीणा द्विधा (62a) [कृत] आनुमानिको दृष्टश्चेति। आनुमानिकोऽपि त्रिधैवोत्स्वप्नायितभोगाङ्क-(ङ्कानुमित) गोत्रस्खलनकल्पित इति। एषा यथोत्तर गुरु। षडुपचारोपाया यथोक्तम् 'साम्ना भेदेन दानेन नत्युपेक्षा-रसान्तरै'रिति (द रू ४।५६-६१)। **सुप्त इवे**ति—प्रार्थनापराङ्मुखस्तदिहावेगप्रकर्षे विरोधिनि सत्यपि यदौत्सुक्यस्यागम स एवास्वादजीवितम्। क्वचित् पुनरेकस्य प्रशमत्व-मपरस्योद्गम इति सन्धिरुद्रिक्त स्वाद्यते। यथा **उत्सिक्तस्ये**त्यादि। सीताविवाहसमनन्तर-मेव परशुरामरामयोर्दर्शनम्। प्राप्तप्रतिष्ठतया स्वात्मन्यहङ्कार उत्सेक। **उत्सिक्तस्यो**-द्धतस्येत्यर्थ·। **आमीलयन्**नुन्मुखीकुर्वन्। **आवेगहर्षयोरि**ति यथाक्रममेकस्य प्रशमत्व-मपरस्योद्गम इति युगपदुपस्थितयोरेतयो सन्धिश्चमत्कारस्थानम्। क्वचिदनेकेषां पूर्वपूर्वोपवादेन स्थितौ सम्भूय प्रकाश· शवलत्वमास्वाद्यते यथा **क्वाकार्य**मित्यादि—अय श्लोक· कस्यचित् कवे· क्वचिन्नाटकादौ कण्वाश्रमे शकुन्तला दृष्ट्वा ता प्रति प्रवृद्धाभिलाषस्य दुष्यन्तस्य तस्या ब्राह्मणीत्व

माशङ्कमानस्योक्ति, **अनुशयदेवयानीक**नामनि नाटके वा ययातेरिति[27] प्रवाद । तदिह क्वाकार्यमित्यादिना वितर्कः प्रकाश्यते (62b) **भूयोऽपि दृश्येत से**त्यनेनौत्सुक्य **दोषाणां प्रशमाये**त्यादिना सर्वशास्त्रार्थज्ञानपरिणामप्रयुक्ता मति, **अहो कोपे**त्यादिना स्मरणम्, **किं वक्ष्यन्ती**त्यादिना सहवासिधार्मिकविद्वज्जनजनिता शङ्का, **स्वप्नेऽपि सा दुर्लभे**त्यनेन दैन्यम्, **चेतः स्वास्थ्यमुपैही**त्यनेन धृति, **कः खलु युवे**त्यादिना चिन्ता।

27 एतत्कारिकोदाहरणाना प्राचीनोक्ते सञ्चारिरसनाम्ना व्यपदिष्टेऽन्तर्भावो भाव्यो यथा ध्वन्यालोके (३।२४ वृ) सूचित तदुपरि लोचने च विशदीकृतम्। नवीनतरैश्चण्डीदासादिभिर्दीपिकाया ध्वनिसिद्धान्तसग्रहप्रभृतौ च निबन्धे चित्ररसखण्डरसपदाभ्यामेतेषां निर्देश 'अङ्ग बाध्योऽर्थसंसर्गात् यद्यङ्गी स्याद्रसान्तरे। नास्वाद्यते समग्र' यत्तत खण्डरस स्मृत' इति कृत्वा। 'अन्ये तु स्थायितया पतितस्यापि स्थायित्वमेव यथा विक्रमोर्वश्यामुन्मादस्य चतुर्थेऽङ्के' इति लोचनमन्तव्य 'क्वाकार्य'मित्यादि श्लोकस्याकरनिर्धारणप्रसङ्गे समवधेयम्। नाट्यदर्पणकृदप्येवं यथा पुरूरवा प्रत्याहेति श्लोकप्रकरण सूचयन्। राजाऽपि शृङ्गारप्रकाशे सरस्वतीकण्ठाभरणे चोत्त विरहिण पुरूरवस उत्कण्ठाऽऽदिभि प्रेमप्रकर्षादसत्प्रलापरूप उन्मादो निष्पद्यत' इत्याकर स्फुटमेव निर्दिशति समुदायार्थशून्यत्वेनास्योन्मादपक्ष कक्षीकुर्वन्। तत्रत्यपद्ये प्रथमपादे 'शशलक्ष्मण' इत्यस्य स्थाने 'क्व कलाकरस्ये'ति, द्वितीयपादे 'प्रशमाये'त्यस्य स्थाने 'उपशान्तये', तृतीयपादे 'स्वप्नेऽपि सा दुर्लभे'त्यस्य स्थाने 'रेखैव साऽन्यादृशी'ति पाठान्तरम्। काव्यप्रकाशधृतपाठ एव ज्यायान् व्यञ्जनागौरवात्। कुत्रचित् विक्रमोर्वशीमातृकायामस्य श्लोकस्य दर्शनमित्यवगम्यते। अर्वाचीनाष्टीकाकृतो दिग्भ्रान्ता इवाचरन्त्यस्य मूलनिर्देशव्यापारे। श्रीधरचण्डीदासाद्युक्तमनुशयदेवयानीनामक नाटक किमपि स्याद्यत्राभिज्ञानशकुन्तलविक्रमोर्वशीसज्ञयोरिव कालिदासस्य च्छायोपजीवित्वमस्मिन्नपि श्लोके सम्भवि। 'क्वाकार्य'मित्याद्यवान्तरवाक्येष्वभिज्ञानशकुन्तलपद्याना प्रतिध्वनि स्फुट एव। यदेतच्छ्रीधरव्याख्याने 'कस्यचित् कवे... कण्वाश्रमे शकुन्तला दृष्ट्वा दुष्यन्तस्य तस्यां ब्राह्मणीत्वमाशङ्कमानस्ये'ति प्रहेलिकाप्राय विदग्धविभ्रमकर वचनं मल्लिनाथेनैकावलीतरलेऽनूदितप्राय वचनन्तदतीवकौतुकावहम्। ततोऽप्यधिकतर' कौतुककरी सान्धिविग्रहिकं प्रति श्लेषोत्प्रासभाषणपटोश्चण्डीदासस्य श्रीविद्याचक्रवर्तिनश्चात्र मौनमुद्रा।

भावस्थितिस्तूक्ता चोदाहृता च ।

मुख्ये रसेऽपि तेऽङ्गित्वं प्राप्नुवन्ति कदाचन ।

ते भावशान्त्यादयः । अङ्गित्वं राजानुगतविवाहप्रवृत्तभृत्यवत् ।

अनुस्वानाभसंलक्ष्यक्रमव्यङ्ग्यस्थितिस्तु यः ॥३७॥

शब्दार्थोभयशक्त्युत्थस्त्रिधा स कथितो ध्वनिः ।

शब्दशक्तिमूलानुरणनरूपव्यङ्ग्योऽर्थशक्तिमूलानुरणनरूपव्यङ्ग्य उभयशक्तिमूलानुरणनरूपव्यङ्ग्यश्चेति त्रिविधः । तत्र

अलङ्कारोऽथ वस्त्वेव शब्दाद्यत्रावभासते ॥३८॥

प्रधानत्वेन स ज्ञेयः शब्दशक्त्युद्भवो द्विधा ।

तदिह वितर्कादिबाधने औत्सुक्यादीनामुत्तरोत्तरस्थितौ सम्भूय प्रकाशाच्छबलत्वं चमत्कारस्थानम् । नन्वेवं विभावानुभावमुखेनाप्यधिकश्चमत्कारो दृश्यत इति विभावध्वनिरनुभावध्वनिश्च वक्तव्यः । नैवं, विभावानुभावौ तावत् स्वशब्दवाच्यावेव, तच्चर्वणाऽपि चित्तवृत्तिष्वेव पर्यवस्यतीति न रसभावेभ्योऽधिकं चर्वणीयम् । यदि तु विभावानुभावावपि व्यङ्ग्यौ भवतस्तदा वस्तुध्वनिः किं न[प्र]सज्यत इति भावशान्त्युदयावुक्तौ । स्थितिस्तु मध्यमावस्था कस्मान्नोक्ता इत्यत आह **भावस्थितिस्तु**ति—भावस्य सत्ताया स्थितिरूपत्वात्, भावग्रहणेनोक्तत्वात् । नन्वनन्तरोदाहरणेष्वेव रससद्भावात् कथं भावोदाहरणत्वमित्याह **मुख्ये रसेऽपी**ति । यदा कुतश्चिदङ्गादुद्रिक्तावस्थाप्रतिपत्तौ व्यभिचारी निरतिशयसुखास्वादप्रयोजको भवति तदा तस्यापि प्राधान्यं मन्यते । एतद्दृष्टान्तेनोप(63a)पादयति **राजानुगते**ति ।

एवमसंलक्ष्यक्रमं निरूप्य संलक्ष्यक्रमव्यङ्ग्यं निरूपयितुमाह—**अनुस्वानाभे**ति । अनुस्वानोऽनुरणनम्, तदाभस्तत्क्रमप्रत्येयत्वात्तत्सदृशोऽतएव **संलक्ष्यक्रमव्यङ्ग्यो** यो व्यङ्ग्योऽर्थस्तस्य स्थितिर्यत्र । 'स च त्रिविधः शब्दशक्तिमूलादिभेदात् । तत्र शब्दस्य शक्तिर्द्वितीयोऽभिधाव्यापारः । 'तथाहि प्रकृतोक्तापेक्षया यो द्वितीयोक्तो (द्वितीय उक्तो) यथा **उल्लास्येत्यादौ** मेघलक्षणः, स प्रदेशान्तरे वर्णयितुं प्रस्तुतत्वादभिधेय एव । तत्र च शब्दस्याभिधाव्यापारस्तद्रूपा या शब्दस्य शक्तिः सा व्यङ्ग्यस्यार्थस्य मूलम्, तां विना तस्यानुत्थानात् (ह्रासात्), [अतश्च साऽभिधाशक्तिरेव व्यञ्जनशक्तितया प्रतिपादिता]' (रु सं. २६ पृ)। तदयमर्थः । यत्र प्रकरणादिनियन्त्रिताभिधाशक्तिकानां शब्दानामेकार्थकथनानन्तरं स्थानान्तरनिरूपिताभिधायकत्वेनाभिमतार्थान्तरस्मरणकारणाद्ध्वञ्जकत्वं तत्र

वस्त्वेवेत्यनलङ्कार वस्तुमात्रम्। आद्यो यथा—

उल्लास्य कालकरवालमहाम्बुवाह देवेन येन जरठोर्जितगर्जितेन।
निर्वापितः सकल एव रणे रिपूणां धाराजलैस्त्रिजगति ज्वलितः
प्रताप.॥५४॥ (कप्फि अ १।२४)

अत्र वाक्यस्यासम्बन्धार्थाभिधायकत्व मा प्रसाङ्क्षीदिति प्राकरणिकाप्राकरणिकयोरुपमानोपमेयभाव कल्पनीय इत्यत्रोपमाऽलङ्कारो व्यङ्ग्य.।

द्वितीयाभिधाशक्तिर्मूलम्। अतस्तत्र शब्दशक्तिमूलता। येषाञ्च शब्दाना स्थानान्तरेऽप्याह (ऽप्यर्थे) व्यज्यमानार्थान्तराभिधानसम्बन्धो नाधिगतचरस्तत्रार्थशक्तिमूलता, द्वाभ्याञ्चोभयशक्तिमूलतेति। **वस्त्वेवे**ति—'नन्वलङ्कारोऽपि नावस्तु, तत् कथमलङ्काराद्वस्तुन पृथक्त्वेनोक्तिरित्याशङ्क्य 'एव' शब्द निष्पा (63b) दयति—**अनलङ्कार**मिति। अलङ्कारो हि विचित्र वस्तु, इदन्तु शुद्धमेवेत्यर्थ। **उल्लास्ये**ति—**कालो** वैरिणा सहर्ता य **करवालरू**पो **महाम्बुवाहो** महदम्बुधाराजलरूप वहति तमुल्लास्येत्यर्थ। 'महाम्बुवाहाना शक्रादीनामपि सम्भवात् करवालेन विशेषण, करवालस्य त्वम्बुवाहेन रूपणे रूपकेणैव तत्कार्यस्य सिद्धत्वान्नोपमाध्वनेरिदमुदाहरणमिति यत् कैश्चिदुक्त तत्तु (रु स. २७) श्लोकार्थमपरामृश्य। तथाहि करवाले यन्महदम्बु विपुल धाराजल तस्य वाह प्रवाहमुल्लास्येति द्वितीयेऽर्थे **कालकर** कृष्णरश्मियों **बालः** प्रलयोद्गतो **महाम्बुवाहो** महामेघस्तमिति व्याख्येयम्'। **देवेन** राज्ञा मेघाधिष्ठात्रा च **जरठेनोर्जित** तेजोमु(यु)क्त **गर्जितं** झङ्कारो मेघध्वनिश्च। **सकल एव रणे** सर्वस्मिन्नेव रणे सकल **प्रतापो निर्वापितः** शमित, **धाराजल**मसङ्गत खड्गत्वविशेष., नभ पाति प्रवाहसलिल [च]। **प्रतापः** शौर्योष्मप्रभाव आतपोष्मा च। नन्वेव श्लेषमाहात्म्यादेव द्वितीयोऽर्थः प्रतीयते, तत्र चाभिधाव्यापार एव प्रगल्भते। तथाहि तन्त्रेण न्यायेन तादृश शब्दद्वयमुच्चारित सत् प्रत्येकमभिधाशक्तियोगान्निजमर्थमभिधत्ते, एक एव वा शब्द उच्चारितो यत शब्दान्तरं प्रतिशब्दन्यायेन नि सरति यन्नि.सरतिरू(सरद्रू)पं निजमर्थं प्रत्याययतीति सर्वत्राभिधाशक्त्यैवार्थान्तरप्रतीतिरिति किं तत्र व्यञ्जन (64a) व्यापाराभ्युपगमेन? उच्यते। **इह** यदेव वर्णनार्हं तदेवाभिधेयम्, अवर्णनार्हस्याभिधेयत्वेऽतिप्रसङ्गात्। वर्णनार्हश्च यत् प्राकरणिकमप्राकरणिकमपि वा यदुपमानत्वादिना प्रयोजनवत्। एवञ्च प्रकृते विषयेऽर्थान्तर न प्राकरणिक, नाप्युपमानत्वादिनोपयोगवत्परिबद्धम् (वदुपनिबद्धम्), ततश्चाभिधेयत्वाभावाद्व्यापारान्तरविषयत्वेनोपगन्तव्यम्। एवमपि प्रकृतत्वाभावात् प्रकारान्तरोपयोगविरहाच्च

व्यापारान्तरविषयत्वमपि कथमिति चेत् ? एवं तर्हि यथोपयोगयोग्यता तथैव प्रत्येष्यते। सा चोपमानत्वेनेति, तेन सह प्रकृतस्यौपम्य कल्पितव्यमित्युपमाऽलङ्कारोऽत्र व्यञ्जनाव्यापारविषयो नार्थान्तरमात्रम्, अन्यथाऽसम्बद्धार्थाभिधायित्व स्यात्। तदाह—**अत्र वाक्यस्येति**। एवञ्च यथाऽविवक्षितवाच्ये ध्वनौ यत्र धर्मा लक्ष्यास्तत्र यथा '**रामोऽस्मी**'त्यादौ राज्यभ्रशाद्य-स्तत्र धर्मिवैशिष्ट्यमेव प्रयोजनमिति तस्मिन् व्यङ्ग्ये धर्माणामपि व्यङ्ग्यव्यवहारस्तेषामेव वैशिष्ट्यात्, तथा चात्रौपम्येऽपि व्यङ्ग्य उपमानमपि व्यङ्ग्यतया प्रतिपाद्यते, तत्सलग्न-त्वादौपम्यस्य, तस्य चाप्रकृतत्वेनानुक्तत्वात्। यद्येवमसम्बद्धार्थत्वतयोपमा व्यज्यते तर्हि विरोधव्यतिरेकाद्यलङ्कारान्तर कथ व्यङ्ग्य स्यात्, नहि तेनासम्बद्धार्थत्व परिह्रियते। नैतत्। यत्र वस्तुमात्ररूपस्यार्थान्त(64b)रप्रतीतिस्तत्र तस्य वाच्यं प्रत्यसम्बद्धत्वेनौपम्याख्य सम्बन्ध कल्प्यते। यत्र तु विरोधादेरलङ्कारस्य प्रतीतिस्तत्र तस्य वाच्य प्रत्यलङ्कारत्वादेव वैचित्र्या-त्मकत्वाद्वैचित्र्यस्य च विचित्रवस्तुसंलग्नत्वाद्विचित्रेणालङ्कार्येण वाच्यभूतेनार्थेनाव्यभिचरित एव सम्बन्ध। एवञ्चात्रासम्बद्धार्थत्वसम्भावना नास्ति। केवलमत्रालङ्कारस्य प्रतीयमान-त्वादात्मत्वेऽपि ब्राह्मणश्रमणन्यायेनाज्ञातपूर्वभूतगत्याऽलङ्कारत्वम्। एव तर्हि यत्र शब्दशक्त्या वस्तुमात्र प्रतीयते यद्रुस्त्वेवेति लक्षित तत् (तत्र) क[थ]मुपमा[न]मन्तरेणासम्बद्धार्थपरिहार ? अथोपमाया अत्राङ्गीकार कथ तर्हि वस्तुमात्र व्यङ्ग्य स्यात् ? सत्यं, यत्र शब्दशक्त्या वस्तन्तरस्य प्रतीतिस्तत्र यदि नासम्बद्धार्थेनौपम्य नालङ्कारान्तर तर्हि वाच्यप्रतीयमानयो-रन्यत् किञ्चिज्ज्ञातेयमभ्युपगन्तव्यम्, अन्यथाऽसम्बद्धार्थस्य परिहारो न स्यात्। ज्ञातेयञ्च चिन्त्यमानं व्यङ्ग्य प्रति वाच्यस्यार्थसामर्थ्यविशेषे पर्यवस्यति। स च वक्त्रौचित्यादिरूप। एव शब्दशक्त्या वाच्यगतेन च सामर्थ्यविशेषेणार्थान्तरप्रतीतौ कार्यायामुभयशक्तिमूलत्वमेवात्र पर्यवस्यति,[28] न केवल शब्दशक्तिमूलत्वम्। अतएव ध्वनिकृता 'आक्षिप्त एवालङ्कार

28 उभयशक्तीत्याद्यन्त टीकाकृद्विवरण 'शब्दार्थशक्त्या' इति ध्वन्यालोककारिकां 'शब्द-शक्तिस्तावच्छब्दश्लेषवशादर्थशक्तिस्तु प्रकरणवशा'दिति लोचनव्याख्यानञ्चोप-जीवति। एष एव प्राचीनानामाश्रयाश्रयिमूलो नय। एनमेवाश्रित्य रुचकेन सङ्केते 'अयन्तु ग्रन्थकार उभयशक्तिमूले भ्रान्त' इति साक्षेपमभिहितम्। श्रीधरेणाप्यतन्द्रेत्यादि तदुदाहरणे चोभयप्राधान्ये सत्युभयशक्तिमूलत्वमित्य-व्याकृतप्राय व्याकृतम्। मम्मटेन परिवृत्तिसहत्वासहत्वमूलत्वमनुरुन्धता सर्वथाऽऽविष्कृतं स्वमनीषितागौरवमिति नास्त्यत्र सशयलेश। दोषगुणालङ्कारेष्व-प्येतन्मतस्यातिदेशस्तदुपज्ञ एव। यद्यपि प्राचीनैर्वामनीयै'र्यत्पदानि त्यजन्त्येव

तिग्मरुचिरप्रतापो विधुरनिशाकृद्विभो मधुरलीलः ।
मतिमानतत्त्ववृत्तिः प्रतिपदपक्षाग्रणीर्विभाति भवान् ॥५५॥

अत्रैकैकस्य पदस्य द्विपदत्वे विरोधाभासः ।

अमितः समितः प्राप्तैरुत्कर्षैर्हर्षद प्रभो ।
अहितः सहितः साधुयशोभिरसतामसि ॥५६॥

अत्रापि विरोधाभासः ।

निरुपादानसम्भारमभित्तावेव तन्वते ।
जगच्चित्रं नमस्तस्मै कलाश्लाघ्याय शूलिने ॥५७॥ (उत्पल स्तो)

अत्र व्यतिरेक.। अलङ्कार्यस्यापि ब्राह्मणश्रमणन्यायेनालङ्कारता ।

शब्दशक्त्या प्रकाशते' (ध्व आ. २।२२) इत्यादिकारिकयाऽलङ्कारध्वनिरेव शब्दशक्तिमूलोऽभ्युपगतो न वस्तुध्वनि (65a) उभयशक्तिमूलस्तु 'शब्दार्थशक्त्याक्षिप्तोऽपी'त्येतत्- (ध्व आ २।२४) कारिकावृत्तिग्रन्थे प्रकाशित । 'एवञ्च '**पथिअ ण एत्थ**' इत्याद्युदाहरणद्वये क्रमेण वक्त्रौचित्य प्रतिपाद्यौचित्यञ्चाश्रित्य शब्दशक्त्याऽर्थान्तरप्रतीतिरित्युभयशक्तिमूलत्वात् केवलशब्दशक्तिमूलत्वमसमोचीनमिति ध्वनिकृतोऽभिप्राय । यत्तु तेनैव—दृष्ट्या केशव गोपरागहृतया किञ्चिन्न दृष्ट मया तेनैव स्खलिताऽस्मि नाथ पतिता कि नाम नालम्बसे। एकस्त्व विषमेषु खिन्नमनसा सर्वाबलाना गतिर्गोप्यैव गदित सलेशमवताद्गोष्ठे हरिर्वश्चिरम् ॥ (ध्व आ २।२२ वृ) इति शब्दशक्तिमूलप्रत्युदाहरणत्वेनोदाहृत्योभयशक्तिमूलत्वेनोदाहृतम् (ध्व २।२४ वृ) न तदयुक्तम् 'यो ह्युभयोर्भवति लभतेऽसावन्यतरतोऽपि व्यपदेश'मिति न्यायेन मुख्यतयोभयशक्तिमूलत्वेऽप्यन्यतरव्यपदेशेन शब्दशक्तिमूलत्वप्रकाशनात् । एतद्- ग्रन्थकृता तूभयशक्तिमूलोऽन्यादृश प्रदर्शित ' (रु सं ३०)। तत्र चास्याभिप्रायमुदाहरणप्रसङ्गेन दर्शयिष्यतीति प्रकृते मुख्यमेव शब्दशक्तिमूलत्व युक्तमिति ।

तिग्मरुचिरिति—'तिग्मस्तीक्ष्ण रुचिरश्च प्रतापो यस्य, **विधुराणां** वैरिणा **निशाकृदान्ध्यहेतु**, मधुरा लीला यस्य, मतिमानयोस्तत्त्वेन वृत्तिर्यस्य, **प्रतिपद पक्षाणां** स्वमुख्यानाम्

परिवृत्तिसहिष्णुताम् । तं शब्दन्यायनिष्णाताः शब्दपाक प्रचक्षते' इति, नव्यतन्त्रप्रतिष्ठापकैरपि 'किञ्च काव्याना चारुत्वप्रतीतिरन्वयतिरेकाभ्या भागेषु कल्प्यत' इत्यादिदिशा स एवार्थं सूचितस्तथापि शब्दव्यापारविचाररसिकेन मम्मटेनैवास्य प्रकृततात्पर्यमुद्घाटितमिति सम्भाव्यं सुधीभि ।

वस्तुमात्रं यथा—

पथिअ ! ण एत्थ सत्थरमत्थि मण पत्थरत्थले गामे ।
उण्णअपओहर पेक्खिअ उण जइ वससि ता वससु ।।५८।।

(व ल ४६४ , गा स वे ८७६)

अत्र यद्युपभोगक्षमोऽसि तदाऽऽस्स्वेति व्यज्यते ।

अग्रणीः प्रधानम्, तथा तिग्मरुचिरादित्योऽप्यातपरहित, विधु (65b)श्चन्द्रोऽप्यनिशाकर, मधुर्वसन्तोऽपि लीलारहितः, मतिमान् प्राज्ञोऽप्यतत्त्ववृत्तिरवस्तुनिष्ठ, प्रतिपत् [पक्ष]-पूर्वदिवसोऽपि पक्षस्य मासार्धस्य नाग्रणीर्नारम्भक इति विरोध । एव**ममित**• पारिमित्यरहित **समितः** सग्रामात् प्राप्तैरुत्कर्षैरतिशयैर्हर्षं ददातीति य स सम्बोध्यते । तथा **यशो**भि **सहितः** सन्न**सतामहितः** कल्याणनिवर्तक । विरोधपक्षे त्वमितोऽपि समित, अहितोऽपि सहित इति (इत्यादि) योजना । सभङ्गाभङ्गश्लिष्टपदगतविरोधभेदेनोदाहरणद्वयम् । **निरुपादाने**ति **सम्भार**पदोपादानादुपादानपदमत्र निमित्तमात्रपरं **चित्र** नानाप्रकारमालेख्य च । **कला** शक्ति• । प्रतियोगिनोऽनुपादानाद्व्यतिरेको व्यङ्ग्य । अत्र विरोधव्यतिरेकावलङ्कारत्वाद्वाच्यासलग्नत्वेऽपि प्रतीयमानत्वादात्मत्वेनालङ्कार्यौ" (रु स ३० पृ) वस्तुध्वनिर्यथा **पथिअ** इति । पथिक नात्र सस्तरोऽस्ति मनाक् प्रस्तरस्थले ग्रामे । उन्नतपयोधरं प्रेक्ष्य यदि वससि तद्वस ।। सस्तरस्तृणादिशय्या[29], प्रस्तरा• पाषाणा । एवमपि चेन्मेघभय तद्वस । व्यङ्ग्यन्तु प्रहरचतुष्टयमप्युपभोगेनात्र निद्रादारिद्र्यमस्ति । सर्वे ह्यत्र प्रस्तरप्राया

---

29 पंथिअ इत्यत्र पूर्वार्धे तृतीयचतुर्थगणयो सत्थरँमत्थिम इतिच्छन्द शास्त्रानुयायिनि पाठे शस्तरत (माणिक्यचन्द्रमते शास्त्ररत-) मपि स्स्तर[क] मस्तीत्यपि च्छाया । 'द्व्यर्थैः पदैः पिशुनयेच्च रहस्यवस्तु'ति रसिकसमयेनैकाधिकश्लिष्टपदेनेष्टार्थो गम्य । 'वाक्यप्रकाश्यता व्यङ्ग्यस्येती'त्यत्र हेमचन्द्रवृत्ति• सुस्थिता। नव्यमते परिवृत्तिसहत्वासहत्वबलेनात्रोभयशक्तिमूलत्वम् । अत्र जयरथोऽलङ्कारविमर्शिण्या 'यत्तु काव्यप्रकाशसकेते ग्रन्थकृता वस्तुध्वने शब्दशक्तिमूलत्व चिन्त्यमुक्त तदुदाहरणाभिप्रायेणैवोन्नेयम् । तत्र हि 'पन्थिअ ण इत्थ सत्थर' इत्याद्युदाहरणमुभयशक्तिमूलं शब्दशक्तिमूलस्य वस्तुध्वने• श्रीमन्मटेनोपात्तम् । इह तु यथासम्भवमेव विचारित'मिति । गाथासाहित्ये ह्येकप्रकृतिकाना तथा भिन्नप्रकृतिकानामप्येकाकाराणा पदानामेकाधिकेऽर्थे नातिविरला उपयोगा यथा 'सत्तसई'

शनिरशनिश्च तमुच्चैर्निहन्ति कुप्यसि नरेन्द्र ! यस्मै त्वम्।
यत्र प्रसीदसि पुनः स भात्युदारोऽनुदारश्च ॥५९॥

अत्र विरुद्धावपि त्वदनुवर्तनार्थमेकं कार्यं कुरुत इति ध्वन्यते।

अर्थशक्त्युद्भवोऽप्यर्थो व्यञ्जकः सम्भवी स्वतः ॥३९॥
प्रौढोक्तिमात्रात् सिद्धो वा कवेस्तेनोम्भितस्य वा।
वस्तु वाऽलङ्कृतिर्वेति षड्भेदोऽसौ व्यनक्ति यत् ॥४०॥
वस्त्वलङ्कारमथवा तेनायं द्वादशात्मकः।

अविदग्धा, तदुन्नतपयोधरा मामुपभोक्तुं यदि वससि तदा तिष्ठेति वस्तु। अत्र वाच्यबाधनेन व्यङ्ग्यस्य स्थितत्वात्तयोर्नोपमानोपमेयभावः। किञ्च यत्र शब्दशक्त्या वस्त्व(66a)न्तरस्य प्रतीतिस्तत्रोपमानमन्तरेणापि सम्बद्धार्थत्वं दृश्यते यथा (अ स श्लेषप्र)—"सद्य कौशिकदिग्विजृम्भणवशादाकाशराष्ट्रं रसात्त्यक्त्वा धूसरकान्तिवल्कलधरो राजाऽस्तशैलं ययौ। तत्कान्ताऽप्यथ सान्त्वयन्त्यलिकुलध्वानै समुल्लासिभि क्रन्दन्त कुमुदाकरं सुतमिव क्षिप्रं प्रतस्थे निशा ॥ इति **हरिश्चन्द्रचरिते** प्रभातवर्णनानुगुण्येन राजशब्दाभिधेयेऽस्तमुपेयुषि चन्द्रे रोहिताश्वाख्यतनयसहितया औशीनर्या वध्वा युक्तस्य राज्ञो विश्वामित्रसपादितोपद्रववशात् प्रात स्वराष्ट्रं त्यक्त्वा वाराणसी प्रति प्रस्थान सूचितम्। तथाच कौशिकशब्द प्रकृते इन्द्रोलूकयोर्वर्तते, सूचनीयार्थविषयत्वेन तु विश्वामित्रवृत्ति। वल्कलसुताभ्या त्वौपम्यं सूचनीयार्थनैरपेक्ष्येण सादृश्यसभवमात्रेण विश्रमणीयम्, अतश्च प्रकृतेन सूचनीयस्य सबन्धाच्छब्दशक्तिमूलो वस्तुध्वनिरेवायम्"। एवमन्यत्रापि यत्रोपमापरिहारेण प्रकारान्तरेणापि सम्बन्धो घटते तत्रोपमाध्वनावभिरेशा[निवेशो]न कर्तव्य किन्तु तत्र शब्दशक्तिमूलो वस्तुध्वनिरित्यवगन्तव्यम्। **शनिरि**त्यादि। **अशनिर्वज्र**म्। **शनिरशनिश्चे**ति—'न चात्र विरोधालङ्कार शङ्कनीय, एकविषयत्वाभावात्। अन्यो हि

कोषे 'मुहमारुएण त कण्ह गोरअ' (१।८६) इत्यादिकाया, 'परिहूएण वि. . दड्ढकाएण' (२।३४), इत्यादिकाया, 'सवाहणसुहरस...तुह करलक्ख'। (५।२४) इत्यादिकाया 'आवरणाइँ कुलाइ' (५।६७) इत्यादिकायां च गाथायां भूयासि द्वितीयभेदस्योदाहरणानि। रुचककृतसङ्केतसंस्करणे ३० पृष्ठायामस्मत्कृता टिप्पणी सरस्वतीकण्ठाभरणे १११ पृ. एतद्गाथोपरि वृत्तिश्च जिज्ञासुभिरत्र द्रष्टव्ये। कण्ठाभरणधृतपाठस्तु 'कुतो लम्भइ पथिअ सत्तरअं' इति।

स्वतःसंभवी न केवलं भणितिमात्रनिष्पन्नो यावद्बहिरप्यौचित्येन संभाव्यमानः। कविना प्रतिभामात्रेण बहिरसन्नपि निर्मितः कविनिबद्धेन वक्त्रेति वा द्विविधोऽपर इति त्रिविधः। वस्तु वाऽलंकारो वासाविति षोढा व्यञ्जकः। तस्य वस्तु वाऽलंकारो वा व्यङ्ग्य इति द्वादशभेदोऽर्थशक्त्युद्भवो ध्वनिः।

शनिरन्यश्चाशनिरिति। उदारोऽनुदारश्च—इत्यत्रैकविषयत्वात् सत्यपि (66b) विरोधालङ्कारे शनिरित्यादि वस्तुध्वन्युदाहरणम्। **उदार** उद्गतारकोऽपि तद्विपरीतो**ऽनुदारो**ऽनुगतदारश्च।

एवं शब्दशक्तिमूलं वस्तु निर्णीयार्थशक्तिमूलं विभज्य (वितत्य) निर्णेतुमाह—**अर्थशक्त्युद्भवोऽपी**ति। तत्र द्वादशप्रकारत्वेऽयमभिप्रायः—इह व्यञ्जनव्यापारमूलं ध्वनिस्वरूपं व्यञ्जनश्चोभयत्र व्यञ्जके व्यङ्ग्ये च दत्तपदम्। तत्र व्यञ्जकाश्रयेण प्रकारषट्कं—तथाहि व्यञ्जकस्यार्थस्य भणितिमार्ग इव बहिरपि सम्भवात् स्वतःसम्भवित्वम्, यद्वा बहिरसम्भवेऽपि प्रौढोक्त्या निष्पन्नत्वम्। 'प्रकर्षेणोढः सम्पादयितव्येन वस्तुना प्राप्तस्तत्कुशलः **प्रौढः**।' उक्तिरपि समर्पयितव्यवस्त्वर्पणोचिता प्रौढेत्युच्यते। प्रौढोक्तिः क्वचित् कविसम्बधिनी यत्र ताटस्थ्येन वर्णनम्। क्वचित्तु कविनिबद्धस्य सम्बन्धिनी यत्र रसाद्याविष्टो वक्ता। 'एवं व्यञ्जकस्यार्थस्य त्रैविध्यम्, तत्रापि प्रत्येकं वस्तुमात्रत्वादलङ्काररूपत्वाच्चेति द्वैविध्यम्। एवं व्यञ्जकस्य षट् प्रकाराः। व्यङ्ग्यस्यापि वस्तुमात्रत्वादलङ्काररूपत्वाच्च(च) द्वैविध्यम्। प्रकारषट्कस्य द्वाभ्यां गुणने द्वादश भेदा भवन्ति।' (रु. सं. ३१पृः) **सम्भवी स्वतः**, स्वतःसम्भवेन सम्भवीत्यर्थः। **न केवल**मिति—उक्तिवैचित्र्यं तावत् सर्वथोपयोगि भवतीति भावः। स चार्थो यथा यथा वर्ण्यते तथा तथा स्वदत इत्यास्तां तावद्व-(67a)र्णना यावद्बहिरपि पिण्डौचित्येन तत्समयोचितत्वेन प्रत्यक्षादिनाऽऽलोक्यमानः सुतरां सौभाग्यमावहतीति। "ननु स्वतःसम्भविप्रभृतयो यदि व्यञ्जकार्थगतत्वेन भेदा उच्यन्ते तत् केवलयोर्वाच्यलक्ष्ययोरपि भेदत्वेन किमिति न वक्ष्यन्तेऽविशेषात्? अथ व्यञ्जनोपयोगितया तेषां भेदत्वं तर्हि व्यञ्जनस्योभयत्र दत्तपादत्वाद्व्यङ्ग्यार्थगतत्वेनापि किमिति नाभिधीयन्ते? उच्यते—निमित्ताभिप्रायेणोक्तत्वात्। व्यञ्जकत्वं हि तन्निमित्तम्, न व्यङ्ग्यत्वम्। तथाहि कश्चिदर्थः कविनिबद्धेन वक्त्रा प्रौढोक्त्या प्रतिपादित इति व्यञ्जको न कविप्रतिपादितो नापि स्वतःसम्भवेन "यथा—शिखरिणि क नु नाम कियच्चिरं किमभिधानमसावकरोत्तपः। तरुणि येन तवाधरपाटलं दशति बिम्बफलं शुकशावकः॥ (ध्व. आ. १।१६ वृः) इत्यत्र रागित्वमन्तरेण तस्यार्थस्यावचनाहेत्वात् प्रच्छन्नस्वाभिप्रायख्यापनवैदग्ध्यचाटुविरचनात्मकविभावोन्मीलनरूपमर्थान्तरं प्रति व्यञ्जकत्वाभावाच्च।" (रु. सं. ३१-३२ पृः) न हि लोहितबिम्बफलमयं

क्रमेणोदाहरणम्—

अरसिरोमणि[30] धुत्ताणं अग्गिमो पुत्ति धणसमिद्धिमओ।
इअ भणिएण णअङ्गी पप्फुल्लविलोअणा जाआ ॥६०॥ (गा स. वे ६७०)

अत्र ममैवोपभोग्य इति वस्तुना वस्तु व्यज्यते।

धन्याऽसि या कथयसि प्रियसङ्गमेऽपि विस्रब्धचाटुकशतानि रतान्तरेषु।
नीवीं प्रति प्रणिहिते तु करे प्रियेण सख्यः शपामि यदि किञ्चिदपि
स्मरामि ॥६१॥ (विज्जकाया)

शुको दशतीत्येतावता कविनिबद्ध साभिलाष वक्तारमनपेक्ष्य व्यञ्जकता सम्भवति। कश्चित्तु कविनिबद्धोक्तिमनपेक्ष्यैव कविप्रौढोक्तिप्रतिपादित इत्येव व्यञ्जको न स्वत सम्भवित्वेन यथा— सज्जेइ(67b)सुरहिमासो ण दाव अप्पेइ जुअइजणलक्खमुहे। अहिणवसहआरमुहे णवपल्लव-पत्तले अणङ्गस्स सरे॥ (ह वि) (ध्व आ २।२५ वृ) इति। 'अत्र वसन्तोऽचेतनोऽनङ्गस्य सखा सज्जयति न केवल तावदर्पयति। अस्या गाथाया अर्थो बहि सम्भवाभावात् न स्वत सम्भवी, नापि कविनिबद्ध वक्तारमपेक्षते, वक्तुरपेक्षाया अभावात्। एवविधया स्वत कविप्रजापति-निर्मितेन तु मन्मथोन्मादकस्य समर्पयितव्यवस्त्वर्पणकुशलयोक्त्या सहकारोद्भेदिनी वसन्तदशा यत उक्ता ततो ध्वन्यमान मन्मथोन्माथकस्य संरम्भ (स्यारम्भ) क्रमेण गाढगाढीभवन्तमारब्धं व्यनक्ति' (ध्व आ. लो १०६ पृ)। कश्चित् पुनर्बहिरपि भावात् स्वत सम्भवेन व्यञ्जको यथा— (कु. स ६।८४) एव वादिनि देवर्षौ पार्श्वे पितुरधोमुखी। लीलाकमलपत्राणि गणयामास पार्वती॥ (रु. स ३२ पृः) 'अयं ह्यर्थः प्रचुरं लोकव्यवहारे स्थित, तथाविधश्च लज्जा-व्यञ्जकत्वे[न] प्रतीयते। लज्जा चात्र व्यभिचारिभावभूताऽपि विभावानुभावयोरतिचारुत्वेन प्रतीतिविश्रान्तिसारत्वात् प्रतिपाद्यते। प्रतिपन्ना सती वस्तुत्वेन व्यवहृता, न भावत्वेन। तेनार्थशक्तिमूलस्य वस्तुध्वनेरिदमुदाहरणम्, नासलक्ष्यक्रमव्यङ्ग्यस्य भावध्वने.। तस्माद्व्यञ्जक-स्यैवार्थस्य व्यञ्जने निमित्तत्वात् स्वत सम्भविप्रभृतयो भेदा उक्ता, न च व्यङ्ग्यार्थगतत्वेना-पीति। अरसेत्यादि—अरसशिरोमणिर्धूर्तानामग्रणी पुत्रि धनसमृद्धिमय.। इति भणितेन नताङ्गी प्रफुल्लविलोचना जाता॥ अरसा अरोचकिन प्र(68a)फुल्लविलोचनत्व सुन्दरपदार्थदर्शनेन समन्वित सदात्मैकभोगत्व व्यनक्ति। अस्य वाक्यस्य कविना प्रतिपादितत्वेऽपि

30 प्रचलितपुस्तके 'अलसे'त्यादि पाठो दृश्यते। 'डलयो रलयोश्च व्यत्ययो बहुल'मिति सर्वं समञ्जसम्। 'सिरमणी' इति पाठस्तु प्राकृतव्याकरणानुयायी। स च कैश्चित् स्वीकृत।

अत्र त्वमधन्या, अहन्तु धन्येति व्यतिरेकालङ्कारः।

दर्पान्धगन्धगजकुम्भकपाटकूटसंक्रान्तिनिघ्नघनशोणितशोणशोचिः।
वीरैर्व्यलोकि युधि कोपकषायकान्तिः कालीकटाक्ष इव
यस्य करे कृपाणः ॥६२॥ (कपि्फ अ १।३७)

अत्रोपमाऽलङ्कारेण सकलरिपुबलक्षयः क्षणात् करिष्यत इति वस्तु।

गाढकान्तदशनक्षतव्यथासकटादरिवधूजनस्य यः।
ओष्ठविद्रुमदलान्यमोचयन्निर्दशन् युधि रुषा निजाधरम् ॥६३॥

अत्र विरोधालङ्कारेणाधरनिर्दशनसमकालमेव शत्रवो व्यापादिता इति तुल्ययोगिता, मम क्षत्याऽप्यन्यस्य क्षतिर्निवर्ततामिति तद्बुद्धिरुत्प्रेक्ष्यत इत्युत्प्रेक्षा च। एषूदाहरणेषु स्वतःसम्भवी व्यञ्जकः।

बहिरपि सम्भवित्वात् स्वत सम्भवित्वम्' (रु सं ३२ पृ)। **धन्ये**त्यादि—वाचा शरीरस्पर्शन न विवक्षितमिति **शपामी**ति परस्मैपदम् (पा १।३।२१ वृ)। 'अत्र चाटुकारवर्णनात् प्रियतमरतोपक्रमे मध्यादिसमयानुभवमेवावेदयन्ती भवतो प्राज्ञत्वेन धन्याऽहन्तु नीवीदेश एव जातकरस्पर्शमात्रेण मोहितत्वान्न किञ्चित् स्मरामीत्येतावद्वाच्यं 'न तु त्व धन्याऽस्यहमधन्येत्येवरूपम्। ततश्च वाच्यो व्यतिरेको नाशङ्कनीय' (अ स ३२ पृ॰)। **दर्पान्धे**ति—**गन्धगजा** ये परगजगन्ध न सहन्ते। **निघ्नं** परतन्त्रम्। [**कोपकषायकान्तिः**] **कालीकटाक्ष इवे**ति—उपसहारकारिण्यत्र काली। अत्रोत्प्रेक्षा [शङ्का न कार्या]। उत्प्रेक्षा हि प्रकृतगतत्वेनाप्रकृतवस्तुसम्बन्धहेतुका सम्भावना कथ्यते। सा च न कवे, तेन शोणत्वाख्यस्य धर्मस्योपमानोपमेयगतत्वेन वस्तुप्रतिवस्तुतयोपनिबन्धनात्। नापि कविवर्णितानां वीराणाम्। नहि तै कालीकटाक्षसम्भावनया कृपाण प्रतिपन्नोऽपि तु कृपाणत्वेन। अथ व्यलोकीति सम्बन्धबलात् सम्भावना व्यवस्थाप्यते? न, व्यलोकीति सम्बन्धबलान्न सम्भावनाप्रतीतिरपि तु सादृश्यम(मे)व गम्यते, इह शब्दमाहात्म्यात् कटाक्षसदृश• कृपाणो दृष्ट इति प्रतीते। तस्मादुपमैवेयं (68b) नोत्प्रेक्षेति निश्चय। **गाढे**ति—'अत्र य एवाधर निर्दशति स एवोन्मोचयतीति विरुद्धयो क्रिययोरेककर्तृकत्वादेकविषयत्वेन विरोधालङ्कारो वाच्य•। स च स्वत सम्भवी, शीतोष्णादिवदस्य विरोधस्य बहिरपि सम्भवात्। तुल्ययोगिता ये आयुक्ता (त्वत्रायुक्ता), क्रियाभेदात् साम्याभिधानाभावात्—एकत्र दशनक्रियाऽपरत्र व्यापादनक्रियेति क्रियाभेद। तस्मात् कार्यकारणभूतयोर्व्यापादननिर्दशनक्रिययो पूर्वापरत्वेन स्थितयोरप्येककालप्रतीतेरतिशयोक्तिरेवैषेति युक्तम्' (रु स• ३३)। यथाकृतंस्तु विभिन्न-

कैलासस्य प्रथमशिखरे वेणुसम्मूर्छनाभिः
श्रुत्वा कीर्ति विबुधरमणीगीयमानां यदीयाम्।
स्रस्तापाङ्गाः सरसबिसिनीकाण्डसञ्जातशङ्का
दिङ्मातङ्गाः श्रवणपुलिने हस्तमावर्तयन्ति ॥६४॥

अत्र वस्तुना येषामप्यर्थाधिगमो नास्ति तेषामप्येवमादिबुद्धिजननेन चमत्कार करोति त्वत्कीर्तिरिति वस्तु ध्वन्यते।

केसेसु बलामोडिअ तेण अ समरम्मि जअसिरी गहिआ।
जह कन्दराहि विहुरा तस्स दढ कण्ठअम्मि सट्ठविआ॥६५॥

(गा स (?) वे ६७७)

योरपि क्रिययोरेककालत्वे तुल्ययोगितेति मतम्[31]। यदि वा दशन व्यापादनरूप [क्षत ततो या व्यथा] तयाऽध्यवसितगताऽतिशयोक्तिरत्र मूलम्, अधरेण च शत्रूणामौपम्य गम्यमानमिति तुल्ययोगिता। **मम क्षत्ये**त्युत्प्रेक्षमाणेऽत्र हेतुर्गम्यते। **कैलासस्ये**ति। प्रथम प्रधानम्। **अर्थाधिगम** इति—कीर्तेर्गुणोदीरणरूपत्वादस्ति तत्रार्थो, न च [स] गजैरधिगम्यते, तिर्यग्रूपत्वात्। अयञ्चार्थो न बहि सम्भवति, कवेश्च प्रौढोक्त्या वक्तु न वोचित इति तथा व्यवह्रियते। **केसेसु** इत्यादि—केशेषु बलात्कारेण तेन समरे जयश्रीर्गृहीता। यथा कन्दराभिर्विधुरास्तस्य दृढ कण्ठे

---

31 अत्र 'न्यूनस्यापि विशिष्टेन गुणसाम्यविवक्षया। तुल्यकार्यक्रियायोगादित्युक्ता तुल्ययोगिते'ति भामहोक्तप्रकारेण तुल्ययोगितासम्भवो नत्वाधुनिकमम्मटादि-लक्षणेनेति युक्तैव विचिकित्सा प्राक्तनाना टीकाकृताम्। श्रीधरस्य मूलग्रन्थ समर्थनार्थं द्वितीय व्याख्यान कुशकाशकल्पम्। अर्वाचीनैष्टीकाकृद्भिस्तुल्य-योगितापदस्य यौगिकार्थतया समर्थनप्रयासोऽनुपादेयो 'रूढेर्योगापहारिते'ति न्यायात्। यदत्र भट्टगोपालेन 'इत्यल व्याख्येयग्रन्थपौर्वापर्यव्यलीकोद्घाटनेने'ति सप्रश्रयमाक्षेपसूचन तत्रैवविधस्वविरोधिमन्तव्यप्रस्तावने प्रकाशग्रन्थस्य विभिन्ना करतो वस्तुसमुच्चयनमुदाहरणाना तत्तद्ग्रन्थत प्रसक्तस्य वृत्तिविवरणादेरुप-योगश्च हेतुरिति नास्त्येव सशयलेशोऽपि। आकरास्ते ते सर्वत्र नाधुनोपलब्धव्या केवलमनुमितस्वाभाव्या इत्यल पल्लवितेन। एवमप्यग्रे हेत्वलङ्कारपदेन प्राचीनोक्त-हेत्वलङ्कारस्य निर्देशो बोध्यः। तत्प्रसक्तश्च टीकाकृतो विवरण 'हेतुर्वाक्य-पदार्थत्वे काव्यलिङ्गमुदाहृत'मिति लक्षणाक्रान्तत्वसूचनाय।

अत्र केशग्रहणावलोकनोद्दीपितमदना इव कन्दरास्तद्विधुरान् कण्ठे गृह्णन्तीत्युत्प्रेक्षा। एकत्र सङ्ग्रामे विजयदर्शनात्तस्यारयः पलाय्य गुहासु तिष्ठन्तीति काव्यहेतुरलङ्कारः। न पलाय्य गतास्तद्वैरिणोऽपि तु ततः पराभव सम्भाव्य तान् कन्दरा न त्यजन्तीत्यपह्नुतिश्च।

गाढालिङ्गणरहसुज्जुअम्मि दइए लहुं समोसरइ।
माणसिणीण माणो पीलणभीअव्व हिअआहि ॥६६॥

(गा स (१) वे ६३४)

अत्रोत्प्रेक्षया प्रत्यालिङ्गनादि तत्र विजृम्भत इति वस्तु।

जा ठेर व हसन्ती कइवअणबुरुहबद्धविणिवेसा।
दावेइ भुअणमंडलमण्णं विअ जअइ सा वाणी ॥६७॥

(गा स (१) वे ८८२)

अत्रोत्प्रेक्षया चमत्कारैककारण नव नव जगदजडासनस्था निर्मिमीत इति व्यतिरेक.। एषु कविप्रौढोक्तिमात्रनिष्पन्नो व्यञ्जक.।

जे लङ्कागिरिमेहलासु खलिआ सम्भोअखिण्णोरई-
फारुप्फुल्लफणावलीकवलणे पत्ता दरिद्दत्तण।
ते एह्णि मलआनिला विरहिणीणीसाससम्पग्गिणो
जादा झत्ति सिसुत्तणेवि बहला तारुण्णपुण्णा विअ ॥६८॥

(क म १।१६)

संस्थापिता ॥ तस्य विधुरा इति सम्बन्ध। अत्रोत्प्रेक्षाया समासोक्तिर्मूलमवगन्तव्यम्, अन्यथा मदनोद्दीपनस्य (69a) निर्विषयत्वात्। **जअसिरी गहिआ**—एतैर्विधुरैर्जयो दृष्ट इति वाक्यार्थं प्रतीयते, तस्य च पलायनहेतुत्वेन प्रतीतेर्हेतोर्वाक्यपदार्थतेति काव्यलिङ्गता। [न] **त्यजन्ती**त्यपह्नुतेर्दृढं कण्ठे संस्थापितेति व्यञ्जकम्। **गाढे**ति—'गाढालिङ्गनरभसोद्यते दयिते लघु समपसरति। मनस्विन्या मानः पीडनभीत इव हृदयात्॥ अत्रालिङ्गनमात्रेणापि पीडनस्य सम्भव, प्रत्यालिङ्गनेन तु सौष्ठवमिति नैतस्य वाच्यसिद्ध्यङ्गता। **जा** इत्यादि—या ब्रह्माणमिव हसन्ती कविवदनाम्बुरुहबद्धविनिवेशा। दर्शयति भुवनमण्डलमन्यदिव जयति सा वाणी॥ **ठेरं** स्थविरमपि। **अजडासनस्थे**ति—'ब्रह्मस्थानाम्बुजस्य जडता व्यक्तैव। अत्र निर्मातृत्वात्तव गर्वोऽभून्ममापि निर्मातृत्वादिति हसनस्योपपत्तेर्'हसन्ती'ति वाच्ये समर्थिते गर्वोऽतिरिक्तातिशयत्वाद्यभि (गम्यमानव्यातरेकाभि)

अत्र निःश्वासैः प्राप्तैश्वर्या वायवः किं किं न कुर्वन्तीति वस्तुना वस्तु व्यज्यते।

सहि विरइऊण माणस्स मज्झ धीरत्तणेण आसास।
पिअदसणविहलत्तण[32]खणम्मि सहसत्ति तेण ओसरिअ ॥६९॥

(गा स. ६३६)

अत्र वस्तुनाऽकृतेऽपि प्रार्थने प्रसन्नेति विभावना प्रियदर्शनस्य सौभाग्यबल धैर्येण सोढु न शक्यत इत्युत्प्रेक्षा च।

ओल्लोल्ल[33]करअरअणक्खएहि तुह लोअणेसु मह दिण्ण।
रत्तसुअ पसाओ कोवेण पुणो इमे ण अक्कमिआ ॥७०॥

(गा स (?) वे ६७१)

अत्र किमिति लोचने कुपिते वहसीत्युत्तरालङ्कारेण न केवलमार्द्र-नखक्षतानि गोपायसि यावत्तेषामह प्रसादपात्र जातेति वस्तु।

प्रायेण हसन योजनीयम्।' (रु स ३३-३४ पृ) **जे लङ्के**त्यादि—'ये लङ्कागिरिमेखलासु स्खलिता सम्भोगखिन्नोरगीस्फारोत्फुल्लफणावलीकवलनात् प्राप्ता दरिद्रत्वम्। त इदानी मलयानिला विरहिणीनिःश्वाससंसर्गिणो जाता झगिति शिशुत्वेऽपि बहलास्तारुण्यपूर्णा इव॥ अत्र **एण्हिं** [इ]तीदानीमर्थस्य निर्देशाद् बहिश्चार्थे (श्वास) वाक्यार्थस्यासम्भवाद्वाच्यस्य कविनिबद्ध-(69b) वक्तृप्रौढोक्तिनिष्पन्नत्व विद्यते।' (रु स ३१ पृ) वसन्तसमयवर्णनावस्थाऽऽरम्भेऽत्र दक्षिणानिलो मन्मथाज्ञार्थदायित्वेन विरहिणा दीर्घनिश्वासमयीमवस्था मूर्च्छादात्री' तनुते। किन्नोरगोरिव-(खिन्नोरगीस्फार-) फूत्कारविनिर्गततयेत्युत्प्रेक्षाऽपि प्रतीयमाना मन्तव्या। '**सही**त्यादि—सखि विरचय्य मानस्य मम धीरत्वेनाश्वासम्। प्रियदर्शनविशृङ्खलत्वक्षणे सहसेति तेनापसृतम्॥ अत्र प्रार्थनारूपाया. क्रियाया [अ-]भावेऽपि मानस्य निष्पन्नत्वात् प्रसादनरूपस्य कार्यस्योत्पत्तौ विभावना, तस्याश्च **सहसत्ति तेण ओसरिअ** इति व्यञ्जक, तेनेति च निर्दिष्टस्य धैर्यस्य विह्वलत्वेनापसरणेन समर्थित सौभाग्यफल हेतुत्वेनोत्प्रेक्ष्यमाण गम्यते। **ओल्लोल्ले**त्यादि—आर्द्रार्द्रकरजदशनक्षतैस्तव

---

32 विहलत्तलेति मूले पाठो विशृङ्खलक्षणेति तच्छाया चेति रुचकचण्डीदासादीनां ग्रन्थेषु दृश्यते। रुचककृतसङ्केतेऽस्मत्टिप्पनी द्रष्टव्या।

33 'उल्लोल्ले'ति वेबरसम्पादिते गा स पुस्तके पाठ·।

महिलास्सहस्सभरिए तुह हिअए सुहअ सा अमाअन्ती ।

अणुदिणमणण्णकम्मा अङ्ग तणुअं वि तणुएइ ॥७१॥ (गा स २।८२)

अत्र हेत्वलङ्कारेण तनोस्तनूकरणेऽपि तव हृदये न वर्तत इति विशेषोक्ति· । एषु कविनिबद्धवक्तृप्रौढोक्तिमात्रनिष्पन्नशरीरो व्यञ्जकः । एवं द्वादश भेदा ।

शब्दार्थोभयभूरेकः—

यथा—

अतन्द्रचन्द्राभरणा समुद्दीपितमन्मथा ।

तारकातरला श्यामा सानन्दं न करोति कम् ॥७२॥

अत्रोपमा व्यङ्ग्या ।

लोचनयोर्मम दत्तम् । रक्ताशुकं प्रसादं कोपेन पुनरिमे नाक्रान्ते ॥ रक्ताशुका (रक्ता अशुका) रश्मयो रक्त वस्त्र [च] । अत्रोत्तरश्रुतिमात्रेण प्रश्नस्योन्नयनादुत्तरालङ्कार । केवल नेत्रयो कोपेन न रक्तत्वमपि तु रक्ताशुकबलादित्यपह्नुत्यलङ्कारसचिवेनोत्तरालङ्कारेणेति वाच्यम्, ग्रन्थकृता तु तस्यैव मुख्यतयाऽनुरञ्जकत्वान्निर्देश कृत । **महिला-सहस्से**त्यादि । महिलासहस्रभरिते तव हृदये सुभग सा अमान्ती । अनुदिनमनन्यकर्मा अङ्ग तनुकमपि तनयति ॥ अत्र (70a) **महिलासहस्सभरिए** इति पदाथ(र्थ)-रूप एव **अमाअती**त्यत्र हेतुरिति हेत्वलङ्कार काव्यलिङ्गम् । इदन्तु वक्तव्य यथाऽत्र तनूकरणलक्षणस्य कारणस्य सद्भावेऽपि हृदयवर्तनलक्षणस्य कार्यस्यानुत्पत्तौ विशेषोक्ति प्रतीयते, तथाऽमान्तीव करोतीत्युत्प्रेक्षाऽपि चारुतया प्रतीयत एव, तनूकरणेऽमानस्य हेतुत्वोत्प्रेक्षणात् । एवञ्चोत्प्रेक्षाध्वनेरपीदमुदाहरणम् । इत्थमर्थशक्तिमूलस्य द्वादशापि भेदा उदाहृता ' (रु स ३६ पृ) ।

अतन्द्रेति निर्मलकर्पूरनिर्मितालङ्कारवती **समुत्** सहर्षा दीपितकामा **तारकाभ्यां** कनीनिकाभ्या **तरला श्यामा** कान्ता **कं** वलि (मुनि)-मपि **सानन्द न करोति** , अपि तु [सर्वं] करोत्येवेत्येकोऽर्थ । द्वितीयस्तु श्यामा रात्रि पूर्णचन्द्रशोभिता समुद्दीपितकामा तारासङ्कुला । अत्र "श्लिष्टशब्दमाहात्म्याच्छब्दशक्तिमूलत्वम्, तद्वर्जितसाधारणशब्दमाहात्म्यादर्थशक्तिमूलत्वमित्युभयशक्तिमूलत्वम् । नन्वेव शब्दशक्तिमूले यान्युदाहरणानि तान्युभय-शक्तिमूलत्वेनाभ्युपगतानि स्यु । अवश्य हि तत्र केनचित् साधारणशब्दप्रयोगेन भवितव्यम् । अथ श्लिष्टशब्दप्रयोग वक्त्रौचित्यादर्थसाचिव्य वाऽऽश्रित्योभयशक्तित्वमित्युच्यते तर्हि 'तिग्मे'ति 'पन्थिअ ण एत्थे'त्युदाहरणद्वये क्रमेण वक्त्रौचित्य प्रतिपाद्यौचित्यञ्चाश्रित्य शब्दशक्त्याऽर्थान्तरस्य

भेदा अष्टादशास्य तत् ॥४१॥

अस्येति ध्वनेः।

ननु रसादीनां बहुभेदत्वेन कथमष्टादशेत्यत आह—

रसादीनामनन्तत्वाद्भेद एको हि गण्यते।

अनन्तत्वादिति—तथाहि नव रसाः। तत्र शृङ्गारस्य द्वौ भेदौ सम्भोगो विप्रलम्भश्च। संभोगस्यापि परस्परावलोकनालिङ्गनपरिचुम्बनादिकुसुमावचय-जलकेलिसूर्यास्तमयचन्द्रोदयषड्तुवर्णनादयो बहवो भेदाः। विप्रलम्भस्या-भिलाषादय उक्ताः। तयोरपि विभावानुभावव्यभिचारिवैचित्र्यम्। तत्रापि

(70b) प्रतीतिरित्युभयशक्तिमूलत्वात् कथ केवलशब्दशक्तिमूलत्वमित्युक्तम् ?" (रु स ३६ पृ द्र) सत्यं, स्यादेतद् यद्येतावन्मात्रमस्य ग्रन्थकर्तुरुभयमूलत्वे निमित्तत्वेनाभिमत स्यात्। नचैव, तथाहि यत्रैकदेशस्था यथोक्तरूपा शब्दशक्तिरेकदेशान्तरस्था च वक्त्रौचित्यादिसहकृताऽर्थ-शक्तिर्व्यङ्ग्य प्रति व्याप्रियते तत्रोभयप्राधान्ये सत्युभयशक्तिमूलत्वमित्यस्याभिप्रायो यथा प्रकृतोदाहरणे। अत्र हि निशानायिकयोरुद्दीपनालम्बनविभावयोरौपम्यपर्यन्तप्रतीति श्लिष्टशब्दमाहात्म्यात्। विप्रलब्धस्येयं चिन्तेति सानन्दमित्यादिना जगदपि सानन्दं करोति, न मामेव, तथा करोतीत्यादि स्वाभिप्रायस्याभिव्यक्तिरर्थशक्तिमाहात्म्यादिति। नचैत'त्तिग्मे'ति 'पन्थिअ ण एत्थे'त्यादौ च सम्भवति। 'यतश्चार्थान्तरसंक्रमितवाच्योऽत्यन्ततिरस्कृतवाच्य-श्चेत्यविवक्षितवाच्यस्य द्वौ भेदौ, असंलक्ष्यक्रमव्यङ्ग्योऽनन्तभेदोऽप्येक, क्रमद्योतिते तु शब्दशक्तिमूलौ द्वौ, अर्थशक्तिमूला द्वादश, उभयशक्तिमूल एक' (रु स ३६ पृ) ततः स्पष्टा-ऽस्याष्टादशप्रकारतेत्याह—**भेदा** इति। इदशब्देनोभयत्वपरामर्शेऽसङ्गति, अत आह-**अस्ये**ति **ध्वने**रिति। सूत्रनिरसनीया (71a) माकाङ्क्षामवतारयति **नन्वि**ति। यस्माद-सलक्ष्यक्रमव्यङ्ग्योऽनन्तभेदस्तत **एक एव गण्यते**। आनन्त्यस्य दिङ्मात्रमाह—**तथाही**ति। तत्र रसानां शृङ्गार सम्भोगविप्रलम्भभेदभाक् प्रत्येकं वाङ्नेपथ्यक्रियाऽऽत्मकतया षट्प्रकार। तत्र सम्भोगस्य **परस्परावलोकना**दयोऽन्तरङ्गा बहिरङ्गास्तु **कुसुमावचया**दय इति यथाक्रम निर्दिशति। तत्र परस्परदर्शनेन यथा (ध्व आ ३।४ वृ) स्मरनवदनदीपूरेणोढा पुनर्गुरुसेतुभिर्यदपि विधृता दु ख तिष्ठन्त्यपूर्णमनोरथा। तदपि लिखितप्रख्यैरङ्गैः परस्पर-मुन्मुखा नयननलिनीनालानीतं पिबन्ति रसं प्रिया ॥ अत्रोत्कलिकाबाहुल्येन 'स्मर एव नवो नदीपूर प्रावृषेण्यप्रवाहः सरभसमेव प्रवृद्धत्वात् (ध्व आ. लो.) तेनोढा' अनियन्त्रण

नायकयोरुत्तममध्यमाधमप्रकृतित्वम्। तत्रापि देशकालावस्थाऽऽदिभेदा इत्येकस्यैव रसस्यानन्त्य, का गणना त्वन्येषाम्। असंलक्ष्यक्रमत्व तु सामान्यमाश्रित्य रसादिध्वनिभेद एक एव गण्यते।

वाक्ये द्व्युत्थः—

द्व्युत्थ इति शब्दार्थोभयशक्तिमूलः।

पदेऽप्यन्ये

कृता पुनर्गुरव एव सेतवस्तैर्यद्यपि धृतास्तत्सन्निधौ लज्जावशान्नियन्त्रिता सन्तोऽपूर्णसमागममनोरथा दुःखं तिष्ठन्तीति तदपि प्राणननयन (लक्षण ?)-मात्रजीवितत्वाल्लिखितप्रत्यैरङ्गैरुपलक्षिता अनिवार्यप्रसराभिलाषबलान्नयने एव नलिनीनाले ताभ्या परस्पर प्रेमामृतरस पिबन्त्यास्वादयन्तीति रूपकेनाङ्गत्वेनानुगुण्येन प्रसाधित परस्परदर्शनात्मा सम्भोगशृङ्गार प्रकाशते। एवमन्येऽपि। **उत्तममध्यमाधमप्रकृतित्व**मुत्तममध्यमाधमपात्राश्रय-(71b) त्वम्। शृङ्गार इति नियमादन्यत्र शृङ्गारशब्देन तदाभासो मन्तव्य इत्युक्तमेव। मनुष्यपशुपक्षिप्रभृतीनां नगरग्रामारण्यसलिलादिसमवेतानां परस्परमतितरा भेद इति। **देशभेद** प्रसिद्ध एव। ऋतुभेदादिभ्यो न सलिलादीनामचेतनाना विशेष, चेतनानाश्चौत्सुक्यादय इति **कालभेदः**। बाल्ये नैव प्रमदा शृङ्गारस्य विभाव, यौवने तु विभाव एवेत्येवमादिर**वस्थाभेदः**। विभावानुकल्पे न पुनरनुभावव्यभिचारिणी। प्रकर्षमन्दत्व मध्यत्वाद्यवस्थाजनको देशादिभेद स्थित एव इत्येक एव रस परिसङ्ख्यातु न शक्यते किं पुनरन्य इति। तथाहि हास्यस्यात्मस्थपरस्थभेदवत [प्रत्येकं] पृथक् पृथक् विकाशिनयनं स्मित, किञ्चिल्लक्ष्यदशन हसित, मधुरस्वन विहसित, साङ्गशिरःकम्पनमुपहसित, साश्रुपूर्णाक्षमतिहसितमिति षड् भेदा। [इत्थ] द्वादशभेदस्य (प्रभेदे-) ष्वङ्गनेपथ्यवाक्यभेदेन षट्त्रिंशत्प्रकारता। धर्मोपघातार्थापचयशोकसम्भव करुणस्त्रिधा। अङ्गनेपथ्यवाक्यभेदाद्रौद्रस्त्रिधा। दानधर्मयुद्धभेदाद्वीरस्त्रिप्रकार। व्याजापराधत्राससम्भवो भयानकस्त्रिधा। क्षोभणोद्वेगभेदाद्बीभत्सो द्विधा। दिव्यदर्शनहर्षोद्भवत्वादद्भुतोऽपि द्विभेद। शुभसंस्कारजो देवताऽनुग्रहजश्च (72a) शान्तो द्विविध इति भरतमुनिनोदीरिता ये स्वगता प्रभेदास्तेषा प्रत्येक तदाभासादिभेदा एकचत्वारिंशत्स्थायिसञ्चारिभावानाञ्च स्वरूपभेदाश्चाभासशान्त्यादिभेदाश्च सर्वेषामनन्ता पूर्ववदुत्तमादिरूपस्वाश्रयापेक्षया देशकालावस्थानभेदाद्वि-

'अपि'शब्दाद्वाक्येऽपि। एकावयवस्थितेन भूषणेन कामिनीव पदद्योत्येन व्यङ्ग्येन वाक्यव्यङ्ग्याऽपि भारती भासते (ध्व आ ३।१६ वृ)।

तत्र पदप्रकाश्यत्वे क्रमेणोदाहरणानि—

यस्य मित्राणि मित्राणि शत्रव शत्रवस्तथा।

अनुकम्प्योऽनुकम्प्यश्च स जातः स च जीवति ॥७३॥

अत्र द्वितीय'मित्रा'दिशब्दा आश्वस्तत्वनियन्त्रणीयत्वस्नेहपात्रत्वादि-सङ्क्रमितवाच्या.।

भावानुभावा निरवयव। तेषामन्योन्यमङ्गाङ्गिभावेन सम्बन्धपरिकल्पने क्रियमाणे निरवधित्व स्फुटमित्याह **का गणने**ति[34]। कथ तर्ह्येकरूपतेत्याह—**असंलक्ष्ये**ति।

उभयशक्तिमूलो वाक्य एव सम्भवतीति त विहायान्ये सप्तदश प्रकारा पदवाक्ययोर्ज्ञेया इत्याह **पदेऽप्यन्य** इति। "ननु काव्यविशेषो ध्वनि, काव्यञ्च न पदमात्ररूपमपि तु निराकाङ्क्षप्रतिपत्तिकारि विशिष्टवाक्यप्रभवम्, एवञ्च कथ पदप्रकाश्यत्वं वाक्यविशेषरूपस्य ध्वने"-(र स ३७ पृ) रित्याशङ्का दृष्टान्तमुखेन परिहरति **एकावयवे**ति। तदिह **पदेऽपी**त्याधारसप्तमी सहकारिताऽऽत्मकनिमित्तत्वाभिप्रायेण मन्तव्या।

यस्य मित्राणीत्यादि—अत्र नियमेनानुपयोगात्मिकया बाधया बाधितत्वाद्द्वितीयपद एव लक्षणा, प्रथमे धर्मिण एवाकाङ्क्षितत्वात्। तेन चाश्वस्तादयो ये मित्रादिधर्मा लक्ष्यन्ते

---

34 अयमेव सर्वत्र ध्वनिकाव्यगणने साधीयान् सिद्धान्त स्यात्। ध्वन्यालोके न केवलमसलक्ष्यक्रमव्यङ्ग्यप्रसङ्गेऽपि तु संलक्ष्यक्रमव्यङ्ग्येऽप्ययमेवाश्रित.। दिङ्मात्रेणैव भेदास्तत्रोक्ता, सलक्ष्यक्रमव्यङ्ग्यस्य त्रिविधत्वादतिरिक्ता भेदा 'एको''ऽपर' इत्यादिना विशेषणेन निर्दिष्टा। गुणीभूतव्यङ्ग्यभेदेऽपि स्वल्पतरप्रभेदप्रसरे न भेदगणनातात्पर्यमनुबद्धम्। आनन्दवर्द्धनसमकालिकेन तद्भिन्नदेशवासिना गाणितिकेन महावीराचार्येण 'छन्दोऽलङ्कारकाव्येषु तर्कव्याकरणादिषु। कलास्थानेषु चान्येषु प्रस्तुत गणितं पर'मिति यदभाणि तद्ध्वनिभेदप्रदर्शनपरत्वेऽप्रासङ्गिककल्प सामान्यत प्राचीनालङ्कारिकाणा समयबहिर्भूतं चेति न प्राचीनेष्वप्युद्भटकाव्यालङ्कारव्याख्यातृप्रतीहारेन्दुराजाद्यादृतेषु प्रसज्यते।, इयञ्च गणनाव्यसनिता मम्मटात् प्रागुद्भावितेत्यपि न सशयित सिद्धान्त। परमियमेव भ्रमजालविस्तारिण्यत्यर्वाचीनटीकाग्रन्थेषु धृतान्मार्गात् ग्रन्थोक्तगणनाविसवाद-समयाच्च प्रतीयते।

खलववहारा दीसन्ति दारुणा जहवि तहवि धीराणां।
हिअअवअस्सबहुमआ ण हु ववसाआ विमुज्झन्ति ॥२४॥
(गा स (?) वे ६७८)

अत्र विमुज्झन्तीति ।

लावण्य तदसौ कान्तिस्तद्रूपं स वच क्रमः।
तदा सुधाऽऽस्पदमभूदधुना तु ज्वरो महान् ॥७५॥

अत्र तदादिपदैरनुभवैकगोचरा अर्थाः प्रकाश्यन्ते। यथा वा—

मुग्धे मुग्धतयैव नेतुमखिलः कालः किमारभ्यते
मान धत्स्व धृति बधान ऋजुतां दूरे कुरु प्रेयसि।
सख्यैव प्रतिबोधिता प्रतिवचस्तामाह भीतानना
नीचैः शस हृदि स्थितो हि ननु मे प्राणेश्वरः श्रोष्यति ॥७६॥ (अ श)

अत्र भीताननेत्येतेन हि नीचैः शसनविधानस्य युक्तता गम्यते। भावादीनां पदप्रकाश्यत्वेऽधिक न वैचित्र्यमिति न तदुदाह्रियते।

तेषां सातिशयत्त्वाद्ध्यन्नथत्वम्। **खले**त्यादि-(72b) खलव्यवहारा दृश्यन्ते दारुणा यद्यपि तथापि धीराणाम्। हृदयवयस्यबहुमता न खलु व्यवसाया विमुह्यन्ति ॥ व्यवसायाना-मचेतनाना विमोहनकर्तृत्व योग्यताविरहादनुपपद्यमानमिति **विमुज्झन्ती**ति पदमत्यन्त तिरस्कृतवाच्य सद्धीराणा नित्योद्योगित्वेऽनन्यसामान्यमुत्साहप्रकर्ष प्रकाशयति। यद्यपि विभावादिसयोगाद्रसनिष्पत्तिरित्युक्त बहुशस्तथापि ते विभावादयो यदा विशिष्टेन केनापि पदेनार्प्यमाणे रसचमत्कारकारिणो भवन्ति तदा पदस्यैवासौ महिमेति व्यवह्रियत इत्यभिप्रेत्यालक्ष्यक्रमो रसादिध्वनिर्यं सोऽपि पदे द्योतके भाति प्रकाशत इति। उदाहरति **लावण्य**मित्यादि। समुदायगामिधर्मान्तर **लावण्य** सौन्दर्यमित्यर्थ। **कान्ति**रुज्ज्वलता। पृथकपृथगवयवाश्रित रामणीयक **रूपम्**। तच्छब्दसमानार्थश्चाद शब्द। हृदयनिहितार्थ-स्मरणवशात् प्रत्यक्षभाविता कान्ति कृत्वेयमुक्ति। ये पूर्व लावण्यादयो रतिविभावता-मालम्बन्ते स्म त एव विप्रयुक्ता सन्तो विप्रलम्भमुज्जम्भयन्तीति स्थितम्। **तदि**त्या-दिना सर्वनाम्ना लावण्यादिगततत्कालसुलभसंवेद्याव्यपदेश्यानन्तलोकोत्तररूपतास्मरणोद्दीपना-द्विप्रलम्भ परां काष्ठामानीयत इति तदादिसर्वनामपदाना रसमयत्व सहृदयानां (73a) स्वसंवेदनसिद्ध स्फुटमेवेति। न केवल तदादिसर्वनामपदानामेव रसद्योतकत्व किन्त्वन्येषा-मपीत्युदाहरणान्तर दर्शयति—**यथा वे**ति। **मुग्ध** इत्यादि। **बधान ऋजुता**मिति ऋत्यक (पा ६।१।१२८) इति प्रकृतिभावात। **युक्तते**ति भयस्य कृत्रिमत्वप्रकाशनात्।

रुधिरविसरप्रसाधितकरवालकरालरुचिरभुजपरिघ· ।
झटिति भ्रुकुटिविटङ्कितललाटपट्टो विभासि नृप भीम ॥७७॥

अत्र भीषणीयस्य भीमसेन उपमानम् ।

भुक्तिमुक्तिकृदेकान्तसमादेशनतत्पर: ।
कस्य नानन्दनिस्यन्द विदधाति सदागम· ॥७८॥

काचित् सकेतदायिनमेव मुख्यया वृत्त्या शसति ।

साय स्नानमुपासित मलयजेनाङ्ग समालेपित
यातोऽस्ताचलमौलिमम्बरमणिर्विस्रब्धमत्रागति· ।
आश्चर्य तव सौकुमार्यमभित· क्लान्ताऽसि येनाधुना
नेत्रद्वन्द्वममीलनव्यतिकर शक्नोति ते नासितुम् ॥७९॥

अत्र वस्तुना कृतपरपुरुषपरिचया क्लान्ताऽसीति वस्तु 'अधुना पदद्योत्य व्यज्यते ।

तदप्राप्तिमहादु खविलीनाशेषपातका ।
तच्चिन्ताविपुलाह्लादक्षीणपुण्यचया तथा ॥८०॥[35]

शब्दशक्तिमूलो द्विविध । तद्यथा **रुधिरे**त्यादि—**करालो** भयानकः । **रुचिरो** दीप्त । **भीम**पदोपस्थापितयो प्राकरणिकाप्राकरणिकयोरुपमानोपमेयभाव कल्प्यत इति शब्दशक्तिमूलानुरणनरूपव्यङ्ग्योपमाऽलङ्कार । **अत्र भीषणीयस्ये**ति—कातरत्रासदायिन । **भुक्ति**रित्यादि । **भुक्ति** कान्तोपभोगोऽपि । **मुक्ति**रुद्वेगदव्यापारादपि । **एकान्त** सकेतस्थानमपि । **सत·** सुन्दरस्या**गम** [आगमन] शोभन आगमश्च । **मुख्यया वृत्त्ये**ति—प्रकरणनियन्त्रिताया अभिधाया एव व्यञ्जनव्यापारेणान्मुद्रणादनयोश्चार्थयोर्वैसादृश्यान्नोपमानोपमेयभाव । अथार्थशक्त्युद्भव स्वत सम्भविप्रभृतिभेदेन द्वादशप्रकार पदप्रकाश्यो यथा—**साय**मित्यादि । **अभितो** बहिरन्तश्च । **व्यतिकरः** सम्भेदः । **अमीलनव्यतिकर** स्पष्टम् । वक्तृप्रतिपाद्यसचिवे**नाधुना**पदार्थेन प्रागनुभूतावस्थावैलक्षण्यादुक्तरूप वस्तु द्योत्यते । स्वत सम्भवित्व चास्य प्राग्वदेव । (73b) **तदप्राप्ती**त्यादि **तदित्यनेन** कृष्णस्य परामर्श । अत्र परमेश्वरवियोगज दु ख तदनुध्यानज सुखञ्च जन्मसहस्रोपभोग्यदुष्कृतसुकृतफलत्वेन सहाभेदेनाध्यवसितमित्य**शेषचय**पदाभ्या द्वे अतिशयोक्ती व्यज्येते ।

---

35 अयमेव प्रकृत पाठ· । क्वचिन्मुद्रितविष्णुपुराणेऽग्रिमस्य श्लोकस्यार्धयोरयथा व्यत्यासो दृश्यते ।

चिन्तयन्ती जगत्सूति परब्रह्मस्वरूपिणम्।
निरुच्छ्वासतया मुक्तिं गताऽन्या गोपकन्यका ॥८१॥

(वि पु ५।१३।२१, २२)

अत्र जन्मसहस्रैरुपभोक्तव्यानि दुष्कृतसुकृतफलानि वियोगदुःखचिन्तनाह्लादाभ्यामनुभूतानीत्युक्तम्। एवं च'अशेष' 'चय'पदद्योत्ये अतिशयोक्ती।

क्षणदाऽसावक्षणदा वनमवन व्यसनमव्यसनम्।
बत वीर तव द्विषतां पराङ्मुखे त्वयि पराङ्मुख सर्वम्॥८२॥

अत्र शब्दशक्तिमूलविरोधाङ्गेनार्थान्तरन्यासेन विधिरपि त्वामनुवर्तत इति 'सर्वे'पदद्योत्यं वस्तु।

तुह वल्लहस्स गोसम्मि आसि अहरो मिलाणकमलदलो।
इअ णवबहुआ सोऊण कुणइ वअण महिसमुहं ॥८३॥

(गा स (?) वे ६६८)

अत्र रूपकेण त्वयाऽस्य मुहुर्मुहु: परिचुम्बन तथा कृत येन म्लानत्वमिति मिलाणा दिपदद्योत्य काव्यलिङ्गम्। एषु स्वत सम्भवी व्यञ्जकः।

राईसु चंदधवलासु ललिअमाप्फालिऊण जो चाब।
एकच्छत्त विअ कुणइ भुअणरज्जं विजमतो ॥८४॥

(गा स (?) वे ६६२)

क्षणदेत्यादि—क्षणदा रात्रि:, **अक्षणो**ऽनुत्सव। यदिवाऽक्षणदाऽनवकाशदा। **अवन** रक्षणहेतु। अवीना मेषाणामसन चारण**मव्यसनम्**। क्षणदा कथमक्षणदेति शब्दशक्तिमूलो विरोधालङ्कार। अयञ्च **पराङ्मुखे त्वयी**त्यादिनोपपादितस्यार्थान्तरन्यासस्या[ङ्गम्]। '**तुहे**'-त्यादि—तव वल्लभस्य गोसम्मि प्रभाते आसीदधरो म्लानकमलदलम्। इति नववधू श्रुत्वा करोति वदन महीसम्मुखम् ॥ महीसम्मुखमवनत लज्जयेत्यर्थ। अत्राधरस्य म्लानकमलदलत्वेन रूपणं, तेनानवरतपरिचुम्बनं प्रतीयते। तत्र **मिलाणादिपदे**ति [पदद्योत्य] काव्यलिङ्ग व्यञ्जकस्य हेतोरनेकपदार्थता। कविप्रौढोक्तिनिष्पन्नशरीरो यथा **राईस्वि**त्यादि—रात्रिषु चन्द्रधवलासु ललितमास्फाल्य यश्चापम्। एकच्छत्रमिव करोति भुवनराज्य विजृम्भमाण ॥

अत्र वस्तुना येषां कामिनामसौ राजा स्मरस्तेभ्यो न कश्चिदपि तदादेशपराङ्मुख इति जाग्रद्भिरुपभोगपरैरेव तैर्निशाऽतिवाह्यत इति 'भुअणरज्ज'पदद्योत्य वस्तु प्रकाश्यते ।

निशितशरधियाऽर्पयत्यनङ्गो दृशि सुदृश. स्वबल वयस्यराले ।

दिशि निपतति यत्र सा च तत्र व्यतिकरमेत्य समुन्मिषन्त्यवस्थाः ॥८५

अत्र वस्तुना युगपदवस्थाः परस्परविरुद्धा अपि प्रभवन्तीति 'व्यतिकर'-पदद्योत्यो विरोध. ।

वारिज्जतो वि पुणो सदावकदत्थिएण हिअएण ।

थणहरवअस्सएण विसुद्धजाई ण चलइ से हारो ॥८६॥

(गा स (?) वे ६६४)

अत्र विशुद्धजातित्वलक्षणहेत्वलङ्कारेण हारोऽनवरत कम्पमान एवास्ते इति 'ण चलइ पदद्योत्य वस्तु ।

सो मुद्धसामल गो धम्मिल्लो कलिअललिअणिअदेहो ।

तीए खधाहि बलं गहिअ सरो सुरअसगरे जअइ ॥८७॥

(वि बा ली गा स (?) व ६६८)

अत्र रूपकेण मुहुर्मुहुराकर्षणेन तथा केशपाश. स्कन्धयो. प्राप्तो यथा रतिविरतावप्यनिवृत्ताभिलाष. कामुकोऽभूदिति 'खधाहि'पदद्योत्या विभावना । एषु कविप्रौढोक्तिमात्रनिष्पन्नशरीर. ।

तेभ्य इति 'पञ्चमी विभक्त' (पा. २।३।४२) इति निधारणे पञ्चमी तेषां मध्य इत्यर्थ । **उपभोगपरैरेवे**त्यवधारणेन रतश्रमशयनस्यापि प्रवास-(74a) प्रायविश्लेषात्मकता । आज्ञाप्रधान राज्ञ कर्म राज्यम्, तेन भुवनराज्यपदस्य द्योतकता । **निशिते**त्यादि—**अराले** वक्रे **वयसि** तारुण्यरूपे । **सेति** दृक् । **व्यतिकरं** मिश्रीभाव**मेत्य** । **अवस्था** अभिलाषचिन्तनाद्या. । **वारिज्जन्तो वी**त्यादि—वार्यमाणोऽपि पुन सन्तापकदर्थितेन हृदयेन । स्तनभरवयस्येन विशुद्धजातिर्न चलत्यस्या हारः ॥ विशुद्धाभिजना हि परार्थे जीवितमपि त्यजन्ति न पुन. स्वधर्माच्चलन्तीति । **सो मुद्धे**त्यादि—स मुग्धश्यामलाङ्गो धम्मिल्लकलितललितनिजदेह. । तस्या स्कन्धेन बल लब्ध्वा स्मर सुरतसङ्गरे जयति ॥

णवपुण्णिमामिअङ्कस्स सुहअ को त्त सि भणसु मह सच्च ।
का सोहग्गसमग्गा पओसरअणि व्व तुह अज्ज ॥८८॥ (गा स (१) वे ६८६)

अत्र वस्तुना मयीवान्यस्यामपि प्रथममनुरक्तस्त्वं न तत इति 'णवे' त्यादि-'पओसे'त्यादिपदद्योत्य वस्तु व्यज्यते ।

सहि णवणिहुवणसमरम्मि अङ्कबालीसहीए णिबिडाए ।
हारो णिवारिओ विअ उच्छेरन्तो तदो कह रमिअ ॥८९॥

(गा स (१) वे ६६६)

अत्र वस्तुना हारच्छेदानन्तरमन्यदेव रतमवश्यमभूत्, तत् कथय कीदृगिति व्यतिरेकः 'कह' पदगम्यः ।

पविसती घरवार[36] विवलिअवअणा विलोइऊण पहं ।
खंधे घेत्तूण घड हा हा णट्ठोत्ति रुअसि सहि किन्ति ॥९०॥ (गा स वे ६६८)

अत्र हेत्वलङ्कारेण सकेतनिकेतन गच्छन्त दृष्ट्वा यदि तत्र गन्तुमिच्छसि तदाऽपर घट गृहीत्वा गच्छेति वस्तु 'किन्ति'पदद्योत्यम् । यथा वा—

विहलखल तुम सहि दट्ठूण कुडेण तरलतरदिट्ठि ।
वारप्फसमिसेण अ अप्पा गुरुओत्ति पाडिअ विहिण्णो ॥९१॥

(गा स वे ८८०)

धम्मिल्लः सयत केशपाश, स एव स्मर इति रूपकम् । **णवे**त्यादि—नवपूर्णिमामृगाङ्कस्य सुभग कस्त्वमसि भण मम सत्यम् । का सौभाग्यसमग्रा प्रदोषरजनीव तवाद्य ॥ **नव**-पदेन तरलत्व, **पूर्णिमा**पदेन नायिकाऽन्तरससर्ग, **मृगाङ्कपदे**न ख्यात धृत (धृत) कलङ्कत्वं, **प्रदोष**पदेन प्रकृष्टदोषत्वमपि, **रजनी**पदेन रागित्वमपि । **सही**त्यादि—सखि निधुवन समरे अङ्कपालीसख्या निबिडया । हारो निवारित एवोच्छ्रीयमाणस्तत कथ रमितम् ॥ अङ्कपाली आलिङ्गन सैव सखी । निबिडा घनाऽनुरक्ता च । उच्छ्रीयमाणोऽधिकीभवन् । (74b) यथाऽय नवोढाया सुरतसङ्गरस्तथा प्रौढयुवतिभिरस्माभिरप्यननुभूतपूर्व इति व्यतिरेक । **विहलं** इत्यादि—विश्रृङ्खला तां सखि दृष्ट्वा कुटेन तरलतरदृष्टिम् । द्वार-स्पर्शमिषेण चात्मा गुरुक इति पातयित्वा भिन्न ॥ कुटो घट, मिषशब्देन चछलपर्यायेण

---

36 'घरदार' इति वेवर-सम्पादिते गा. स पुस्तके पाठः । गाथेय श्रीधरधृते मूले नास्तीति प्रतिभाति ।

अत्र नदीकूले लतागहने कृतसङ्केतमप्राप्त गृहप्रवेशावसरे पश्चादागत दृष्ट्वा पुनर्नदीगमनाय द्वारोपघातव्याजेन बुद्धिपूर्वं व्याकुलतया त्वया घटः स्फोटित इति मया चिन्तित तत् किमिति नाश्वसिषि, तत्समीहितसिद्धये व्रज, अह ते श्वश्रूनिकटे सर्वं समर्थयिष्य इति द्वारस्पर्शनव्याजेनेत्यपह्नुत्या वस्तु ।

जोह्लाइ महुरसेण अ विइण्णतारुण्णउस्सुअमणा[37] सा ।

वुड्ढा वि णवोढव्विअ परवहुआ अहह हरइ तुह हिअअ । ९२॥

(गा स (?) वे ६८४)

अत्र काव्यलिङ्गेन वृद्धां परवधूं त्वमस्मानुज्झित्वाऽभिलषसीति त्वदीयमाचरित वक्तु न शक्यमित्याक्षेपः 'परवहुआ'पदप्रकाश्य'। एषु कविनिबद्धवक्तृप्रौढोक्तिमात्रनिष्पन्नशरीरः। वाक्यप्रकाश्ये तु पूर्वमुदाहृतम्। शब्दार्थोभयशक्त्युद्भवस्तु पदप्रकाश्यो न भवतीति पञ्चत्रिंशद्भेदाः ।

प्रबन्धेऽप्यर्थशक्तिभू ॥४२॥

यथा गृध्रगोमायुसवादादौ—

अल स्थित्वा श्मशानेऽस्मिन् गृध्रगोमायुसकुले ।

कङ्कालबहुले घोरे सर्वप्राणिभयङ्करे ।।९३॥

न चेह जीवितः कश्चित् कालधर्ममुपागत ।

प्रियो वा यदि वा द्वेष्यः प्राणिनां गतिरीदृशी ॥९४॥

(म भा. आ प १५३ अ)

सत्यत्वप्रतिपादनादपह्नवनिर्देश इत्यपह्नुतिरलङ्कार । **जोह्लाइ** इत्यादि—ज्योत्स्नया मधुरसेन च वितीर्णतारुण्योत्सुकमना सा । वृद्धाऽपि नवोढेव परवधूरहह हरति तव हृदयम् ॥ मधुरसो वसन्तानुरागो मदिरा वा, वृद्धत्वेनासम्भाव्यमानसम्भोगत्वादिक, ततो वृद्धा नवोढायत इत्यत्र ज्योत्स्नाऽऽदिरूपो हेतुरिति काव्यलिङ्ग विवक्षितस्य चाशक्यत्ववचनोयख्यापनाय कथितसमागमविषयो निषेध प्रतीयमान इत्याक्षेप । तदित्थं पदप्रकाशिता सप्तदश, वाक्यप्रकाशितास्त्वष्टादश दर्शिता एवेति पञ्चत्रिंशद्भेदा ।

अथार्थशक्तिमूला ये द्वादश ते महावाक्येऽपि विलोक्यन्त इत्याह **प्रबन्धेऽपीति**। प्रबन्धो रामायणमहाभारतादि । तत्र महाभारते यथा **अलं स्थित्वेत्यादि**। 'एतेन संसारमोहान्धतमसमग्नलोकसमुत्तरणवैराग्यबीजोत्पादनैकरसिकस्य कृष्णद्वैपायनमुनेरप्यय-

37 तारुण्णउस्सुअ इति सन्ध्यभावो प्रकृते सोढव्य ।

इति दिवा प्रभवतो गृध्रस्य पुरुषविसर्जनपरमिदं वचनम्।

आदित्योऽयं स्थितो मूढाः स्नेहं कुरुत साम्प्रतम्।
बहुविघ्नो मुहूर्तोऽयं जीवेदपि कदाचन ॥९५॥
अमुं कनकवर्णाभं बालमप्राप्तयौवनम्।
गृध्रवाक्यात् कथं मूढास्त्यजध्वमविशङ्किताः ॥९६॥

(म भा आ प १५३ अ)

इति निशि विजृम्भमाणस्य गोमायोर्जनव्यावर्तननिष्ठं च वचनमिति प्रबन्ध एव प्रथते। अन्ये त्वेकादश भेदा ग्रन्थविस्तरभयान्नोदाहृताः, स्वयं तु लक्ष्य[38]तोऽनुसर्तव्याः। अपि शब्दात् पदवाक्ययोः।

मर्थोऽनुमतो न तु ध्वनिकृत स्वमतिविकल्पनमात्र-(ध्व आ ३।१५ वृ)[39] मत्र प्रमाणमिति दर्शयति। **कालधर्मो** मरणम्। 'गृध्रस्य शवशरीरभक्षणार्थिनः शङ्कितप्रत्युज्जीवितप्रत्याशया शवशरीरानुरोधिपुरुषप्रतिमोचनपरमिदं वाक्यं जम्बुकस्यापि निशोदयावधि तिष्ठन्त्वेते ततोऽहं गृध्रादपहृत्य भक्षयिष्यामीत्यभिप्रायवत्। **आदित्यो**ऽयमित्यादिना व्य[ञ्जकेन] स्वतः सम्भविना चास्य प्रागवदेव। अयञ्चाभिप्रायोऽर्थशक्त्या व्यज्यमानः शान्तरस एव परिनिष्ठा

---

38 अत्र 'लक्षणात्' इति मुद्रितपुस्तके पाठः।

39 'मनस्तु साधुध्वनिभिः पदे पदे हरन्ति सन्तो मणिनूपुरा इवे'त्यादि द्व्यर्थक-वचनातिक्रान्तत्वं ध्वनेर्वस्तुतः सन्दर्भमयेष्वेव गरीयसी स्थितिरिति दर्शयितु मानन्दवर्धनेन रामायणमहाभारतप्रभृतिनि लक्ष्ये ध्वनेः प्रसिद्धव्यवहारं लक्षयता प्रबन्धे तस्य च वैशिष्ट्यं दर्शयता गृध्रगोमायुसंवाद उदाहरणतयोपन्यस्तः। लोचनकृता च स्वविवरणे प्रसक्तानां श्लोकानामत्र दर्शितानामभिप्रायव्यक्तिर्मुख्यतो वर्णितः प्रभृति प्रबन्धपर्यन्ते रसादिध्वनेः प्रतिष्ठया साधु साधिता। तत्त्वोप-देशपराणां मुनिवर्याणामप्यत्र तात्पर्यं का कथा कान्तासम्मिततया प्रीतिं वितरतां कवीनामित्याकूतम्। प्रबन्धैकदेशे तस्य भूयान् प्रकाश इति टीकाकृतो-दाहरणावलिः संगृहीता। 'समयुज्यत भूपतिः युवे'त्यादिदर्शितस्य रघुश्लोकस्या-न्यथा पाठोऽस्माकं परिचितः। स त्वेवम्—अजिताधिगमाय मन्त्रिभिर्युयुजे नीतिविशारदैरजः इत्यादि।

प्राप्नोति।' (ध्व आ लो १५२ पृ) 'महाभारते हि शान्तस्यैवाङ्गित्वमितरेषा रसानामङ्गत्वमेव, यथा रामायणे करुणस्य प्राधान्यमन्येषान्तु गुणत्वम्' (ध्व आ ४।५ वृ) **अन्ये त्विति—** तद्यथा मालतीमाधवे पञ्चमेऽङ्केऽन्योन्यदर्शनानन्तर मालतीमाधवयोरुक्तिप्रत्युक्तिचेष्टाप्रबन्धो मालत्या पित्रोरसम्मत्या स्वदानस्यावश्यकरणीयतामभिव्यनक्ति। यथा तत्रैव तृतीयेऽङ्के लवङ्गिका प्रति कामन्दक्या उक्ता 'अयि सरले किमत्र भगवत्या शक्यम् ? प्रभवति प्राय कुमारीणा जनयिता दैवञ्च। यच्च किल कौशिकी शकुन्तला दुष्यन्तमप्सरा पुरूरवस चकम इत्याख्यानविद आचक्षते वासवदत्ता च सृञ्जयाय पित्रा दत्तमप्यात्मानमुदयनाय प्रायच्छदित्यादि तदपि साहसाभासमित्यनुपदेष्टव्यकल्पमित्यनाशास्यम्' इति। (75b) अत्राप्यनुपदेश्यताव्याजेनोपदेश्यत्वमेव 'कल्प'पदेन[40] द्योत्यते। न चोपमा प्रतीयते। यथा च **मधुमथनविजया**ख्यायां खण्डकथायां सन्दानितकविशेषकादिषु। तत्र सन्दानितके यथा जाणती सा विअडमङ्गिवेभ(?) सिदूरमल्लिआ होंति। वलपीडिअकुमुद्दतरुहिरभरिअव्वसअम्बरहर ॥ किं अएण ताण विदाणराण(?) णिच्चलबालवलआसु। बद्धफलव्व दीसइ जस्स जसो समरसीमासु ॥ अत्र 'बद्धफलव्व' इत्युत्प्रेक्षया रुक्मिणीहरण-(पाणि ?) लाभे निष्प्रतिबन्धता भगवतो द्योत्यते।[41] एवं विशेषक कलापक-कुलकादिष्वपि द्रष्टव्यम्। रघुकारकृतौ रघुराघवयोर्वर्णने (८।१६) 'समयुज्यत भूपतिर्युवा सचिवैर्नीतिविशारदैरज। अनपायिपदोपलब्धये रघुराप्तै समितो विनेतृभि' ॥ [इत्यादिना] 'इति शत्रुषु चेन्द्रियेषु च प्रतिबद्धप्रसरेषु जाग्रतौ। प्रमितावुदयापवर्गयोरुभयी सिद्धिमुभाववापतु ॥' (८।२३) इत्यन्तेन तुल्ययोगितया काव्यलिङ्गेन वा व्यतिरिक्त (रेक ?) प्रकाश्यते। एवञ्च नाटकादिषु विष्कम्भ[क]-प्रस्तावनादिषूक्तिप्रत्युक्तिप्रबन्धेषून्नेयमिति। तदित्थमर्थशक्तिमूलध्वनेरितरप्रकारोदाहरणानि शिक्षितलक्षणाना लक्ष्योदीक्षणे नानाप्रबन्धेषु स्वयमेवाविर्भविष्यन्तीत्यतो ग्रन्थकृता न प्रपञ्चितानि।

---

40 'कल्प'पदेनेति शिथिलमभिधान कल्प(प्) प्रत्ययेनेत्यर्थे। अत्र विपरीतलक्षणागर्भव्यञ्जनया विवक्षितार्थप्रतीति ।

41 मधुमथनविजयपरिकथा ध्वन्यालोके तदुपरि लोचने च परामृष्टा (पृ १४२) हेमचन्द्रेण च काव्यानुशासने तद्विवेके चानूदिता। 'द्वाभ्या क्रियासमाप्तौ सन्दानितकम्। बहूना छन्दसामेकवाक्यत्वे तद्वाक्यानाञ्च समूहावस्थाने परिकथे'ति रुद्रटव्याख्याने नमिसाधु। श्रीधरोद्दिष्टमुदाहरणन्तु लोचनकृद्धेमचन्द्रोद्धृताभ्यामुदाहरणाभ्यां भिन्नम्। अत्र तु प्रथमपद्ये पूर्वार्धे द्वितीयपद्ये पूर्वपादे च पाठविपर्यासो जात। स च लिपिकरानवधानताकृत।

पदैकदेशरचनावर्णेष्वपि रसादयः ।

तत्र प्रकृत्या यथा—

रइकेलिहिअणिअसणकरकिसलअरुद्धणअणजुअलस्स ।
रुद्दस्स तइअणअण पव्वईपरिचुम्बिअ जअइ ॥९७॥

(गा स ५।५३, व ल ६०७)

अत्र 'जयती'ति न तु शोभत इत्यादि। समानेऽपि हि स्थगनव्यापारे लोकोत्तरेणैव व्यापारेणास्य पिधानमिति तदेवोत्कृष्टम्। यथा वा—

प्रेयान् सोऽयमपाकृतः सशपथ पादानतः कान्तया
द्वित्राण्येव पदानि वासभवनाद्यावन्न यात्युन्मनाः।
तावत् प्रत्युत पाणिसपुटगलन्नीवीनिबन्ध धृता
धावित्वेव कृतप्रणामकमहो प्रेम्णो विचित्रा गतिः ॥९८॥

(का अ सू वृ ३।२।१५)

अत्र 'पदानी'ति, न तु द्वाराणीति ।

तिङ्सुपोर्यथा—पथि पथि शुकचञ्चूचारुराभाऽङ्कुराणां
दिशि दिशि पवमानो वीरुधां लासकश्च ।

(76a) वाचकत्व ध्वनिव्यवहारे न प्रयोजक व्यञ्जकत्वेन व्यवस्थापनादिति पदैकदेशभूतैरपि विशिष्टविभावादिवाच्यार्थसामर्थ्यप्रकाश्याना रसादीना प्रकाशनमित्याह **पदैकदेशेति**।[42] अयञ्च प्रकृतिप्रत्ययात्मकत्वेन द्विधा। तत्र धातु प्रातिपदिकश्चेति प्रकृतिरपि द्विधैव। तिङ्सुप्प्रभृतयश्च प्रत्ययभेदा। तत्र तिङ्कृत व्यञ्जकत्व यथा **रइ** इत्यादि। रतिकेलिहृतनिवसनकरकिशलयरुद्धनयनयुगलस्य। रुद्रस्य तृतीयनयन पार्वतीपरिचुम्बित जयति॥ अत्र शोभते राजत इत्यादिक्रियापदान्तरतिरस्कारेण जयतेरेव प्रयोग पिधानान्तरातिशयादिना चुम्बनस्य लोकोत्तरप्रकर्ष शृङ्गारजीवितभूतं व्यनक्ति। प्रकृतेर्यथा **प्रेयानि**तीयसुना प्रियत्वमात्रनिरासपरेण काऽपि प्रेमपात्रता द्योत्यते। प्रत्ययस्य यथा—**पथि पथीत्यादि**। **पवमा**नो वात, **लासको** नर्तक.। **किरती**ति कर्तरि

42 अत्र च सरस्वतीतीर्थकृतबालानुरञ्जन्या प्रकृतिप्रत्ययसम्बन्धकालवचनपुरुषवाक्यगतपूर्वनिपातविशेषणविभक्तितद्धितोपसर्गनिपातसर्वनामप्रातिपदिकाव्ययीभावकर्मभूताधारादिविशेषा रचनेति सारसग्रह ।

नरि नरि किरति द्राक् सायकान् पुष्पधन्वा
पुरि पुरि विनिवृत्ता मानिनीमानचर्चा ॥९९॥

अत्र 'किरती'ति किरणस्य साध्यमानत्व 'निवृत्ते'ति निवर्तनस्य सिद्धत्व तिङा सुपा च तत्रापि 'क्त' प्रत्ययेनातीतत्व द्योत्यते। यथा वा—

लिखन्नास्ते भूमि बहिरवनतः प्राणदयितः
निराहाराः सख्यः सततमरुणोच्छूननयनाः।[43]
परित्यक्त सर्वं हसितपठित पञ्जरशुकै-
स्तवावस्था चेय विसृज कठिने मानमधुना ॥१००॥ (अ श)

अत्र 'लिखन्नि'ति न तु लिखतीति, तथा 'आस्ते इति न त्वासित इत्यपि तु प्रसादपर्यन्तमास्त इति, 'भूमि'मिति न तु भूमाविति न हि बुद्धिपूर्वकमपर किञ्चिल्लिखतीति तिङ्सुब्विभक्तीनां व्यङ्ग्यम्। सम्बन्धस्य यथा—

गामारुहम्मि[44] गामे वसामि णअरट्ठिइ ण जाणामि।
णाअरिआण पइणो हरेमि जा होमि सा होमि ॥१०१॥
(गा स वे ७०५)

प्रत्यय इति (76b) साध्यमानत्व न वाच्य किन्तु द्योत्यम्। एव प्रातिपदिकार्थमात्रविहितया प्रथमया तद्गत सिद्धत्व द्योत्यते। निष्ठाप्रत्ययस्य कर्त्रादिक वाच्यमिति धात्वर्थगतमतीतत्वं व्यङ्ग्यम्। **लिखन्नि**त्यादि—**अरुण** दग्धपद्म घोरवटिकाविकाश (निकाशम् ?) **उच्छूननयनाः** कठिन-कठोरहृदयतया निरस्तान्यानुरोधा इत्यर्थः।—**लिखन्नास्त** इति लिखनस्योपलक्षणीभावाद-वस्थिता (तया) क(कस्या)न्यपारतन्त्रच प्रतीयते। दुस्थावस्थे चेतसि बुद्धय समुन्मिषन्तीति तन्मयीभावेन विगलितसकलकरणपाटवस्य सतताभ्यस्तविद्याऽननुस्मरणमनुरागोद्रेकसूचकम्। **गामरुहम्मी**त्यादि—ग्रामरुहाऽस्मि ग्रामे वसामि नगरस्थिति न जानामि। नागरिकाणा पतीन् हरामि या भवामि सा भवामि ॥ ग्रामरुहाऽत्यन्तग्रामजाता। या भवामि सा भवामीत्यभिजनादावनादरेण सौभाग्यगर्वाभिमानादिकम्। षष्ठ्याऽनादरो द्योत्यते, ता अनादृत्य हरामीत्यर्थः। हरणश्च नादानमात्र किन्त्वाह्लादप्रवणाकिङ्करतापरम्।

---

43 'रुदितोच्छूने'ति प्रायिक पाठ।

44 'गामारि अम्मि'इति वेवरसम्पादिते गा स पुस्तके पाठान्तरम्। स च पाठ सरस्वतीतीर्थादिभिर्धृतो विवृतश्च।

अत्र 'णाअरिआणा'मिति षष्ठ्याः।

"रमणीयः क्षत्रियकुमार आसीत्" (१०२) (म वी च २।३१ अ गद्य) इति कालस्य। एषा हि भग्नमहेश्वरकार्मुकं दाशरथिं प्रति कुपितस्य भार्गवस्योक्तिः। वचनस्य यथा—

तार्णं गुणग्गहणाण ताणमुक्कठाण तस्स पेम्मस्स।
तार्णं भणिआणं सुंदर एरिसिअं जाअमवसाणं॥१०३॥

(गा. स वे ६४०)

अत्र गुणग्रहणादीनां बहुत्वं प्रेम्णश्चैकत्वं द्योत्यते। पुरुषव्यत्ययस्य यथा—

रे रे चञ्चललोचनाञ्चितरुचे चेतः प्रमुच्य स्थिर-
प्रेमाणं महिमानमेणनयनामालोक्य किं नृत्यसि।
किं मन्ये विहरिष्यसे बत हतां मुञ्चान्तराशामिमा-
मेषा कण्ठतटे कृता खलु शिला संसारवारानिधौ॥१०४॥

अत्र प्रहासः। पूर्वनिपातस्य यथा—

येषां दोर्बलमेव दुर्बलतया ते सम्मतास्तैरपि
प्रायः केवलनीतिरीतिशरणैः कार्यं किमुर्वीश्वरैः।
ये क्ष्माशक्र पुनः पराक्रमनयस्वीकारकान्तक्रमा-
स्ते स्युर्नैव भवादृशास्त्रिजगति द्वित्राः पवित्राः परम्॥१०५॥

अत्र पराक्रमस्य प्राधान्यमवगम्यते। विभक्तिविशेषस्य यथा—

रमणीय इत्यादि—अत्र वर्तमान एव क्षत्रियकुमार, आसीदित्यस्मिन् पदे लङ्प्रत्ययप्रकाशितो भूतकालस्तस्मिन्नमर्षं प्रकाशयति। **ताण**मित्यादि—तेषां गुणग्रहणानां तासामुत्कण्ठानां तस्य प्रेम्णः। तेषां भणितानां सुन्दर ईदृशमीषितं[45] वा ज्ञात (जात)मवसानम्॥ (77a) बहुवचनेन गुणग्रहणादीनामनवधिकत्वं, प्रेम्ण इत्येकवचनेनोभयचित्तवृत्तेरेकीभावः। **रे रे चञ्चले**त्यादि। **अत्र प्रहास** इति—'प्रहासे च मन्योपपदे मन्यतेरुत्तम एकवचन'मिति (पा १।४।१०६) मन्योपपदे

---

45 अत्रान्तिरीर्षेति कोष। अन्याऽऽसक्ताय नायकाय स्वकोयगुणानुरागादीन् प्रत्यत्रान्तिनिदानेय तत्कृताऽवज्ञाऽऽशसेति भाग्यविपर्ययसूचिका खेदोक्तिर्नायिकाया, अत ईर्षितमित्यनवद्यमेव।

प्रधनाध्वनि धीरधनुर्ध्वनिभृति विधुरैरयोधि तव दिवसम् ।
दिवसेन तु नरप भवानयुद्ध विधिसिद्धसाधुवादपदम् ॥१०६॥

अत्र 'दिवसेने'त्यपवर्गतृतीया फलप्राप्तिं द्योतयति ।

भूयो भूयः सविधनगरीरथ्यया पर्यटन्त
दृष्ट्वा दृष्ट्वा भवनवलभीतुङ्गवातायनस्था ।
साक्षात् कामं नवमिव रतिर्मालती माधवं यत्
गाढोत्कण्ठाललितलुलितै[46]रङ्गकैस्ताम्यतीति । १०७॥

(मा मा १।१५)

अत्रानुकम्पावृत्तेः 'क'रूपतद्धितस्य ।

परिच्छेदातीतः सकलवचनानामविषय.
पुनर्जन्मन्यस्मिन्ननुभवपथ यो न गतवान् ।
विवेकप्रध्वसादुपचितमहामोहगहनो
विकार. कोऽप्यन्तर्जडयति च ताप च कुरुते ॥१०८॥

(मा मा १।३०)

मध्यम पुरुषो मन्यतेश्चोत्तम । कि मन्यसे विहरिष्यामीत्यर्थ । **येषा**मित्यादि— अल्पाच्तरत्वान्नयस्य पूर्वनिपाते प्राप्ते **'पराक्रम'**स्य पूर्वनिपातोऽभ्यर्हिततताहेतुक इति तस्य प्राधान्यम् । **प्रधने**त्यादि—प्रधनं सग्राम. । फलप्राप्तौ सत्या क्रियापरिसमाप्तिर**पवर्गः** । **भूयो भूय** इत्यादि—**सविधनगरीरथ्या** भूरिरसुमन्दिरासन्नमार्ग । **साक्षा**दित्यनङ्गरूप-परिहारेण, **नव**मिति पार्वतीसमाराधितपरमेश्वरप्रसादादाहानन्तरमेव समुत्पन्नम् । गद्योप-क्रमत्वादस्य शोकस्य (श्लोकस्य) गद्यशेषस्थ [स्थेन] **'यदि'**ति पद सम्बध्यते , तेन **ललितै** सुन्दरैर्**लुलितैः** साहजिकमवष्टम्भमपहाय म्लानकान्तिकैरेभिरङ्गकैरुपलक्षिता सत्यभिखिद्यत इति यल्लवङ्गिकयैव निवेदितमिति तत्र योजना । **अङ्गकै**रित्यनुकम्पावृत्तिना तद्धित'क'-प्रत्ययेनाभिलाषविप्रलम्भप्रभवमङ्गाना रामणीयकानुबन्धि किमपि शोच्यत्वं द्योत्यते । यद्यपि प्रागप्रयोगात् स्वतन्त्रप्रयोगाभावात् षष्ठ्या अश्रुतेर्लिङ्गसख्याविरहाच्च वाचक-वैलक्षण्येन द्योतका निपाता (77b) इति प्रादिनिपाताना द्योतकत्वं वैयाकरणादिमते व्यवस्थितमेव तथापीह व्यङ्ग्यरसापेक्षया तेषा व्यञ्जकत्व दर्शयन्नुदाहरति **परिच्छेदातीत**

---

46 'लुलितलुलितै'रिति प्रायश परिगृहीत. पाठ ।

अत्र 'प्र'शब्दस्योपसर्गस्य ।

कृतञ्च गर्वाभिमुखं मनस्त्वया किमन्यदेव निहताश्च नो द्विषः ।
तमांसि तिष्ठन्ति हि तावदंशुमान् न यावदायात्युदयाद्रिमौलिताम् ॥१०९॥

अत्र तुल्ययोगिताद्योतकस्य 'च' इति निपातस्य ।

रामोऽसौ भुवनेषु विक्रमगुणैः प्राप्तः प्रसिद्धिं परा-
मस्मद्भाग्यविपर्ययाद्यदि परं देवो न जानाति तम् ।
वन्दीवैष यशांसि गायति मरुद्यस्यैकबाणाहति-
श्रेणीभूतविशालतालविवरोद्गीर्णैः स्वरैः सप्तभिः ॥११०॥

(रा अ १)

अत्रासाविति भुवनेष्विति गुणैरिति सर्वनाम-प्रातिपदिकवचनानां न त्वदिति, न मदिति अपि त्वस्मदित्यस्य सर्वाक्षेपिणः, भाग्यविपर्ययादित्यन्यथा-संपत्तिमुखेन न स्वभावमुखेनाभिधानस्य ।

इत्यादि—मनसेयत्तया परिच्छेत्तुमशक्य । **सकले**त्यादिनाऽभिव्यक्तुमशक्यतोक्ता । तेन 'यतो वाचो निवर्तन्ते अप्राप्य मनसा सहे'ति (तै उ २व ।४,६) दर्शितमिति **मिश्रा** । एव **पुनः**-शब्दोऽत्र (शब्देनात्र) द्वितीयवारमात्र नत्वनागामिनि द्वितीयवारे। **गहनो** गम्भीर । **जडयति** सुखयति तापयति च—यो हि जाड्यमापादयति स कथ तापयतीति विरोधोऽसत्तु (धाभासस्तु) सौन्दर्येणाप्राप्तिपर्यवसानेन परिह्रियत इति विरोधालङ्कार । तदिह 'प्र'शब्देन प्रध्वसादिक्रियाप्रसक्तत्वेन माधवस्य मनसि विवेकलेशस्यापि समूलमुच्छेदान्महामोहार्णवमग्नस्य कोऽप्याभिलाषिक शृङ्गारो व्यज्यते ।

अथ निपाताना व्यञ्जकत्वं दर्शयति—**कृतञ्चे**त्यादि । कृतमित्यादिना पारतन्त्र्य निरासात् स्वेच्छासंसारित्व' (सञ्चारित्वं), **किमन्यदि**ति लोकोक्त्या शत्रुनिराकरणे सामग्र्यन्तरनैरपेक्ष्यं बलवदापादकविरहश्च कथितः । अस्माकमित्यत्र **'न'** इति शत्रुशून्यस्यापि परदु खदु खितस्य भगवतो जगत्कण्टकोद्धारणप्रवृत्त्या कारुण्यमुचितविषयमिव प्रतीयते । **तमांसी**त्यादि निहतत्वादेः स्थानादिवैधर्म्येण प्रतिबिम्बनमिति (78a) दृष्टान्तोऽलङ्कार , तस्य साधर्म्यवैधर्म्याभ्या द्विधा प्रतिपादनात् । तदिह **'कृत' 'निहता'** इति शब्दद्वय-निरन्तरस्थितिना **'च'** शब्देन तुल्यकालक्रियायोगात्तुल्ययोगिताद्योतकेन वीररस प्रकृष्यते । एवञ्च यद्यपि द्वाभ्या 'च' शब्दाभ्यामत्र तुल्ययोगिता द्योत्यते तथापि द्वितीयस्यान्वाचय-प्रसक्त्वेनाप्युपपत्ते प्रथमस्यात्र प्राधान्यमित्याह **'च' इति निपातस्ये**ति । यदि वा जातावेक-

तरुणिमनि कलयति कलामनुमदनधनुर्भ्रुवोः पठत्यग्रे ।
अधिवसति सकलललनामौलिमियं चकितहरिणचलनयना ॥१११॥

(व्य. वि)

अत्र इमनिज व्ययीभाव-कर्मभूताधाराणां स्वरूपस्य, तरुणत्वे इति, धनुषः समीपे इति, मौलौ वसतीति 'त्वा'दिभिस्तुल्य एषां वाचकत्वे[47] अस्ति कश्चित् स्वरूपस्य विशेषो यश्चमत्कारकारी स एव व्यञ्जकत्व प्राप्नोति ।

वचन, द्वाभ्यामेव 'च' शब्दाभ्या तत्प्रकाशनात् । 'च' शब्दस्तु सुबन्ततया पद, तथापि निपातस्य विभक्तेरश्रुते पदावयवत्व, यदि वा प्रकृतिप्रत्ययवत् केवलस्याप्रयोग इति ।

रामोऽसावित्यादि—**स्वरैः** षड्जादिभि सप्तभि । **असा**विति सर्वनाम्ना साक्षात्-क्रियमाणतदीयलोकोत्तरस्थिरत्वरम्यत्वसत्यत्वशास्त्रदृष्टित्वोचितकारित्वादिरूपप्रसिद्ध प्रकर्षो व्यज्यते । **भुवनेष्वि**ति बहुवचनेन त्रिभुवनव्यापित्व, **गुणै**रिति प्रातिपदिकमात्रेण जन्म-नस्तदेकप्रवणत्व, तत्रापि बहुवचनेन धीरोदात्तत्वनि सामान्यसाहसत्वादिविक्रमोचितगुणगण-निधानत्वम्, **अस्मादि**ति बहुवचनेन सर्वोत्क्षेपिणा न केवल तव, समरावतीर्णराक्षस-कुलस्य सकलस्य, **अभाग्या**दिति भाग्याभावे वाच्ये **यदन्यथासम्पत्तिमुखेनाभिधानं** (78b) तेन येषामप्यस्मत्पक्षपातिना जीवनादृष्टमवशिष्ट तेषामपि विपर्यस्तमिति ध्वन्यते । तेनैतत्प्रतियोगिभयात्त्रैलोक्यविजयोपजातशौर्याभिमानिनोऽस्मद्भर्तुर्व्यर्थेति प्रकृतपोषक ।

तरुणिमनीत्यादि—**अनुमदनधनुरि**ति मदनधनुष उपाध्यायस्य समीप इति 'अनुर्यत्-समये'ति (पा २।१।१५) समास । **भ्रुवोरग्रे** शिष्यत्व [भूते] प्रत्ययादिभि समानार्थत्वेऽपी-मनिजादीना स्वरूपस्य व्यञ्जकत्व सहृदयग्राह्य स्फुटमेव । तथाहीमनिचा सौकुमार्यपरेण त्यक्त-बाल्यमुद्भिद्यमानरणरणकञ्च वयो ध्वन्यते, 'त्व'प्रत्ययेन तु कठोरता । एवमव्ययार्थस्य विशेष्यत्वेऽव्ययीभावस्तेन समासे मदनधनुषो न्यग्भाव प्रतीयते, ततश्च ततोऽप्यधिकं भ्रूलता (लतया) जगद्वशीकारसाम्राज्यमिति व्यज्यते, वाक्ये तु मदनधनुषः प्राधान्यमिति । उपान्वध्याङ्वस (पा १।४।१८) इति कर्मभूताधारेण सकलरचना (ललना)—मौलिन्यग्-भावनमभिव्याप्यत्वञ्च प्रतीयते, सप्तम्या त्वाधेयस्यैकदेशवृत्तितेति । तदेतदाह—**अस्ति कश्चि-**

---

47 **एषां वाचकत्व** इति 'पञ्चरूपा रसा' इति भामहविवरण उद्दिष्टमुद्भटमतमाक्षिप्त स्यात् । तच्च काव्यालङ्कारसारसंग्रहोपरि लघुवृत्ताववलोकनीयम् । व्यक्तिविवेक-कृतस्त्वेषां गमकत्वमर्थद्वारकमेव पारम्पर्येण न साक्षादिति तृतीय पन्था ।

एवमन्येषामपि बोद्धव्यम्। वर्णरचनानां व्यञ्जकत्व गुणस्वरूपनिरूपण उदाहरिष्यते। 'अपि'शब्दात् प्रबन्धेषु नाटकादिषु। एव रसादीनां पूर्वगणित भेदाभ्यां सह षड्भेदाः।

द्विशेष इति। तथाच 'अप्रहतपदारब्धचमत्कारित्व नाम कान्ति'रिति **वामनः**[48] (का अ सू वृ ३।१।२५)।

अभिक्षिप्ततया ग्रन्थगौरव स्यादित्यभिप्रेत्य सक्षिपति **एव**मित्युपदर्शितदिगनुसारेण। तथाहि 'तटी (79a)तार ताम्यती'त्यत्र (व जी १६७ पृ', ध्व आ लो १६२पृ) तटशब्दे पुस्त्वनपुसकत्वे अनादृत्य स्त्रीत्वमेव सहृदया समाश्रयन्ते 'स्त्री[ति] नामापि मधुर'मिति (व जी १६७ पृ) कृत्वा, कमलमिवेत्यादौ वक्तव्ये कमलायत इत्यादिकश्च प्रयुञ्जते।

इदानीमुद्देशानुसारेण वर्णरचनानां व्यञ्जकत्वमुदाहर्तुमर्हतीत्यत आह **वर्णेति। नाटकादिषु** नाटकनाटिकाऽऽदिभिरभिज्ञानशकुन्तलरत्नावलीवासवदत्ता-[49] प्रभृति [परामृष्ट]। अत्र ह्यसलक्ष्यक्रमो रसादिध्वनि. स्पष्ट एव, साक्षाद्वर्णनिवेदितत्वेन विभावानुभावौचित्यचारुण कथाशरीरस्योपनिबध्यमानत्वात्। यत्तु ध्वनिकृता 'यत्र साक्षाद्वर्णनिवेदितेभ्यो विभावानुभावव्यभिचारिभ्यः स्वतो रसादिप्रतीतिरव्यवधानेन सोऽलक्ष्यक्रमस्य ध्वनेर्विषय' (ध्व आ वृ) इत्युक्तं तन्मुनेर्मतस्याननुगुणं, यतो विभाववन्नैव व्यभिचारिण साक्षाच्छब्दप्रतिपाद्या किन्तु रसवत् स्थायिवच्च विभावादिसयोगेनैव प्रकाश्या भावत्वात्, तदिदमास्पष्टे सहृदयैरनुन्मीलितपूर्वैरनर्घ्यनिर्माणे व्यग्रचेतसो ग्रन्थकर्तुर्विस्मृत ग्रन्थान्तरैकदेशत्वादनवधानवशाच्चास्योद्घोषणमात्मन एव दूषणमित्युपेक्षणीयमेव।[50] प्रबन्धस्य च रसादिव्यञ्जकत्वे पञ्च प्रकारा समाम्नाताः। (ध्व आ

---

48 औज्ज्वल्य कान्तिरिति सूत्र बन्धस्योज्वलत्व नाम यदसौ कान्तिरिति तदभावे पुराणच्छायेत्युच्यत इति वृत्तिरित्येव मुद्रितपुस्तकेषु पाठ।

49 सज्ञया संज्ञिव्यपदेश इति 'वासवदत्ता'पदेन स्वप्नवासवदत्तनाटकस्य ग्रहण सम्भवेत्। तथात्वे भासनाटक टीकाकृत समये न विरलप्रचारमासीदिति। अथवा लोचनादिग्रन्थतोऽप्रत्यक्षस्तत्परिचय सूचित।

50 लक्षणकृता गुणमाहात्म्यवादिनां प्राचीनाना रसोद्देशसमाहितानां प्राचीनतराणां भरतादीनाञ्चान्यै पारिभाषिकसंज्ञाऽऽदिभिरुपस्थापितानामनुशासनानि ध्वनितत्त्वसोदराणि ध्वनिकक्षायामन्तर्भाव्यानीत्येतत्सूचनाय ध्वन्यालोकतृतीयोद्योतीयग्रन्थानुसरण विपश्चिता ग्रन्थकृताऽत्र कृतम्। लक्षयितॄणामणीयस्यप्यलोक-

३।७ वृ) प्रथम कथापरीक्षा। तत्रापि कथाऽऽत्माप, सन्धिसन्ध्यङ्गघटनासौष्ठवेन (79b) फलपर्यन्तताऽऽनयन रस प्रति जागरण', तदुचितविभावादिवर्णनेऽलङ्कारौचित्यमिति [च]। तत्र कथापरीक्षा विभावाद्यौचित्यचारुण कथाशरीरस्योपनिबन्ध । तथाहि शृङ्गारवर्णनेप्सुना तादृशी कथाऽऽश्रयणीया यस्यामृतुमाल्यादेर्विभावस्य हर्षौत्सुक्यादे सञ्चारिणः स्फुट एव सद्भाव । तथेतिहासादिष्वपि कविना प्रबन्ध निबध्नता रसमयेन भवितव्यमिति स्वय वोत्प्रेक्ष्य रसानुगुण्येन कथोन्नयन विधेयम्। तद्यथा कालिदासेन **रघुवंशे**ऽजादीनां राज्ञां विवाहवर्णनं नेतिहासनिरूपितम्, यथा वा**ऽभिज्ञानशकुन्तले** दुष्यन्तेनाश्रमे शकुन्तलया सह गान्धर्वविवाहे कृते तस्यामेव सगर्भाया गृहागताया न मयैव विवाहितेत्यपह्नव• कृत इत्यार्षे तथाविधस्य शृङ्गारस्य पर भङ्गकारणमिति स्वयमुत्प्रेक्ष्यात्रैव शापविस्मृततद्विवाहादिका रसानुकूल्येन कथा योजिता। यथा वा उर्वशी पुत्रजन्मानन्तर पश्य त्व, केनापि कार्यवशेन मम त्वया सह सङ्गमोऽभवदिति पुरूरवसा सह सवादं कृत्वा प्रयातेत्यार्षे, कालिदासेन तु विप्रलम्भशृङ्गारस्य पर विरागकारणमित्युत्प्रेक्ष्य **विक्रमोर्वश्या**मन्यथा कृतेति। एवमन्येष्वपि विरुद्धयोगाद्रसानुकूल्येन कविभि कथायोजन कृतमिति द्रष्टव्यम्। (80a) 'नहि कवेरितिवृत्तमात्रनिर्वहणेन किञ्चित् प्रयोजनम्। इतिहासादेव तत्सिद्धे' (ध्व आ ३।१४ वृ)। **हर-(हरि)विजये** तु कान्ताऽनुनयाङ्गत्वेन पारिजातहरणादि निरूपितमेवेति (ध्व आ लो १४८ पृ:) कथाऽऽत्माप। तथा नाटकादावाख्यायिकाऽऽदौ सर्गबन्धादौ च मुखप्रतिमुखगर्भविमर्षनिवर्हणाख्या अन्वर्थनामान पञ्च सन्धय प्रारम्भयत्नप्राप्त्याशानियताप्तिफलयोगरूपावस्थापञ्चकसहिता यथायोगमुपक्षेपपरिन्यासादिसन्ध्यङ्गपरिपूर्णबीजबिन्दुपताकाप्रकरीकार्यलक्षणार्थप्रकृतियुक्ता ये मुनिनोक्तास्तेषा यथावद्घटनमिति फलपर्यन्तनयनम्। तत्राधिकारिकस्येतिवृत्तस्य पञ्चसन्धित्व परिपूर्णमेव कर्तव्यमिति नियम। यथा **रत्नावल्यां** सचिवायत्तसिद्धेर्धीरललितस्य वत्सराजस्य चक्रवर्तित्वादिफलान्तरानुबन्धिकन्यालाभफलोद्देशेन प्रस्तावनोपक्रमो(मौ)। एव **सुभद्राहरणजानकीहरणा**दिषु तत्र तत्र द्रष्टव्यम्। प्रासङ्गिके त्वितिवृत्ते नाय नियमः। तदाह मुनि —'प्रासङ्गिके

सामान्यशक्तिरस्त्येतद्दूरीकृत्यैव प्रसक्ता। यदाह "वाच्यानां वाचकानाञ्च यदौचित्येन योजनम्। रसादिविषयेणैतत् कर्म मुख्य महाकवे॥" इति, 'रीतिलक्षणविधायिनां हि काव्यतत्त्वमेतदस्फुटतया मनाक् स्फुरितमासीदि'ति च। तदत्र स्फुटतया सप्रदर्शितमिति च रसादितात्पर्येण काव्यनिबन्धन व्यञ्जनाव्यापारे महत्यास्था चेति युगपदेव निर्बन्धदृढ स्वमतस्थापनम्।

१७

भेदास्तदेकपञ्चाशत्

व्याख्याताः।

तेषां चान्योन्ययोजने ॥४३॥

सकरेण त्रिरूपेण ससृष्ट्या चैकरूपया।

न केवल शुद्धा एवैकपञ्चाशद्भेदा भवन्ति यावत्तेषां स्वप्रभेदैरेकपञ्चाशता

परार्थत्वान्न ह्येष नियमो भवे'दिति (ना श १६।१६) तथा यथाऽवसरमन्तराऽन्तरा रसस्योद्दीपनप्रशमने इति रस प्रति जागरणम्। यथाऽत्रैवोद्दीपनम्, "अअ' सो राआ उदअणो" इति (रत्ना १ अ) सागरिकाया· प्रशमनं, वासवदत्ताया· पलायने (8ob) पुनरुद्दीपन, चित्रफल कोल्लेखने प्रशमनं, सुसङ्गताप्रवेश उद्दीपनमित्यादि। तथा रससमवधानेन विभावादिघटनामेव कुर्वन्नान्तरीयकतया यमासादयति कवि स एव रसमार्गेऽलङ्कारो मत इति रूपकादेरलङ्कारस्य निबन्धोऽनङ्कारौचित्यम् (ध्व आ २।१६-२० इ) यथा—चलापाङ्गां दृष्टि स्पृशसि बहुशो वेपथुमतीं रहस्याख्यायीव स्वनसि मृदु कर्णान्तिकचर। कर' व्याधुन्वत्या पिबसि रतिसर्वस्वमधरं वय तत्त्वान्वेषान्मधुकर हतास्त्वं खलु कृती॥ (अभि श १।२०) इयं हि शकुन्तला प्रति प्रवृद्धाभिलाषस्य दुष्यन्तस्योक्ति·। 'हे मधुकर किंजातीयेय शकुन्तलेत्येतत्तत्त्वमन्विष्यमाणा एव वय हता आयासमात्रपात्रीभूता। त्वमेव कृती यत कदाऽस्या कटाक्षेक्षणहेवाकिनी' तत्समयोचितवेपथुमती' दृष्टि चुम्बेय, हठादनिच्छन्त्या अपि रतिसर्वस्व वाऽधरं' पिबेय, कथमेषाऽस्मदभिप्रायव्यञ्जक रहोवचनमाकर्णयेदिति यदस्माक मनोराज्यपदवीमधिशेते तत्तवायत्नसिद्धम्। त्व हि त्वत्सम्पर्कत्रासाच्चपलापाङ्गा तदनुभाववेपथुमतीं दृष्टिमुत्पलधिया पुन पुन स्पृशसि, श्रवणावकाशपर्यन्तत्वाच्च नेत्रयोरुत्पलशङ्काऽनपगमात् कर्णान्तिकगतो मृदु रणसि, त्वद्दशनभयात् कर व्याधुन्वत्या वदनानिलसौरभाकृष्टो रतिसर्वस्वमधर-(81a) मपि पिबसीति दृक्स्पर्शनाधरस्पर्शनकर्णोपान्तरणरणायितरूपभ्रमरस्वभाववर्णनात् स्वभावोक्तिरलङ्कार· प्रकृतस्याभिलाषशृङ्गारस्याङ्गत्वेनानुगुणता भजमान स्वयमेवापतित' (व. ज १३पृ, ध्व आ. लो ८६ पृ.) इति। यमकदुष्करशब्दभङ्गश्लेषादयस्तु सम(रस)धाराऽतिरिक्तशब्दविशेषान्वेषणरूपप्रयत्नान्तरसाध्या इति रसाक्षिप्तस्य कवेर्मूलक्षतिकारिणां तेषां निवेशनमनौचित्यम्। 'यत्तु रसवन्ति कानिचित् कालिदासकृतानि **रघुवंशे** ऋतुवर्णने यमकानि दृश्यन्ते तत्रापि रसस्याङ्गता यमकादीना त्वक्षितैवेति' (ध्व. आ लो २।१६, २।१५)।

संशयास्पदत्वेनानुग्राह्यानुग्राहकतयैकव्यञ्जकानुप्रवेशेन चेति त्रिविधेन सङ्करेण परस्परनिरपेक्षरूपयैकप्रकारया संसृष्टया चेति चतुर्भिर्गुणने [2]

वेदखाब्धिवियच्चन्द्राः (१०४०४)

शुद्धभेदैः सह

शरेषुयुगखेन्दवः (१०४५५) ॥४४॥

एवमिति पूर्वगणितभेदौ पदवाक्यप्रकाशरूपौ। **भेदाभ्यां सहे**ति—यतश्च पूर्वपरिसंख्याता पञ्चत्रिंशदर्थशक्तिमूला प्रबन्धमप्यनुबध्नन्तीति ते प्रबन्धप्रकाशकतया साक्षादलक्ष्यक्रमव्यङ्ग्या अपि पूर्वगणितानुप्रविष्टपदवाक्यप्रकाशरूपावपहाय भेदचतुष्टयपरिपुष्टा। तदित्थ ध्वने प्रकारा प्रथममेकपञ्चाशत् प्रकाशन्ते। **तेषाञ्चान्योन्ययोजने** "विन्यस्याधो गुणय"-मित्युपक्रम्य "प्रत्युत्पन्नविधाने करणान्येतानि चत्वारी"ति दृशा एकपञ्चाशता गुणने षड्विंश[श]त्येकाधिका (२६०१) जायते। अस्याश्च सशयास्पदत्वादिमयसङ्करत्रयैकप्रकारसंसृष्टिरूपैः सयोगभेदैश्चतुर्भिर्गुणन एतावती सङ्ख्येत्याह **वेदे**त्यादि। वेदाश्चत्वारः, ख शून्यम्, (81b) अब्धिश्चत्वार, वियत् शून्यं, चन्द्र एक इति। अङ्केष्वभ्यस्तकल्पनाया वैपरीत्यमिति तथा विन्यास। अत्रापि **शुद्धभेदैः** पञ्चाशता [भेदैरेकपञ्चाशतो] योजने शरा पञ्च, इषव पञ्च, युगानि चत्वारि, खं शून्यमिन्दुरेक इत्येवञ्च प्रमेयभेद। [अथ] सर्वथा न प्रतिपादितो भवतीति चिन्त्यमेतत्[51]। सजातीयभेदै साक सङ्कलितोट्टङ्कनक्रमेण त्वमी ध्वनिप्रकारा रसदस्रशिखिद्गमाः स्युः (१३२६)। तथाहि सङ्कलितस्य लक्षणं "सैकपदाहतपददलमेकादिचयेन भवति सङ्कलितम्।" सैक पदं ५२, तेनाहतं पद २६५२, तस्य दलम् १३२६। अथवा 'पदयुतपदवर्गदलं सङ्कलितम्'। तत्र 'सदृशद्विराशी घात' इत्यादि[ना] पदस्य वर्ग. २६०१, समपदेन

---

51 टीकाकृता श्रीधरेणात्र प्राचीनाना ज्योतिर्विदां श्रीधराचार्याणा मतमुद्धृतम्। तत्तु तेषां त्रिशत्याख्यग्रन्थे स्थितमिति सम्भाव्यते। श्रीधराचार्यास्तु प्रामाणिकत्वेन सिद्धान्तशिरोमणौ बीजगणिताद्यंशे स्मृता। चण्डीदास 'सान्धिविग्रहिको गणनाऽऽदिक निखिल' जानातीत्यतस्तदुक्तिरेव लिख्यत' इति टीकाकृतोऽस्य प्रामाणिकसङ्गतिमाह। यद्यपि च विश्वनाथादिभि स एवानुसृतः (प्रत्युत्पन्न' गुणनेन लब्धमिति कृत्वा) तथापि न केवलं श्रेणीबद्धसङ्कलितस्यायं नियम, सङ्करेण त्रिरूपेणोपदिष्टस्य विचारचर्चाचतुरो मिश्रकविधानमपि साधनीयमिति हस्ततरैव सङ्ख्याऽऽयातीत्याशयेन।

तत्र दिङ्मात्रमुदाह्रियते—

खणपाहुणित्वा देअर जाआए सुहअ किंपि दे भणिआ।
रुअइ पडोहरवलहीघरम्मि अणुणिज्जउ वराई ॥१११॥

(गा स वे ६६३)

अत्रानुनयः किमुपभोगलक्षणेऽर्थान्तरे सङ्क्रमितः किमनुरणनन्यायेनोपभोग एव व्यङ्ग्यो व्यञ्जक इति सन्देहः।

स्निग्धश्यामलकान्तिलिप्तवियतो वेल्लद्बलाका घना
वाताः शीकरिणः पयोदसुहृदामानन्दकेका कलाः।

युत २६५२, तस्य दल १३२६ इत्याचार्यश्रीधरदर्शनेन सङ्कलितम्। अन्यैरप्युक्तं यथा 'एको राशिर्द्विधा स्थाप्य एकमेकाधिकं कुरु। तयोरर्धेन सगुरय-(? समार्धेन सम गुरय) मेतत् सङ्कलितं लघु॥ एको राशिर्द्विवा ५१,५१ एक एकाधिक सम ५२, अस्यार्द्धम् २६, एकपञ्चाशत् षड्विंशत्या हता १३२६, तत प्रागुट्टङ्किते सङ्करसंसृष्टिभेदचतुष्टयेन गुणने वेदखानलसायका ५३०५ (५३०४)।[52] अत्र शुद्धप्रकाराक्षेपे बाणेषुगुणपक्षिण (५३५५)[53]।

खणेत्यादि। अत्र काचिदुत्सवागता कस्यचित् सानुरागा स्वसख्यास्तद्भ्रातृजायाया मुखेन वलभीगृहे दत्त-(82a) सङ्केता। सा तु सखी तत्समागमार्थं भङ्ग्या देवरस्येदमाह—क्षणप्राघुणिका देवर जायया सुभग किमपि ते भणिता। रोदिति पडोहरे [पश्चात्स्थिते] शून्यवलभीगृहे अनुनीयतां वराकी॥ क्षण उत्सवे क्षिप्रञ्च प्राहूता निमन्त्रयानीता। अत्रानुनीयतामिति पदमनुनयलक्षण स्वार्थमत्यजत् किं सम्भोगेनैकान्तोचितेन तोष्यतामित्यर्थान्तरे संक्रमितम्, अथवाऽनुनयलक्षणेत्यादि (अनुरणनन्यायेनेत्यादि)।

स्निग्धश्यामलेत्यादि। 'पयोदसुहृदो मयूरा, केकाः षड्जसंवादिनो

---

52 वस्तुतस्तु ततो विचारे टीकाकृदधिगतसंख्याऽपि न फलतीति विवृप्रियायां साहित्यदर्पणटीकायां महेश्वरमन्तव्यं सारवदेव मन्यते। यत्तु प्रदीपकृता काव्यप्रकाशग्रन्थसमुद्दिष्टसंख्यासस्थानसमर्थनायां बद्धपरिकरेण दर्पणोक्तितो मतमेतदीयमनुपादेयमिति दर्पणमालिन्यमुद्भावितं तत्तस्यैतदस्थाने पदाधानेन साहसिक्यमेव।

53 लीलावत्यां करणसूत्रं 'सैकपदघ्नपदार्धमथैकाद्यङ्कयुतिः किल सङ्कलिताख्ये'ति। वस्तुतस्तु सहृदयहृदयव्यामोहनायेदमिति न गणनातात्पर्ये काऽप्यास्थाऽऽस्थेया।

कामं सन्तु दृढं कठोरहृदयो रामोऽस्मि सर्वं सहे
वैदेही तु कथ भविष्यति ह हा हा देवि धीरा भव ॥११२॥
(ध्व आ. २।१ वृ)

अत्र 'लिप्ते'ति 'पयोदसुहृदा'मिति चात्यन्ततिरस्कृतवाच्ययोः संसृष्टिः। ताभ्यां सह 'रामोऽस्मी'त्यर्थान्तरसङ्क्रमितवाच्यस्यानुग्राह्यानुग्राहकभावेन 'राम'पदलक्षणैकव्यञ्जकानुप्रवेशेन चार्थान्तरसङ्क्रमितवाच्यरसध्वन्योः संकरः।

मधुरा शब्दविशेषा।[54] एवमेते सौन्दर्यातिशयभाजो वर्षासमयोचिता घना वियोगिदु खावस्थासु(या उ)द्दीपका काम सन्तु, **रामोऽह सर्वं सहे, दृढं** सातिशयं कठोरहृदयतया। कठोरहृदयत्वञ्च मेघाद्युद्दीपितसाम्प्रतिकावस्थासहनापेक्षया, न तु सीतावियोगदु खसहनापेक्षया। अतस्तद्वियोगदु खसहने गुणीभूतव्यङ्ग्यता नैव। तथाभूतैर्मेघादिभिरेव सौकुमार्यातिशयात्। सीता प्रति निश्चित क्लेशातिशय इत्याह **वैदेहि तु कथ भविष्यती**ति। अतएव भवनमेवास्या असम्भाव्यमिति हृदयनिहिता स्मरणशतविकल्पपरम्परया प्रत्यक्षभाविता हृदयविदलनोन्मुखी' सनिर्वेदसम्भ्रम तत्समाश्वासनायाह **ह हा हा देवि धीरा भवे**ति (लो द ६१ ६२ष्ठ)। **देवी**ति युक्तं तव धैर्यमित्यर्थः। तदिह **लिप्त**शब्द स्वार्थतिरस्कारेण व्यापित्वप्रकाशनादत्यन्त-(82b) तिरस्कृतवाच्य। एवं **पयोदसुहृ**च्छब्दः स्वार्थतिरस्कृते प्रमादोन्मदिष्णुताऽऽदिप्रकाशनात् स एव। अनयोश्च परस्परनैरपेक्ष्यात् संसृष्टि। यदि वा **'स्निग्ध'**शब्दो घृतादिकृतस्नेहरूपार्थतिरस्कारेण नेत्राभिरामत्वा यत्यन्ततिरस्कृतवाच्य इति स्निग्धलिप्तयो ससृष्टि.। **रामोऽस्मीति** रामपदं शिथिलितस्वार्थोपयोगि (ग)तया **'कठोरहृदय'**पदसाचिव्येन राज्यभ्रंशवनवाससीताऽपहारादिभि सामान्यापमानसहत्वशतु[त्व]निराकरणात्तुभ्यमिश्रा-(ज.श्नत्ता)यर्थान्तरसक्रमितवाच्यम्। पूर्वाभ्यामत्यन्ततिरस्कृतवाच्याभ्यामनुग्राह्यानुग्राहकरूपतया सङ्करः। यो विकेण (योऽत्रैकेन) व्यञ्जकेनानेको ध्वनि स तृतीय' सङ्करो यथाऽत्रैव 'राम'शब्द एवार्थान्तरसंक्रमितवाच्य. समुद्दीपनविरोधो (विभावो)-द्बोधितस्य विप्रलम्भस्य व्यञ्जक। सर्वस्मिन्नेव रसाद्यात्मनि काव्येऽलक्ष्यक्रमव्यङ्ग्यरूपस्य रसभावलक्षणस्य प्रभेदप्रतीत्यपेक्षयैकव्यञ्जकवाक्यद्वारेण व्यञ्जकत्वं सम्भवत्येव यथाऽत्रैव रसध्वनेर्भावध्वनेश्चैकेन व्यञ्जकेन व्यञ्जनाद्विप्रलम्भस्य तद्व्यभिचारिणश्च निर्वेदशोकावेगात्मनश्चर्वणीयत्वात्। तदेव ध्वने प्रभेदं प्रति सङ्करसंसृष्टिभ्यां चत्वारो भेदा उदाहृता।

---

54 अत्रानदकला· केका इति वक्तव्यम्। यद्वा श्रीधरव्याख्याने कला इति विशेष्यपदम्।

एवमन्यदप्युदाहार्यम् ।

इति काव्यप्रकाशे ध्वनिनिर्णयो नाम चतुर्थ उल्लास ॥४॥

एवमन्यदिति—'यथा 'न्यक्कारो ह्ययमेव मे यदरय ' (७म उ) इत्यत्र 'मे' इति षष्ठ्या प्रकाशित. शत्रुशत्रुमद्भा(83a)वलक्षण सम्बन्धो रावणस्य सर्वकाल नि सपत्नतया शत्रूणामप्य-सहमानस्य त्रैलोक्यविजयोचितशौर्याभिमानव्यञ्जक । 'हि' शब्दो 'न्यक्कार'शब्दश्चाश्रुतपूर्वत्वमति-शयश्च व्यनक्ति । 'यदि'त्यनेन शत्रूणामसम्भाव्यमानत्व व्यज्यते । 'अरय' इति बहुवचनं जगति कोऽपि रिपुर्नास्ति न भविष्यति किमुत बहव इति व्यनक्ति । 'तापस' इति तद्धितेन तपश्चर्यामात्रप्रवणतया पौरुषहीनत्व व्यज्यते । 'तत्रापि' शब्देन निपातसमुदायेनात्यन्तासम्भाव्य-मानत्वम् । 'असा'विति तापसोऽपि न कदाचित् भार्गवप्राय शत्रुत्वसम्भावनामात्रपात्र स्यात् किमयं वराक इति रामस्य लाघवातिशयं व्यनक्ति । मत्कर्तृका यदि जीवनक्रिया तदा हननक्रिया तावदनुचिता, तस्यां स च कर्तेति **श्रीमदाचार्या**: ।[55] 'अपि'शब्देन मनुष्यमात्रक. ।' (ध्व आ लो ३।१६ वृ) 'अत्रैवे'ति लङ्कायां मदधिष्ठितायामा सृष्टे-रदृष्टपूर्वराक्षसवधत्व प्रकाशयति । 'निहन्ती'ति वर्तमानकालतया नि शेषेण राक्षसवधस्य पुन पुन सम्पादनमभिव्यज्यते । 'राक्षसबल'मिति कर्मशक्तिरेकस्याप्यत्यन्तमसम्भाव्यमानो मानुषमात्रकृतो वधः किमुत मद्बलस्येति द्योतयति । अन्ये तु 'जीवती'ति तिङा प्रकाशितया रामस्य कर्तृशक्त्या येनाधन्येन स्वपौरुषाध्मातेन राक्षसाना किञ्चिदपराद्ध स तत्कालमेव स्वसैन्य कृता (83b)न्तदन्ताशनिपूर्त्तताया पात्रता नीतोऽस्माभि , तत्रापि वर्तमानकालतयैवमपकारिणो रामस्य तत्कालमेव क्षणमात्रमपि जीवितमसम्भाव्य मयि स्थिते किं पुनरद्यापीति द्योत्यत इत्याहु । 'अहो' इत्यश्रुतपूर्वशत्रुसम्भवाद्व्यभिचारिविस्मयद्योतक । 'रावण' इति पदं स्वशिरश्छेदपरितोषितशशिशेखरत्वकैलासोन्मूलनक्षमत्वस्वपराक्रमोत्कर्षाधरीकृतलोक-पालत्वादीनि व्यनक्ति । स्वमर्थमवज्ञारूपमपरित्यज्य 'धिक् धिगि'ति निपातेन शत्रुं जितवानित्याख्यायिकेयमित्युपपदसमासेन सक्किपा शक्रोऽपि येन तथा निर्जित स तापस-मात्रेऽप्यकिञ्चित्कर. सम्पन्न इति व्यज्यते । प्रशब्देन [प्रकर्षेण] बोधित विद्यते यस्येति मतुपा क्तवतुच्छद्मना च किमस्माक मध्ये कश्चित्तापसमात्रपराजययोग्यो नैव सम्भावितो युष्माभि-

---

55 आचार्या इत्यापाततोऽभिनवगुप्तपादानां ग्रहणम् । अन्ये त्वित्युद्देशस्यास्य ध्व. आ. लोचनेऽनुपलम्भात्तदुद्दिष्टाना भट्टतौतपादानामन्येषां वाऽलाभात् केषाञ्चित् प्राचीनतराणा ध्वन्यालोकटीकाकृतां परामर्श स्यात् ।

यैदयमविद्यमानविरोधोऽकाण्ड एव महता प्रयत्नेन कृतविरोध कुम्भकर्ण इति प्रकाश्यते। 'स्वर्गे'त्यादि समासस्य स्वपौरुषानुस्मरण प्रति व्यञ्जकत्व 'ग्रामटिके'ति स्वार्थिकेन टिकनाम्ना प्रत्ययेन चाबहुमानास्पदत्व द्योत्यते। 'वि'शब्दो लुण्ठनसाकल्यव्यञ्जक । 'वृथे'ति स्वात्मपौरुषनिन्दाव्यञ्जक । 'भुजै'रिति बहुवचनेन प्रत्युत भारमात्रमेत इति व्यज्यते।' (ध्व आ लो १५३-५४ पृ) तदित्यमेभि· शब्दैरेव गुणीभूत (84a) व्यङ्ग्यविशिष्टै पदार्थैर्विभावादिरूपतयाऽलक्ष्यक्रमव्यङ्ग्यो रौद्ररस एवानुगृह्यत इत्यनुग्राह्यानुग्राहकभावेन गुणीभूतव्यङ्ग्यसकीर्णोऽत्र ध्वनि । न च तापसादीना पदाना स्वार्थपरित्यागेनार्थान्तरप्रकाशनादर्थान्तरसक्रमितवाच्यत्वमिति ध्वनिसस्रृष्टिर्न तु गुणीभूतव्यङ्ग्यत्वमित्याशङ्कनीयम्, एषा पदाना विवक्षितवाच्यत्वात्। अर्थान्तरसक्रमितवाच्यो हि ध्वनिरविवक्षितवाच्य इति प्रागुक्तम्, तापसादिषु पदेषु व्यङ्ग्यविशिष्ट' वाच्य प्रतीयते, न तु व्यङ्ग्यधर्मान्तरपरिणतम्, अशेनापि स्वार्थस्यापरित्यागात्। तस्माद्वाक्येऽत्र ध्वनि, पदानि तु गुणीभूतव्यङ्ग्यानि। अतएव यथा ध्वने· प्रभेदोत्तराणि (प्रभेदान्तराणि) पदार्थवाक्यार्थाश्रयत्वेनाविरोधीनि परस्परसकीर्णत्वात्तथाऽत्रापि पदार्थाश्रयत्वे गुणीभूतव्यङ्ग्यस्य वाक्यार्थाश्रयहेतुध्वने सङ्कीर्णतायामविरोध । किञ्चैकस्य व्यङ्ग्यस्य गुणप्रधानभावो विरुद्धो न तु व्यङ्ग्यभेदापेक्षयाऽस्ति विरोध इति। 'रावण'पदे तु यो ध्वनिस्तेन रौद्ररसप्राधान्यात् संसृष्टत्वम्। एकव्यञ्जकानुप्रवेशस्तु तैरेव पदैर्गुणीभूतव्यङ्ग्यस्य प्रधानभूतस्य च रसस्य विभावादिद्वारतयाऽभिव्यञ्जनात्।

यथा वा—कर्ता द्यूतच्छलाना जतुमयशरणोद्दीपन सोऽभिमानो कृष्णाकेशोत्तरीयव्यपनयनपटु· पाण्डवा यस्य दासा । राजा (84b) दु शासनादेर्गुरुरनुजशतस्याङ्गराजस्य मित्र' क्वास्ते दुर्योधनोऽसौ कथयत न रुषा द्रष्टुमभ्यागतौ स्व (वे स. ४।२६)॥ अत्र 'कर्त'त्यादिना छद्मना परिगृहीतस्यापि धर्मराजराज्यस्याधुनाऽपगमे तावन्मात्रकालिकनृशसता द्योत्यते। 'जतुमये'त्यादिना तथा विश्रब्धभ्रातृदाहलक्षणमहापातकनिबन्धनमाततायित्व व्यज्यते। 'कृष्णे'त्यादिना तादशपापकारिणोऽस्य न किञ्चिदप्यपकृतमस्माभिरिति द्योत्यते। 'सोऽभिमानी'-[ति] क्व सम्प्रत्यभिमानित्व गत यत् पलाय्य स्थितमिति प्रकाशयति। 'पाण्डवा यस्य दासा' इति तदीयोद्घोषणानुकारोऽयममर्षातिशयव्यञ्जक· । 'राजे'ति सम्प्रति तथाविधभ्रातृमित्रसैन्यपरिक्षयेऽपि जीव[न]मात्ररक्षापरायण· शब्दमात्रावशिष्ट सवृत्त इति व्यनक्ति। 'दु·शासनादे'रित्यादिना सर्वे ते हता अस्माभिरिति व्यज्यते। 'अङ्गराजस्य मित्र'मित्यनेन लोकोत्तरशौर्यबलौचित्यनिधानभूतो विश्वासैकस्थान जयाशाक्षेत्रं योऽङ्गाधिपति सोऽपि हत इति द्योत्यते। 'दुर्योधन' इति दु खेन योधयितुं शक्य इति तथा पलायनेन स्वार्थपरित्यागादुपहसनीयता द्योतयति। 'न रुषे'त्यर्जुनापेक्षया त प्रत्यसंरम्भव्यक्तिभीमापेक्षया काकुवशात्

क्रोधातिशयप्रकाशनम् । तदमीभिर्व्यञ्जकैर्व्यभिचारी गर्वः प्रकाश्यते । तेन चार्जुनाश्रयत्वे-(85a)न वीरो भीमाश्रयत्वेन रौद्रः प्रकृष्यत इति । एवञ्च 'कर्ते'त्यादिभिर्व्यङ्ग्यविशिष्टैः पदार्थैर्विभावादिरूपस्तथा वाक्यार्थभूतो रसोऽनुगृह्यत इत्यनुग्राह्यानुग्राहकत्वभावेन सङ्कीर्णत्वम् । गुणीभूतव्यङ्ग्यता च सुगमैव, वाक्य(च्य)स्यैव क्रोधोद्दीपकत्वात् । एकव्यञ्जकानुप्रवेशस्तु पूर्ववदेव । 'पाण्डवा यस्य दासा' इत्यत्र दासैश्च कृतकृत्यैः स्वाम्यवश्यं द्रष्टव्य इत्यर्थशक्तिमूलाऽनुरणनरूपताऽपि । उभयतोऽपि च चारुत्वादेकपक्षपरिग्रहे प्रमाणाभाव इति सन्देहयोगेन सङ्कीर्णत्वम् ।

ध्वनिगुणीभूतव्यङ्ग्यसंसृष्टिर्यथा—तेषा गोपवधूविलाससुहृदा राधारहःसाक्षिणां क्षेमं भद्र कलिन्दशैलतनयातीरे लतावेश्मनाम् । विच्छिन्ने स्मरतल्पकल्पनमृदुच्छेदोपयोगेऽधुना ते जाने जरठीभवन्ति विगलन्नीलत्विषः पल्लवाः ॥ (ध्व आ वृ २१६ पृ) 'तेषा'मिति येष्वस्माभिः क्रीडितमिति भावः । 'गोपवधूविलाससुहृदा'मित्यादिना न केवलमस्माकं तानि रहःस्थानानि शृङ्गारैकरसस्य हरेरपीति लतागृहस्य सौन्दर्यातिशयप्रकाशाद्वर्णोत्कर्षशोभाऽतिशयेव्यञ्जकता । 'जाने' इति तदुपयोगस्मरणव्यञ्जकः । 'विच्छिन्न' इत्याद्य'धुने'त्यन्तं तथा, शृङ्गारैकरसानस्मान् विहाय सम्प्रत्यन्यो न कश्चित्तत्र तथाविध इत्यभिप्रायात् । एतदेव 'जरठीभवन्ती'त्य(85b)नेन व्यज्यते, पल्लवानामन्यस्य तथाऽनुपयोगात् । गोपवध्वन्तर्भावेऽपि राधाया पृथगुपादान तां प्रति हरेः प्रेमातिशयप्रकाशनार्थम्, अतएव 'सुहृत्'-'साक्षि'शब्दाभ्या वेश्मनां चैतन्याध्यारोपेऽपि गोपवधूविलासे सौहार्दं चरन्ति राधाया विलासे साक्षित्वमात्रे पात्रीभवन्ति तानि, तदीयरहस्यदर्शने चमत्कारातिशयेन व्यापारशून्यत्वात् । तदिह 'सुहृ'च्छब्दे 'साक्षि'शब्दे चाविवक्षितवाच्यो ध्वनिः । 'ते' इति पदेनासाधारणगुणगणाभिव्यक्तावपि न चारुत्वमवलक्ष्यते, वाच्यस्यैव स्मरणस्य प्राधान्येन चारुत्वहेतुत्वात् । एवं 'जाने' इत्युत्प्रेक्ष्यमाणानन्तधर्मव्यञ्जकेनापि वाच्यमेवोत्प्रेक्षणरूपं प्रधानीक्रियते' (ध्व. आ लो २२१ पृ.) इति पदद्वयेऽत्र गुणीभूतव्यङ्ग्यता । तदनयोः परस्परनैरपेक्ष्यात् संसृष्टत्वम् ॥

इति महासान्धिविग्रहिकश्रीश्रीधरविरचिते काव्यप्रकाशविवेके चतुर्थ उल्लासः ॥४॥

परिशिष्टम्

श्रीधरटीकामातृकायामनुपलभ्यमानांशे (२५-२७ पृष्ठस्थितमूलोपरि) सरस्वतीतीर्थकृत**बालचित्तानुरञ्जिनी**तः प्रकृतोऽशः समुद्ध्रियते यथा—

परमाणुत्वादीनांमिति—अथवा विशेषाधानहेतुर्गुण इत्यव्यापकं लक्षणम्। 'अणु महद्दीर्घं ह्रस्वं चे'ति (वै सू ७।१।११) कणादेन गुणत्वेनाभिमतानामणुत्वादीनां नित्यत्वेन विशेषाधायकत्वाभावादित्यपरशङ्का। तेषां वस्तुतो गुणत्वाभावान्नाव्यापकमित्याह **परमाणुत्वादीनां**मिति। परमाण्वादीनामिति पाठे भावप्रधानो निर्देशः। न चैकत्वाज्जातेरुपाधित्वमस्तु? गुणादीनामुपाधित्वे प्रतिवस्तुभिन्नत्वादानन्त्यादिदोषसम्भव इत्याशङ्क्याह **गुणे**ति। **आश्रयभेदाद्भिन्न** इव प्रतीयते परमार्थतस्त्वेकः एव शुक्लादिर्गुणः सर्वत्रेत्यर्थः। तदुक्तं 'कर्मैकं जातिरप्येका जगत्येकः सितो गुण' इति। एकस्योपाधिवशादनेकविधत्वप्रतीतौ दृष्टान्तमाह **यथे**ति। **मुकुरो** दर्पणः। **भेदपक्षो**(?) **लक्ष्यत** इत्यनुषज्यते।

'जात्यादि'रित्येतदुपपाद्येदानीं 'जातिरेवे'ति पक्षमुपपादयति—**हिमपय** इत्यादिना। **बाल**शुकाद्युच्चारणभेदेन भिन्नेषु डित्थशब्देषु डित्थशब्दत्वं सामान्यमस्ति, तदेव पिण्डे आरोपितं स हि डित्थशब्दाभिधेयमित्यर्थः। जातिमाह—**प्रतिक्षण**मिति प्रतिक्षणं भिन्नेषु पिण्डेषु स्वाभाविकं डित्थत्वं सामान्यमभिधेयमित्यर्थः। एतत्तु वैनाशिकमतानुसारेण, प्रत्यहं कारणासप्रवेशान्नास्त्यन्तरमिति वैशेषिकमतानुसारेण वा जातिरेवेति पक्षमुपसंहरति **जाति**रिति। न(8b)नु विकल्पन्तराणामपि सत्वात्तानि कुतो नोपन्यस्तानीत्यत आह **तद्वा**निति जातिमान्, 'जातिव्यक्त्याकृतयस्तु पदार्थ' इति नैयायिकं [मतम्]। **अपोह** इतरव्यावृत्तिः संकेत इति बौद्धैरुक्तं इत्यर्थः। प्रयोजनसद्भावे गौरवमप्यङ्गीकार्यमित्यत आह **प्रकृतेति**। मतद्वययोरुपन्यासेनैव संकेतितसाकल्यप्रतीतेर्मतान्तरोपन्यासो व्यर्थ इत्यर्थः।

वाचकं शब्दमभिधाय लाक्षणिकं विवक्षितं तदुपयुक्तलक्षणालक्षणोपयोगित्वेन मुख्यार्थमाह **स इति**। श्लोकस्थस्य स इत्यस्य चार्थमाह **स इति**। **अस्येती**ति—अत्र साक्षात्संकेतितेऽर्थे शब्दस्य व्यापारोऽभिधेत्येतावल्लक्षणम्। **मुख्य** इति वक्ष्यमाणारोपितलक्षणाऽपेक्षयोक्तम्, अन्यथा साक्षात्सङ्केतितेऽर्थे शब्दस्य व्यापारान्तराभावान्मुख्यग्रहणमनर्थकं स्यात्। लक्षणाया लक्षणमाह **मुख्यार्थे**ति। मुख्यार्थबाधयोगाभ्या**मन्योऽर्थो लक्ष्यते** प्रतिपाद्यत इति **यत् सा लक्षणे**त्येतावल्लक्षणम्। नन्वेवं सति यच्छब्देन लक्ष्यत्वपरामर्शः स्यात्, न ह्येषा लक्षणा। लक्ष्यत्वं लक्ष्यधर्मः लक्षणा तु लक्षकधर्म इति चेन्न, यच्छब्देन

लक्ष्यत इत्याख्यातार्थगुणीभूत प्रतिपादनमात्रमेव परामृश्यात् (श्यते) प्रतिप्रादन तु प्रतिपादक-धर्म एव अतो नोक्तदोष । अथवा **यत्** यतो व्यापाराद**न्योऽर्थो लक्ष्यते सा लक्षणा**। सेन्ति प्रतिनिर्दिश्यमानलिङ्गोपादान 'रूढितोऽप्यप्रयोजना'दिति लक्षणाविभागपरम्। रूढिलक्षणा प्रयोजनलक्षणा चेति विभाग । ननु लक्षणाऽन्तर्भूतत्व' तथात्वे एकैकस्यान्तर्भावेऽव्याप्ति । उभयान्तर्भावत्वेऽसम्भव ।

लक्षणवाक्यमुदाहरणाभीष्टत्वेन व्याकरोति **कर्मणी**त्यादि। कुशान् लाति आदत्त इति कुशल इति मुख्योऽर्थो निपुणे न सम्भवतीत्याह **दर्भग्रहणे**ति। प्रयोजन-लक्षणायामपि मुख्यार्थबाध दर्शयति **गङ्गायां घोष** इति। व्याकरोति **विवेचक-त्वाद्**इति। रूढिलक्षणाया सामीप्यादि**रूढित** इत्यस्यार्थप्रसिद्धे प्रसिद्ध' प्रयोजनमाह **तथेति**। येषा पावनत्वादीना तथाऽतिशयेन (9a) न प्रतीतिस्तत्रातिशयेन प्रतिप्रादनरूपा-**रोपिता क्रिये**त्येतद्व्याचष्टे **स** इति। यद्यपि गङ्गाया घोष इत्यत्र गङ्गाशब्देन प्रत्यायित स्रोतस्तीर' लक्षयतीत्यर्थव्यापारो लक्षणा न शब्दव्यापारस्तथापि वाच्यधर्मो वाचके शब्दे लक्ष्यत आरोप्यते, अत शब्दो लाक्षणिक इत्यर्थ । आरोपिते हेतुमाह—**सान्तराधर्मनिष्ठ** इति। अन्तर' व्यवधान तेन सह वर्तते व्यवहितस्तीरादि स हि मुख्यमव्यवधानात्, अत स्तीरादिविषयो व्यापारो मुख्यार्थगत एव। न तु निवृत्तव्यापारो गङ्गाऽऽदिशब्दगत — शब्देन संभवतीति तत्रारोप्यत इत्यर्थ ।

विभागाभावाद्रूढिलक्षणामुपेक्ष्य प्रयोजनलक्षणा विभजते **स्वसिद्धय** इति। प्रयोजन-लक्षणा द्विविधा शुद्धा गौणी च। शुद्धोपादानलक्षणा लक्षणलक्षणा चेति द्विविधोक्ता। **स्वसिद्धये पराक्षेप** इत्युपादान **परार्थ स्वसमर्पण**मिति लक्षणम्। उपादानलक्षणा-मुदाहरणमुखेण व्याकरोति **कुन्ता** इति। **ततः** कारणात् कुन्तानामात्मोपादानेनैव प्रवृत्तत्वादुपादानलक्षणाऽजहत्स्वार्थेत्यर्थ । अत्र प्रयोजन बाहुल्यप्रतीति, कुन्तिन प्रविशन्तीत्युक्ते कुन्ताना बाहुल्यप्रतीतिर्न स्यात्। केचित्तु **गौरनुबन्ध्य** इत्यादिकमुपादान-लक्षणाया उदाहरणमाहु । तन्मत दूषयितुमनुवदति **गौरिति**। श्रुति प्रभुसम्मिततया बन्धनस्यावश्यकर्तव्यता दर्शयति। **श्रुती**ति स्वबन्धनसिद्ध्यर्थ' जात्या व्यक्तिरूप विशेष्य धर्मिणं न गता कुतो **विशेषणे** जातिरूपे धर्मे **क्षीणशक्तिर्विरत**व्यापारेति परमतमनूद्य तदसङ्गतमिति प्रतिजानीते **इती**ति। तत्र हेतुमाह—**न ह्यत्रे**ति कुन्ता' प्रविशन्तीत्यत्र बाहुल्यप्रतीतिवदत्र किञ्चित् प्रयोजनमस्तीत्यर्थ । तर्हि रूढि स्यात्तत्राह **न वे**ति।

ग्रन्थनामसङ्केतः

सङ्केत	ग्रन्थनाम	संस्करणम्
अ को	अमरकोष	
अ कौ	अलङ्कारकौस्तुभ	(कविकर्णपूरकृत V R S)
अभि श	अभिज्ञानशकुन्तलम्	(ईश्वरचन्द्रविद्यासागर स) सवत् १९२८
अभि भा	अभिनवभारती	
अ र आ	अलङ्काररत्नाकर	(पुणा स)
अ रा	अनर्घराघवम्	
अ वृ मा	अभिधावृत्तिमातृका	
अ श	अमरुशतकम्	
अ श र स	,, रसिकसञ्जीवनी	(निर्णयसागर सं)
अ स	अलङ्कारसर्वस्वम्	(निर्णयसागर २य स)
उ कु स	उद्भटकृत कुमारसम्भवम्	
उ रा च	उत्तररामचरितम्	
ऊ ह	ऊषाहरणम्	
ऋ स	ऋग्वेदसहिता	
औ वि च	औचित्यविचारचर्चा	(काव्यमाला १ गु)
क अ	कप्फिणाभ्युदयम्	(श्रीगौरीशङ्करसम्पादितम्)
क म	कर्पूरमञ्जरी	
क व स	कवीन्द्रवचनसमुच्चय =सुभाषितरत्नकोष (Har Or. Ser)	
काद	कादम्बरी	
का अ सा स	काव्यालङ्कारसारसंग्रह	
ल वृ	लघुवृत्ति	(प्रतीहारेन्दुराजकृता)
वि	विवृति.	(वडोदा स)
का अ सू वृ	काव्यालङ्कारसूत्रवृत्ति	
का आ	काव्यादर्श	

सङ्केत	ग्रन्थनाम	संस्करणम्
का. क सा.	कादम्बरीकथासार	(अभिनन्दकृत निर्णयसा. स०)
का कौ	काव्यकौतुकम्	
का नी सा.	कामन्दकीयनीतिसार	(बडोदा स)
का प्र दी	काव्यप्रकाशदीपिका	(चण्डीदासकृता)
का मी	काव्यमीमासा	(बडोदा स)
का सू	कामसूत्रम्	(वात्स्याव्यनकृतम्)
कि अ	किरातार्जुनीयम्	
कु म	कुट्टनीमतम्	(Bib Ind. edn)
कु स	कुमारसम्भवम्	
कु स स	कुमारसम्भवसञ्जीवनी	
कृ. रा	कृत्यारावणम्	
कौ. अ शा	कौटिल्यार्थशास्त्रम्	(Jolly's edn.)
ख प्र	दशावतारखण्डप्रशस्ति	
ग व	गउडवहो	(मुम्बाइ संस्कृत सिरीज स)
गा स	गाहासत्तसई	(निर्णयसागर स)
गा स वे	गाहासत्तसई	(वेवरसम्पादिता)
च आ	चन्द्रालोक	(काशी स)
चा	चान्द्रव्याकरणम्	
चि मी	चित्रमीमासा	
चो प	चोरपञ्चाशत्	
छ रा	छलितरामम्	
छ सू	छन्द सूत्रम्	(पिङ्गलकृतम्)
जा वि	जाम्बवतीविजयम्	
टु. टी.	टुप्टीका	
त. वा	तन्त्रवार्त्तिकम्	
ता वत्स	तापसवत्सराजम्	(यतिराज स)
तै उप	तैत्तिरीयोपनिषत्	
द चा	दरिद्रचारुदत्तम्	

सङ्केत	ग्रन्थनाम	संस्करणम्
द रू	दशरूपकम्	
द रू अ	दशरूपावलोक	
दे श	देवीशतकम्	(काव्यमाला ९ गु)
ध्व आ	ध्वन्यालोक	(निर्णय सा सं)
ध्व आ वृ	ध्वन्यालोकवृत्ति	(निर्णय सा सं)
ध्व आ लो.	ध्वन्यालोकलोचनम्	(निर्णय सा सं)
ध्व आ लो अ	ध्वन्यालोकलोचनाञ्जनम्	(माद्राज सं)
न. सा च	नवसाहसाङ्कचरितम्	
ना आ	नागानन्दम्	
ना शा	नाट्यशास्त्रम्	(१-२७अ वडोदा, २८-३६अ निर्णय सा ६)
नी श	नीतिशतकम्	
न्या कु अ.	न्यायकुसुमाञ्जलि	
न्या. बि	न्यायबिन्दु	
न्या म	न्यायमञ्जरी	(काशी स)
न्या सू	न्यायसूत्रम्	
न्या सू भा	न्यायसूत्रवात्स्यायनभाष्यम्	
प. स्त	पञ्चस्तवी	(काव्यमाला गु ३)
पा	पाणिनिसूत्रम्	(अष्टाध्यायी)
पा वा	पाणिनिसूत्रवार्तिकम्	
पू मी. सू	पूर्वमीमांसासूत्राणि	
प्र वा	प्रमाणवार्तिकम्	(राहुलसाङ्कृत्यायन सं)
बा भा	बालभारतम्	(राजशेखरकृतम्)
बा रा	बालरामायणम्	
बृ दे	बृहद्देशी	(अनन्तशयनसं)
भ का	भट्टिकाव्यम्	
भ श	भल्लटशतकम्	(काव्यमाला गु ४)
भा का. अ	भामहकाव्यालङ्कार	
भा वि	भामहविवरणम्	(का अ सा सं)

सङ्केत	ग्रन्थनाम	संस्करणम्
म ना	महानाटकम्	
म भा	महाभारतम्	(चित्रशाला सं)
म भाष्य	महाभाष्यम्	
म वी च	महावीरचरितम्	
मा मा	मालतीमाधवम्	
मा. स	माणिक्यचन्द्रकृतसङ्केत	(आनन्दाश्रम सं)
मी सू	मीमांसासूत्रम्	
मृ श	मृच्छकटिकम्	
मे दू	मेघदूतम्	
" पू	,, पूर्वमेघ	
" उ	,, उत्तरमेघ	
यो सू	योगसूत्रम्	(पातञ्जलम्)
यो. सू भा	व्यासभाष्यम्	
त वै—	तत्त्ववैशारदी	
र अ —	रसार्णवालङ्कार	(I H Q vol v)
र ग	रसगङ्गाधर	
र व	रघुवंशम्	
रत्ना	रत्नावली	
रा	रामायणम्	
रा अ	रामाभ्युदयम्	
रा आ	राघवानन्दम्	
रा च	रामचरितम्	(अभिनन्दकृतम्) (बडोदा सं)
रु का अ	रुद्रटकाव्यालङ्कार	
,, ,, ,, न सा	नमिसाधुटीका	(काव्यमाला स)
रु स	रुचककृतकाव्यप्रकाशसङ्केत	(Cal Or J)
ल अ सू	लङ्कावतारसूत्रम्	(तोकिओ स)
व जी	वक्रोक्तिजीवितम्	(द्वितीयस)
व ल.	वज्जलग्गा	(आसियातिक सोसाइटी स)

सङ्केत	ग्रन्थनाम	संस्करणम्
वा का अ	वाग्भटकाव्यालङ्कार	
वा द	वासवदत्ता	
वा प	वाक्यपदीयम्	(काशी स)
वा प टो	वाक्यपदीयव्याख्यानम्	(पुञ्जराजकृतम्)
वि उ	विक्रमोर्वशीयम्	
वि का	विल्हणकाव्यम्	(काव्यमाला १३ गु)
वि पु	विष्णुपुराणम्	(भिजियानाग्राम स)
वि बा ली	विषमबाणलीला	
वि शा भ	विद्धशालभञ्जिका	
वे स	वेणीसंहारम्	
वै श	वैराग्यशतकम्	
वै सू	वैशेषिकसूत्रम्	
व्य वि	व्यक्तिविवेक	(काशी स)
व्य वि व्या,	व्यक्तिविवेकव्याख्यानम्	(रुचककृतम्, काशी स)
श भा	शबरभाष्यम्	
श व्या वि	शब्दव्यापारविचार	
शि पा व	शिशुपालवधम	
शृ ति.	शृङ्गारतिलकम्	(काव्यमाला ३ गु)
शृ प्र	शृङ्गारप्रकाश	
शृ श	शृङ्गारशतकम्	
श्री स्त	श्रीकण्ठस्तव	
श्लो वा	श्लोकवार्त्तिकम्	
स क आ	सरस्वतीकण्ठाभरणम्	(निर्णयसागरस)
• र द	रत्नेश्वरटीका रत्नदर्पणम्	„
स ती—	सरस्वतीतीर्थकृतकाव्यप्रकाशटीका	(B O R I Mss 32)
स र आ	सङ्गीतरत्नाकर	(Adyar edn)
स ली	सहृदयलीला	(काव्यमाला गु ५)
सा का	साङ्ख्यकारिका	

सङ्केत	ग्रन्थनाम	संस्करणम्
सा द.	साहित्यदर्पणम्	
सि हे	सिद्धहेमचन्द्रम्	
सू श	सूर्यशतकम्	(काव्यमाला)
ह च	हर्षचरितम्	
ह प्र	हरिप्रबोधम्	
ह व	हयग्रीववधम्	
ह वि	हरविजयम्	
हे का अ	हेमचन्द्रकृतकाव्यानुशासनम्	
वि	,, काव्यानुशासनविवेक ।	

उ —उद्धृति , द्र —द्रष्टव्यम्, श्लो श्लोक ।

———

ERRATA

Page	Line	For	Read
xxxvii	10	sevaral	several
xlii	20	nearer to	nearer to that of
8	(Fn)2	चतुर्थोद्योते	चतुर्थोद्द्योते
10	21	एवञ्चा	एवञ्च
14	14	प्रधानरूप	प्रधानभूत
28	14	चेन्, न	चेत्, न
32	(Fn)4	यथा	यद्वा
37	10	[ ]	( )
40	25	(अ वु मा)	(अ ट्ट मा)
58	5	( )	[ ]
59	24	(द्यर्ं)	(द्ये)
60	22	वाघितत्वात्	बाधितत्वात्
62	25	०दुन्मज्जनिमज्ज०	०दुन्मज्जन्निमज्ज०
63	(Fn)8	वदवे	वदेव
63	(Fn)9	०श्रयनीय	०श्रयणीय
64	14	(उ वा च)	(उ रा च)
64	(Fn)5	(का अ सु ट्ट)	(का अ सू ट्ट)
71	15	समानकालता विना	समानकालभाविना
85	15	आक्षिसते	आक्षिप्यते
90	7	करित्वादयो	करत्वादयो
105	11	(ह वि)	(हर वि)
132	2	णित्वा	णिश्रा
136	20	चारूत्व	चारुत्व